15. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

16. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

17. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

18. Manu II, 69; Yājñ. I, 15.↩

19. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

20. आप० ध० १.३०.८.↩

21. मनु० स्मृ० २.६↩

22. Manu II, 144.↩

23. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

24. Manu II, 146-148.↩

25. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

26. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

27. आप० ध० १.३०.८.↩

28. मनु० स्मृ० २.६↩

29. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

30. Manu II, 147.↩

31. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

૦૩①

०९①

01 श्रावण्याम् पौर्णमास्यामध्यायमुपाकृत्य मासं④

श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं {अनूक्तम् अननूक्तञ्च} प्रदोषे नाधीयीत १

▼

⑤

>

▼ Bühler

1. After having performed the Upākarma for studying the Veda on the full moon of the month' Srāvaṇa (July-August), he shall for one month not study in the evening. 1

▼ हरदत्त-टीका

सूत्रम्⑥

श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषं नाऽधायीत ॥ १ ॥

प्रस्तावः⑥

एवमध्येतुरध्यापयितुश्च धर्मा उक्ताः। अथ देशकालकृता अध्ययनधर्मा उच्यन्ते—

टिप्पनी⑥

मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते। चान्द्रमासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः। तेषु या या पौर्णमासी सासाचच्यादिका स्मृता। कादाचित्कन योगेन नक्षत्रस्यति निर्णयः ।। तदेवं सिंहस्थे सवितरियाऽमावास्या तदन्ते चान्द्रमले मासे या मध्यवर्तिनी पौर्णमाली सा श्रावणी । श्रवणयोगस्तु भवतु वा मा वा । तस्यां श्रावण्या पौर्णमास्यामध्यायमुपाकृत्य गृह्योक्तेन विधिनोपाकर्म क. स्वा स्वाध्यायमधीयीत । अधीयानश्च मासमेक प्रदोषे प्रथमे रात्रिभागे ना धीयीत ग्रहणाध्ययनं धारणाध्ययन च न कुर्यात् । प्रदोषग्रहणादात्रा वप्पूर्व न दोषः ॥ १॥
02 तैष्याम् पौर्णमास्यां रोहिण्यां

तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत् २

▼

⑤

>

▼ Bühler

2. On the full moon of the month of Pauṣa (December-January), or under the constellation Rohini, he shall leave off reading the Veda. 2

▼ हरदत्त-टीका

सूत्रम्⑥

तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत् ॥२॥

टिप्पनी⑥

तिष्यः पुष्यः, तेन युक्ता पौर्णमासी तैषी श्रावणीवत्। तस्यां विरमेत् । उत्सर्जनं कुर्यात् । तस्यापि प्रयोगो3गृह्य एवोक्तः। रोहिण्यां वा,4 तेषमासि तिष्यात्पूर्वा या रोहिणी तस्यां वा विरमेत् । अनयोः पक्षयोः पञ्च मासानधीयीत ॥२॥

03 अर्धपञ्चमांश्चतुरो मासानित्येके

अर्धपञ्चमांश्चतुरो मासानित्येके ३

▼

⑤

>
▼ Bühler

3. Some declare, (that he shall study) for four months and a half. 5

▼ हरदत्त-टीका

सूत्रम्⑥

अर्धपञ्चमांश्चतुरो मासानित्येके ॥ ३ ॥

टिप्पनी⑥

अर्धः पञ्चमो येषां ते अर्धपञ्चमाः । अधिकांश्चतुरो मासान् अधीयीतेत्यपेक्ष्यत 6इत्येके मन्यन्ते । अस्मिन्पक्षे प्रोष्ठपद्यामुपाकरणं शास्त्रान्तरदर्शनात् । उत्सर्जनस्य वा प्रतिकर्षः। उत्सर्जने च कृते श्रावण्याः प्राक् शुक्लपक्षेषु धारणाध्ययनं वेदस्य, कृष्णपक्षेषु व्याकरणाद्यङ्गाध्ययनम् । पुनः श्रावण्यामुपाकृत्यागृहीतभागस्य ग्रहणाध्ययनमिति । प्रपञ्चितमेतत्7गृह्ये ॥ ३ ॥

04 निगमेष्वध्ययनं वर्जयेत्

निगमेष्वध्ययनं वर्जयेत् ४

▼

⑤

>
▼ Bühler

4. He shall avoid to Study the Veda on a high-road. 8

▼ हरदत्त-टीका

सूत्रम्⑥

निगमेश्वध्ययनं वर्जयेत् ॥ ४॥

टिप्पनी⑥

निगमाश्चत्वराः । ग्रामनिर्गमनामर्गा वा नियमेन गम्यते तेष्विति । तेषु सर्वप्रकारमध्ययनं वर्जयेत् ॥ ४॥

05 आनडुहेन वा शकृत्पिण्डेनोपलिप्तेऽधीयीत

आनडुहेन वा शकृत्पिण्डेनोपलिप्तेऽधीयीत ५

▼

⑤

>
▼ Bühler

5. Or he may study it (on a high-road), after having smeared (a space) with cowdung.

▼ हरदत्त-टीका

सूत्रम्⑥

आनडुहेन वा शकृत्पिण्डेनोपलिप्तेऽधीयीत ॥५॥

टिप्पनी⑥

अनडुत्सम्बन्धिना वा शकत्पिण्डेनोपलिप्य निगमेष्वप्यधीयीत ॥५॥

06 श्मशाने सर्वतः शम्याप्रासात्

श्मशाने सर्वतः शम्याप्रासात् ६

▼

⑤

>
▼ Bühler

6. He shall never study in a burial-ground nor anywhere near it within the throw of a Samyā. 9

▼ हरदत्त-टीका

सूत्रम्⑥

श्मशाने सर्वतः शम्याप्रासात् ॥ ६ ॥

टिप्पनी⑥

श्मशाने चाध्ययनं वर्जयेत् । सर्वतः सर्वासु दिक्षु । शम्या क्षिप्ता यावति देशे पतति ततोऽर्वागिति पञ्चमीनिर्देशाद्गम्यते ॥ ६ ॥

07 ग्रामेणाध्यवसिते क्षेत्रेण वा

ग्रामेणाध्यवसिते क्षेत्रेण वा नानध्यायः ७

▼

⑤

>
▼ Bühler

7. If a village has been built over (a burial ground) or its surface has been cultivated as a field, the recitation of the Veda (in such a place) is not prohibited.

▼ हरदत्त-टीका

सूत्रम्⑥

ग्रामेणाऽध्यवसिते क्षेत्रेण वा नाऽनध्यायः ॥ ७ ॥

टिप्पनी⑥

यदा श्मशानं ग्रामतया क्षेत्रतया वा अध्यवसितं स्वीकृतं भवति तदा अध्येतव्यमेव ॥ ७ ॥

08 ज्ञायमाने तु तस्मिन्न्

ज्ञायमाने तु तस्मिन्न् एव देशे नाधीयीत ८

▼

⑤

>
▼ Bühler

8. But if that place is known to have been a burial-ground he shall not study (there). 10

▼ हरदत्त-टीका

सूत्रम्⑥

ज्ञायमाने तु तस्मिन्नेव देशे नाऽधायीत ॥ ८॥

टिप्पनी⑥

यदा तु तदध्यवसितमपि श्मशानं ज्ञायते-अयं स प्रदेश इति, तदा तावत्येव प्रदेशे नाऽधीयीत । न शम्याप्रासात् ॥ ८ ॥

09 श्मशानवच्छूद्र पतितौ

श्मशानवच्छूद्र पतितौ ९

▼

⑤

>

▼ Bühler

9. A Śūdra and an outcast are (included by the term) burial-ground, (and the rule given, Sūtra 6, applies to them). 11

▼ हरदत्त-टीका

सूत्रम्⑥

12 श्मशानवच्छूद्रपतितौ ॥ ९ ॥

टिप्पनी⑥

शूद्रापतितसकाशेऽपि शम्याप्रासान्नाऽध्येयम् ॥९॥

▼ विश्वास-टिप्पनी

श्मशानवच्छूद्रपतितौ ॥ ९ ॥ समानागार इत्येके ॥ १० ॥

So, safe to say that deliberate (literal) shrAvaNa to v4s was to be avoided; but tolerated if accidental.

10 समानागार इत्येके

समानागार इत्येके १०

▼

⑤

>

▼ Bühler

10. Some declare, that (one ought to avoid only, to study) in the same house (where they dwell).

▼ हरदत्त-टीका

सूत्रम्⑥

समानागार इत्येके ॥ १० ॥

टिप्पनी⑥

एके मन्यन्ते समानागारे शूद्रपतितौ वर्ज्यौ, न शम्याप्रासादिति ॥१०॥

11 शूद्रा यान् तु

शूद्रा यां तु प्रेक्षणप्रतिप्रेक्षणयोरेवानध्यायः ११

▼

⑤

>

▼ Bühler

11. But if (a student and) a Śūdra woman merely look at each other, the recitation of the Veda must be interrupted,

▼ हरदत्त-टीका

सूत्रम्⑥

शूद्रायां तु प्रेक्षणप्रतिप्रेक्षणयोरेवाऽनध्यायः ॥ ११ ॥

टिप्पनी⑥

शूद्रायां तु यदा परस्परं प्रेक्षणं भवति तदैवाऽनध्यायः । न समानागारे, नापि शम्याप्रासादिति ॥ ११ ॥

12 तथान्यस्यां स्त्रियां वर्णव्यतिक्रान्तायाम्

तथान्यस्यां स्त्रियां वर्णव्यतिक्रान्तायां मैथुने १२

▼

⑤

>
▼ Bühler

12. Likewise, if (a student and) a woman, who has had connexion with a man of a lower caste, (look at each other).

▼ हरदत्त-टीका

सूत्रम्⑥

तथाऽन्यस्यां स्त्रियां वर्णव्यतिक्रान्तायां मैथुने ॥१२॥

टिप्पनी⑥

शूद्राव्यतिरिक्ताऽपि या स्त्री मैथुने वर्णव्यतिक्रान्ता नीचगामिनी तस्यामपि प्रेक्षणप्रतिप्रेक्षणयोरनध्यायः ॥ १२ ॥

13 ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन्सम्भाषितुम् ब्राह्मणेन

ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन्संभाषितुं ब्राह्मणेन संभाष्य तया संभाषेत संभाष्य तु ब्राह्मणेनैव संभाष्याधीयीत । एवं तस्याः प्रजानिःश्रेयसम् १३

▼

⑤

>

▼ Bühler

13. If he, who is about to study the Veda, wishes to talk to a woman during her courses, he shall first speak to a Brāhmaṇa and then to her, then again speak to a Brāhmaṇa, and afterwards study. Thereby the children (of that woman) will be blessed. 13

▼ हरदत्त-टीका

सूत्रम्⑥

ब्रह्माध्येष्यमाणो मलवद्वाससेच्छन् सम्भाषितुं ब्राह्मणेन सम्भाध्य तथा सम्भाषेत । सम्भाष्य तुब्राह्मणेनैव सम्भाष्याऽधीयीत । एवं तस्याः प्रजानिःश्रेयसम् ॥१३॥

टिप्पनी⑥

यो वेदमध्येष्यमाणो मलवद्वाससा रजस्वलया सह सम्भाषितुमिच्छति स पूर्वं ब्राह्मणेन सम्भाष्य पश्चात्तया सम्भाषेत । सम्भाष्य च पुनरपि ब्राह्मणेनैव सम्भाष्याऽधीयीत । किमेवं सति भवति ?

एवं तस्या मलवद्वासस आगामिनी या प्रजा तस्या निःश्रेयसमभ्युदयो भवति । प्रजारूपं वा निःश्रेयसं तस्या भवति । 'प्रजानिःश्रेयसमिति वचनात् विधवादिभिः सह सम्भाषणे नैतत्कर्तव्यम् ॥ १३ ॥

14 अन्तःशवम्

अन्तःशवम् १४

▼

⑤

>

▼ Bühler

14. (He shall not study in a village) in which a corpse lies; 14

▼ हरदत्त-टीका

सूत्रम्⑥

15 अन्तश्शवम् ॥ १४ ॥

टिप्पनी⑥

अन्तश्शवो यत्र ग्रामे तत्र नाध्येयम् । एतेना'न्तश्चाण्डाल'मिति व्याख्यातम् ॥ १४॥

15 अन्तश्चाण्डालम्

अन्तश्चाण्डालम् १५

▼

⑤

>
▼ Bühler

15. Nor in such a one where Kāndālas live.

▼ हरदत्त-टीका

सूत्रम्⑥

अन्तश्चाण्डालम् ॥ १५ ॥

टिप्पनी⑥

चण्डाल एव चाण्डालः । उभयत्र प्रथमा सप्तम्यर्थे । अव्ययीभावो वा विभक्त्यर्थे द्रष्टव्यः ॥१५॥

16 अभिनिर्हृतानान् तु सीम्न्यनध्यायः

अभिनिर्हृतानां तु सीम्न्यनध्यायः १६

▼

⑤

>
▼ Bühler

16. He shall not study whilst corpses are being carried to the boundary of the village,

▼ हरदत्त-टीका

सूत्रम्⑥

16अभिनिस्सृतानां तु सीम्न्यनध्यायः ॥ १६ ॥

टिप्पनी⑥

यदा शवाः सीम्नि अभिनिस्सृता भवन्ति तदा तत्राऽनध्यायः ॥ १६ ॥

17 सन्दर्शने चारण्ये

संदर्शने चारण्ये १७

▼

⑤

>
▼ Bühler

17. Nor in a forest, if (a corpse or Cāṇḍāla) is within sight.

▼ हरदत्त-टीका

सूत्रम्⑥

सन्दर्शने चाऽरण्ये ॥ १७ ॥

टिप्पनी⑥

अरण्ये च यावति प्रदेशे शवश्चण्डालो वा सन्दृश्यते तावत्यनध्यायः ॥ १७॥

18 तदहरागतेषु च ग्रामम्

तदहरागतेषु च ग्रामं बाह्येषु १८

▼

⑤

>

▼ Bühler

18. And if outcasts have entered the village, he shall not study on that day, 17

▼ हरदत्त-टीका

सूत्रम्⑥

तदहरागतेषु च ग्रामं बाह्येषु ॥ १८ ॥

टिप्पनी⑥

बाह्याः उपनिषादादयः परिपन्थिनः तेषु च ग्राममागतेषु तदहरनध्यायः तस्मिन्नहनि नाऽध्येतव्यम् ॥ १८॥

19 अपि सत्सु

अपि सत्सु १९

▼

⑤

>
▼ Bühler

19. Nor if good men (have come). 18

▼ हरदत्त-टीका

सूत्रम्⑥

अपि सत्सु ॥ १९ ॥

टिप्पनी⑥

ये विद्याचरित्रादिभिर्महान्तः सन्तः तेष्वपि ग्राममागतेषु तदहरनध्यायः ॥ १९ ॥

20 सन्धावनुस्तनिते रात्रिम्

संधावनुस्तनिते रात्रिम् २०

▼

⑤

>
▼ Bühler

20. If it thunders in the evening, (he shall not study) during the night. 19

▼ हरदत्त-टीका

सूत्रम्⑥

सन्धावनुस्तनिते रात्रिम् ॥ २० ॥

टिप्पनी⑥

सन्धिः सन्ध्या तस्मिन् सन्धौ । अनुस्तनिते मेघगर्जिते सति रात्रिं 20सर्वां रात्रिं नाऽधीयीत। वर्षताविदम् । अन्यस्मिन्नधिकं वक्ष्यति ॥२०॥

21 स्वप्नपर्यान्तं विद्युति

स्वप्नपर्यान्तं विद्युति २१

▼

⑤

>
▼ Bühler

21. If lightning is seen (in the evening, he shall not study during that night), until he has slept.

▼ हरदत्त-टीका

सूत्रम्⑥

स्वप्नपर्यान्तं विद्युति ॥ २१ ॥

टिप्पनी⑥

अन्त्यो दीर्घ उपान्त्यो ह्रस्वः । विपर्यासश्छान्दसोऽपपाठो वा । सन्धौ विद्युति सत्यां स्वप्नपर्यन्तां रात्रिमनध्यायः न सर्वाम् । स्वप्नपर्यन्ता रात्रिः प्रहरावशिष्टा ॥ २१ ॥

22 उपव्युषं यावता वा

उपव्युषं
यावता वा कृष्णां रोहिणीम् इति,
शम्या-प्रासाद् विजानीयाद्

- एतस्मिन् काले विद्योत-माने सप्रदोषम् अहरनध्यायः २२

▼

⑤

>
▼ Bühler

22. If lightning is seen about the break of dawn, or at the time when he may distinguish at the distance of a Samyā-throw, whether (a cow) is black or red, be shall not study during that day, nor in the following evening.

▼ हरदत्त-टीका

सूत्रम्⑥

उपव्युषं यावता वा कृष्णां रोहिणीमिति शम्याप्रासाद्विजानीयादेतस्मिन्काले विद्योतमाने सप्रदोषमहरनध्यायः ॥ २२ ॥

प्रस्तावः⑥

एवं सायं सन्ध्यायामुक्तं, प्रातस्सन्ध्यायामाह —

टिप्पनी⑥

उपव्युषं उषस्समीपे तत्र विद्योतमाने विद्युति सत्यामपरेद्युस्सप्रदोषमहरनध्यायः । प्रदोषादूर्ध्वं रात्रावध्ययनम् । यावता वा कालेन शम्याप्रासादर्वागवस्थितां गां कृष्णामिति वा रोहिणीमिति वा विजानीयात् । एतस्मिन्काले उपव्युषं विद्योतमान इत्यन्वयः । रोहिणी गौरवर्णा । इतिशब्दप्रयोगे द्विताया प्रयुज्यते । तत्राऽन्वयप्रकारश्चिन्त्यः ॥ २२॥

23 दह्रेऽपररात्रे स्तनयित्नुना

दह्रे*(=अपररात्रे तृतीयो भागः)* ऽपररात्रे*(=रात्रेस् तृतीयो भागः)* स्तनयित्नुना २३

▼

⑤

>
▼ Bühler

24. If it thunders in the second part of the third watch of the night, (he shall not study during the following day or evening).

▼ हरदत्त-टीका

सूत्रम्⑥

दह्रेऽपररात्रे स्तनयित्नुना ॥ २३ ॥

टिप्पनी⑥

रात्रेस् तृतीयो भागः सर्वो ऽपररात्रः। तस्य त्रेधा विभक्तस्याद्योंऽशो महारात्रः। अन्त्यो दह्रः । तस्मिन् दह्रेऽपररात्रे स्तनयित्नुना निमित्तेन सप्रदोषमहरनध्यायः ॥ २३ ॥

24 ऊर्ध्वमर्धरात्रादित्येके

ऊर्ध्वमर्धरात्रादित्येके २४

▼

⑤

>
▼ Bühler

24. Some (declare, that this rule holds good, if it thunders), after the first half of the night has passed.

▼ हरदत्त-टीका

सूत्रम्⑥

ऊर्ध्वमर्धरात्रादित्येके ॥ २४ ॥

टिप्पनी⑥

अर्धरात्रादूर्ध्वमनन्तरोक्तो विधिरित्येके मन्यन्ते । स्वपक्षस्तु दह्र एवेति ॥ २४ ॥

25 गवाञ् चावरोधे

गवां चावरोधे २५

▼

⑤

>
▼ Bühler

25. (Nor shall he study) whilst the cows are prevented from leaving (the village on account of thieves and the like),

▼ हरदत्त-टीका

सूत्रम्⑥

गवां चाऽवरोधे ॥ २५॥

टिप्पनी⑥

दस्युप्रभृतिभिरवरुद्धासु गोषु तावन्तं कालमनध्यायः । अवरोधो ग्रामान्निर्गमनिरोधः ॥२५॥

26 वध्यानाञ् च यावता

वध्यानां च यावता हन्यन्ते २६

▼

⑤

>
▼ Bühler

26. Nor (on the imprisonment of criminals) whilst they are being executed.

▼ हरदत्त-टीका

सूत्रम्⑥

वध्यानां च यावता हन्यन्ते ॥ २६ ॥

टिप्पनी⑥

वर्धाहाणांचो रादीनामवरोधे यावता कालेन हन्यन्ते तावन्तं कालमनध्यायः ॥ २६ ॥

27 पृष्ठारूढः पशूनान् नाधीयीत

पृष्ठारूढः पशूनां नाधीयीत २७

▼

⑤

>
▼ Bühler

27. He shall not study whilst he rides on beasts (of burden). 21

▼ हरदत्त-टीका

सूत्रम्⑥

पृष्ठारूढः पशूनां नाऽधीयीत ॥ २७ ॥

टिप्पनी⑥

हस्त्यश्वादीनां पशूनां पृष्ठाऽरूढः तत्राऽऽसीनस्सन्नाधीयीत ॥२७॥

28 अहोरात्रावमावास्यासु

अहोरात्राव् अमावास्यासु *(पूर्वेद्युश् चतुर्दशीषु चेति हरदत्तः। मनुना पूर्णिमायाम् अपि निषिद्धम्।)* २८

▼

⑤

>
▼ Bühler

28. At the new moon, (he shall not study) for two days and two nights. 22

▼ हरदत्त-टीका

सूत्रम्⑥

अहोरात्रावमावास्यासु ॥ २८ ॥

टिप्पनी⑥

अमावास्यासु द्वावहोरात्रौ नाऽधीयीत । तासु च पूर्वेद्युश्चतुर्दशीषु च । तथा च मनुः23- 'अमावास्याचतुर्दश्योः पौर्णमास्यष्टकासु च ।' इति ॥ २८॥

इत्यापस्तम्बसूत्रवृत्तावुज्ज्वलायां नवमी कण्डिका ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition. ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. Manu II, 35.↩
6. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
7. आप० ध० १.३०.८.↩
8. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
9. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
10. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
11. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person

who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

13. Manu II, 69; Yājñ. I, 15.↩

14. Manu II, 144.↩

15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

17. Manu II, 146-148.↩

18. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

19. Manu II, 147.↩

20. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

21. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

22. Manu II, 37.↩

23. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

१०①

01 चातुर्मासीषु च④

चातुर्मासीषु च १

▼

⑤

>
▼ Bühler

1. (Nor shall he study) on the days of the full moons of those months in which the Kāturmasya-sacrifice may be performed (nor on the days preceding them). 1

▼ हरदत्त-टीका

सूत्रम्⑥

चातुर्मासीषु च ॥ १ ॥

टिप्पनी⑥

चतुर्षु मासेषु भवाश्चातुर्मास्य । संज्ञैषा तिसृणां पौर्णमासीनां यासु चातुर्मास्यानि क्रियन्ते । काः पुनस्ताः? फाल्गुन्याषाढीकार्तिक्यः। चातुर्मास्यो यशः। तत्र भव'इति वर्तमाने 'संज्ञायामणि'त्यण्प्रत्ययः । तासु चातुर्मासीषु पूर्ववद्वावहोरात्रावनध्यायः । गौतमस्तु स्वशब्देनाह2 'कार्तिके फाल्गुन्याषाढी पौर्णमासी'ति । 3पौर्णमास्यनन्तरप्रतिपत्सु च शास्त्रान्तरवशादनध्यायः । यथा होशनाः-'पर्वणीतिहासर्जितानां विद्यानामनध्याय' इति । 'प्रतिपत्सु न चिन्तये'दिति च ।

एवं चतुर्दशीमात्रस्य वर्जने शास्त्रान्तरं4 मूलं मृग्यम् । तत्र याज्ञवल्क्यः —
5 'पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके।' इति ॥१॥
02 वैरमणो गुरुष्वष्टाक्य औपाकरण

वैरमणे(=उत्सर्जने) (मृतेषु) गुरुष्व् अष्टाक्य औपाकरण इति त्र्यहाः २

▼

⑤

>
▼ Bühler

2. At the time of the Vedotsarga, on the death of Gurus, at the Ashlakā-Śrāddha, and at the time of the Upākarma, (he shall not study) for three days; 6

▼ हरदत्त-टीका

सूत्रम्⑥

वैरमणे गुरुष्वष्टाक्य औपाकरण इति त्र्यहाः ॥ २ ॥

टिप्पनी⑥

विरमणमुत्सर्जनं तदेव वैरमणम् । तस्मिन् वैरमणे । प्रथमान्तपाठे सप्तम्यर्थे प्रथमा । गुरुषु श्वशुरादिषु । संस्थितेष्विति प्रकरणाद्गम्यते। अष्टकैवाऽष्टाक्यं स्वार्थिकः ष्यञ् । आदौ प्राप्ता वृद्धिर्मध्ये कृता । उपाकरणमेवौपाकरणम् । एतेषु निमित्तेषु त्र्यहा अध्ययनरहिताः । तत्र गुरुषु मरणदिनमारभ्य त्र्यहः । इतरेषु पूर्वेद्युरपेद्युस्तस्मिंश्च दिने नाधीयीत। अत्र गौतमः-7तिस्रोऽष्टकास्त्रिरात्रमन्त्यामेकेऽभितो वार्षिक'मिति । उपाकरणादूर्ध्वं प्रागुत्सर्जनात् यदध्ययनं तद्वार्षिकम् । तदभितस्तस्यादावन्ते च यत्कर्म क्रियते तत्रापि त्रिरात्रमित्यर्थः। औशनसे

च व्यक्तमुक्तम8 'उपाकर्मणि चोत्सर्गे त्र्यहमनध्याय' इति । मानवे च व्यक्तम्9 उपाकर्मणि चोत्सर्गे त्रिरात्र क्षपणं स्मृतम् ।' इति ॥२ ॥

03 तथा सम्बन्धेषु ज्ञातिषु

तथा संबन्धेषु ज्ञातिषु *(मृतेषु त्र्यहम् अनध्याय इति ब्रह्मचारिनियमः। इतरेषाम् आशौचवतां तु यावद् आशौचमनध्यायः)*[3]

▼

⑤

>
▼ Bühler

3. Likewise if near relations have died. 10

▼ हरदत्त-टीका

सूत्रम्⑥

तथा सम्बन्धेषु ज्ञातिषु ॥ ३ ॥

टिप्पनी⑥

ये सन्निकृष्टा ज्ञातयः भ्रातृतत्पुत्रपितृव्यादयः । तेष्वपि मृतेषु तथा त्र्यहमनध्यायः । ब्रह्मचारिणो विधिरयम् । आशौचवतां तु यावदाशौचमनध्यायः शास्त्रान्तरसिद्धः —

> 'उभयत्र दशाऽहानि
> कुलस्यान्नं न भुज्यते ।
> दानं प्रतिग्रहो यज्ञः
> स्वाध्यायश्च निवर्तते ॥'

इति । 11**उभयत्र** जनने मरणे च ॥३॥

04 मातरि पितर्याचार्य इति

मातरि पितर्य् आचार्य इति द्वादशाहाः ४

▼

⑤

>

▼ Bühler

4. (He shall not study) for twelve days, if his mother, father, or teacher have died.

▼ हरदत्त-टीका

सूत्रम्⑥

मातरि पिताचार्य इति द्वादशाहाः ॥४॥

टिप्पनी⑥

मात्रादिषु मृतेषु द्वादशाहमनध्यायः। अयं विधिर्गृहस्थानामपि । केचिदाशौचमपि तावन्तं कालमिच्छन्ति । नेति वयम्, अनध्यायप्रकरणात् ॥ ४॥

05 तेषु चोदकोपस्पर्शनन् तावन्तङ्

तेषु चोदकोपस्पर्शनं तावन्तं कालम् ५

▼

⑤

>
▼ Bühler

5. If these (have died), he must (also) bathe for the same number of days.

▼ हरदत्त-टीका

सूत्रम्⑥

तेषु चोदकोपस्पर्शनं तावन्तं कालम् ॥५॥

टिप्पनी⑥

मात्रादिष्व् अधिकं तावन्तं कालम् अहर् अहस् स्नानम् अपि कार्यम, न केवलम् अनध्यायः ॥५॥

06 अनुभाविनाञ् च परिवापनम्

अनु-भाविनां*(=पश्चाज्-जातानां)* च परिवापनम् ६

▼

⑤

>
▼ Bühler

6. Persons who are younger (than the relation deceased), must shave (their hair and beard), 12

▼ हरदत्त-टीका

सूत्रम्⑥

अनुभाविनां च परिवापनम् ॥ ६॥

टिप्पनी⑥

अनु पश्चात् भूता जाता अनुभाविनः मृतापेक्षयाऽवरवयसः। तेषां परिवापनमपि भवति केशानाम् । 13 कृत्यच' इति प्राप्तस्य णत्वस्य 14'णे15र्विभाषे'ति विकल्पः । अन्ये तु शावं दुःखमनुभवतां सर्वेषां परिवापनमिच्छन्ति। अपर आह- अनुभाविन उदकार्हाः । तेषां मरणे परिवापनमिति ॥६॥

"शिखामनु प्रवपन्त ऋध्यै" इति वचनम् ! तस्य बलीयस्त्वादित्याह"इति ख. पु.

07 न समावृत्ता वपेरन्न्

न समावृत्ता *(केशान्)* वपेरन्न् अन्यत्र *(याग-)*विहाराद् इत्येके ७

▼

⑤

>

▼ Bühler

7. Some declare, that students who have returned home on completion of their studentship, shall never shave, except if engaged in the initiation to a Śrauta-sacrifice. 16

▼ हरदत्त-टीका

सूत्रम्⑥

न समावृत्ता वपेरन्नन्यत्र विहारादित्येके ॥ ७ ॥

टिप्पनी⑥

विहारो यागदीक्षा । ततोऽन्यत्र न समावृत्ता वपेरनित्येके मन्यते । स्वमतं तु वपरन्नेवेति ॥ ७॥

08 अथापि ब्राह्मणं "रिक्तो

अथापि ब्राह्मणं - "रिक्तो वा एषोऽनपिहितो यन् मुण्डः। तस्यैतद् अपिधानं यच् छिखे"ति ८

▼

⑤

>
▼ Bühler

8. Now a Brāhmaṇa also declares, 'Verily, an empty, uncovered (pot) is he, whose hair is shaved off entirely; the top-lock is his covering.' 17

▼ हरदत्त-टीका

सूत्रम्⑥

अथापि ब्राह्मणम्-रिक्तो वा एषोऽनपिहितो यन्मुण्डस्तस्यैतदपिधानं यच्छिखेति ॥८॥

प्रस्तावः⑥

तत्र वपनस्याऽमङ्गलत्वं गुणविधिना परिहारं च वक्तुं ब्राह्मणमुदाहरति —

टिप्पनी⑥

रिक्तः अन्तःशून्यो घटादिः। सोऽनपिहितः पिधानरहितो यादृशः तादृश एषः यन्मुण्डो नाम । तस्य रिक्तस्यापिधानमेतत् यच्छिखा नाम । अनेन चैतद्दर्शित-निषेधशास्त्रं सह शिखया वपनप्रतिषेधपरमिति ॥ ८॥

09 सत्रेषु तु वचनाद्

सत्रेषु तु वचनाद् वपनं शिखायाः ९

▼

⑤

>
▼ Bühler

9. But at sacrificial sessions the top-lock must be shaved off, because it is so enjoined in the Veda. 18

▼ हरदत्त-टीका

सूत्रम्⑥

सत्रेषु तु वचनाद्वपनं शिखायाः ॥ ९ ॥

प्रस्तावः⑥

कथं तर्हि सत्रेषु शिखाया वपनम् ? 19वचनसामर्थ्यादित्याह—

टिप्पनी⑥

स्पष्टम् ॥ ९॥

10 आचार्ये त्रीनहोरात्रानित्येके

आचार्ये त्रीन् अहोरात्रान् इत्य् एके १०

▼

⑤

>
▼ Bühler

10. Some declare, that, upon the death of the teacher, (the reading should be interrupted) for three days and three nights. 20

▼ हरदत्त-टीका

सूत्रम्⑥

आचार्य त्रीनहोरात्रानित्येके ॥ १० ॥

टिप्पनी⑥

आचार्ये संस्थिते त्रीनहोरात्रानध्ययनं वर्जयेदित्येके मन्यते । स्वपक्षस्तु द्वादशाहः पूर्वमुक्तः ॥ १० ॥

11 श्रोत्रियसंस्थायामपरिसंवत्सरायामेकाम्

श्रोत्रिय-संस्थायाम् अपरिसंवत्सरायाम् एकाम् *(रात्रिम्)* ११

▼

⑤

>
▼ Bühler

11. If (he hears of) the death of a learned Brāhmaṇa (Śrotriya) before a full year (since the death) has elapsed, (he shall interrupt his reading) for one night (and day). 21

▼ हरदत्त-टीका

श्रोत्रियसंस्थाचा22मपरिसंवत्सरायामेकाम् ॥ ११ ॥

श्रोत्रियं 23वक्ष्यति । तस्य संस्थायामपरिपूर्णसंवत्सराया श्रुतायामेकां रात्रिमेकमहोरात्रमध्ययनं वर्जयेत् । अत्र संस्थाश्रवणाद्गुर्वादिष्वपि सैव निमिक्कमनध्यायस्य ॥ ११ ॥

13 सब्रह्मचारिणीत्येके १२ ...

सब्रह्मचारिणीत्य् एके १२ ...

▼

⑤

>
▼ Bühler

12. Some declare, (that the deceased Śrotriya must have been) a fellow-student.

▼ हरदत्त-टीका

सूत्रम्⑥

सब्रह्मचारिणीत्येके ॥ १२ ॥

टिप्पनी⑥

एके तु सब्रह्मचारिणो मरण एवाऽनन्तरोक्तमनध्यायमिच्छन्ति, न तु श्रोत्रियसामान्यमरणे ॥ १२॥

13 श्रोत्रियाभ्यागमेऽधिजिगांसमानो...

श्रोत्रियाभ्यागमे ऽधिजिगांसमानो ऽधीयानो वा ऽनुज्ञाप्याधीयीत १३

▼

⑤

>

▼ Bühler

13-14. If a learned Brāhmaṇa (Śrotriya) has arrived and he is desirous of studying or is actually studying, (or if he is desirous of teaching or is teaching,) he may study or teach after having received permission (to do so from the Śrotriya).

▼ हरदत्त-टीका

सूत्रम्⑥

श्रोत्रियाभ्यागमेऽधिजिगांसमानोऽधीयानो वाऽनुज्ञाप्याधीयीत ॥ १३ ॥

टिप्पनी⑥

श्रोत्रियेऽभ्यागते अध्येतुकामोऽधीयानश्च तमनुज्ञाप्याधीयीत ॥ १३ ॥

14 अध्यापयेद्वा

अध्यापयेद् वा १४

▼

⑤

>
▼ Bühler

(See previous sUtra.)

▼ हरदत्त-टीका

सूत्रम्⑥

अध्यापयेद्वा ॥ १४ ॥

टिप्पनी⑥

अध्यापयितुकामोऽध्यापयन्वेति प्रकरणाद्गम्यते । सोऽपि तमनुज्ञाप्याध्यापयेदिति ॥ १४॥

15 गुरुसन्निधौ चाधीहि भो

गुरुसंनिधौ चाधीहि भो इत्य् *(आत्मगतम्)* उक्त्वाधीयीत १५

▼

⑤

>
▼ Bühler

15-16. He may likewise study or teach in the presence of his teacher, if (the latter) has addressed him (saying), 'Ho, study! (or, Ho, teach!)' 24

▼ हरदत्त-टीका

सूत्रम्⑥

गुरुसन्निधौ "चाधीहि भो" इत्युक्त्वाऽधीयीत ॥ १५ ॥

टिप्पनी⑥

धारणाध्ययनं पारायणाध्ययनं वा कुर्वन् गुरौ सन्निहिने सति 'अधीहि भो' इत्युक्त्वाऽधीयीत ॥ १५॥*

16 अध्यापयेद्वा

अध्यापयेद् वा १६

▼

⑤

>
▼ Bühler

(See previous sUtra.)

▼ हरदत्त-टीका

सूत्रम्⑥

अध्यापयेद्वा ॥ १६ ॥

टिप्पनी⑥

अध्यापयन्नपि तत्सन्निधावेवमेवोक्त्वाऽध्यापयेत् ॥ १६ ॥*

17 उभयत उपसङ्ग्रहणमधिजिगांसमानस्याधीत्य च

उभयत उपसंग्रहणम् अधिजिगांसमानस्याधीत्य च १७*(5)*

▼

⑤

>
▼ Bühler

17. When a student desires to study or has finished his lesson, he shall at both occasions embrace the feet of his teacher. 25

▼ हरदत्त-टीका

सूत्रम्⑥

उभयत उपसंग्रहणमधिजिगांसमानस्याधीत्य च ॥१७॥

टिप्पनी⑥

उभयतः अध्ययनस्याऽऽदावन्ते च उपसंग्रहण कर्तव्यं यथाक्रम26मध्ये तु कामस्याऽऽदावधीत्यान्ते ॥ १७ ॥*

*मनौ. २. ७३ श्लोको द्रष्टव्यः ।

18 अधीयानेषु वा यत्रान्यो

अधीयानेषु वा यत्रान्यो व्यवेयाद् *(=मध्ये गच्छेत्)*, एतम् एव शब्दम् *(=अधीहि भोः)* उत्सृज्याधीयीत १८

▼

⑤

>
▼ Bühler

18. Or if, whilst they study, another person comes in, he shall continue his recitation, after those words, ('Ho, study!') have been pronounced (by the newcomer). 27

▼ हरदत्त-टीका

सूत्रम्⑥

अधीयानेषु वा यत्राऽन्यो व्यवेयादेतमेव शब्दमुत्सृज्याऽधीयीत ॥ १८ ॥

टिप्पनी⑥

बहुवचनमतन्त्रम् । अधीयानेषु च यत्राऽन्यो व्यवेयादन्तरा गच्छेत्, तत्रा'प्यधीहि भो' इत्येतमेव शब्दमुत्सृज्य उच्चार्याऽधीयीत । प्रत्येकमुपदेशादेकवचनम् । अर्थायीरन् ॥ १८ ॥

19 श्वगर्दभनादाः सलावृक्येकसृकोलूकशब्दाः सर्वे

*(बहु-)*श्व-गर्दभ-नादाः सलावृक्य्-एकसृक*(=श्रृगाल)*+उलूक-शब्दाः
सर्वे वादित्र-शब्दा
रोदन-गीत-सामशब्दाश् च १९

▼

⑤

>
▼ Bühler

19. The barking of (many) dogs, the braying of (many) asses, the cry of a wolf or of a solitary jackal or of an owl, all sounds of musical instruments, of weeping, and of the Sāman melodies (are reasons for discontinuing the study of the Veda). 28

▼ हरदत्त-टीका

सूत्रम्⑥

श्वगर्दभनादास्सलावृक्येकसृकोलूकशब्दास्सर्वे वादितशब्दा रोदनगीतसामशब्दाश्च ॥१९॥

टिप्पनी⑥

शुनां गर्दभानां च बहूनां नादः । बहुवचननिर्देशात् ।

सलावृकी वृकजाताव् अवान्तरभेदः । क्रोष्ट्रीत्यन्ये । लिङ्गस्याविवक्षितत्वात् पुंसोऽपि ग्रहणम् । 29 'इन्द्रो यतीन् सालावृकेभ्य' इत्यादौ दर्शनात् । सर्वत्रादिस्वरो दीर्घः । स एवायं विकृतः प्रयुक्तः ।

एकसृकः एकचरः सृगालः । उलूको दिवाभीतः। एतेषां च शब्दाः । वादितानि वादित्राणि वीणावेणु मृदङ्गादीनि । तेषां च सर्वे शब्दाः । रोदनशब्दादयश्च । एते श्रूयमाणा 30अनध्यायस्य हेतवः ॥ १९ ॥

20 शाखान्तरे च साम्नामनध्यायः

शाखान्तरे *(श्रूयमाणे)* च साम्नाम् अनध्यायः २०

▼

⑤

>

▼ Bühler

20. If another branch of the Veda (is being recited in the neighbourhood), the Sāman melodies shall not be studied.

▼ हरदत्त-टीका

सूत्रम्⑥

शाखान्तरे च साम्नामनध्यायः ॥ २० ॥

टिप्पनी⑥

वेदान्तरसकाशे31 साम्नामनध्ययनम् । गीतिषु सामाख्या, तद्योगाद्वेदवचन इत्यन्ये ॥२०॥

21 सर्वेषु च शब्दकर्मसु

सर्वेषु च शब्दकर्मसु *(=आक्रोश-परिवादादिषु)* यत्र *(+अध्ययन-शब्देन)* संसृज्येरन् २१

▼

⑤

>

▼ Bühler

21. And whilst other noises (are being heard, the recitation of the Veda shall be discontinued), if they mix (with the voice of the person studying). 32

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वेषु च शब्दकर्मसु यत्र संसृज्येरन् ॥ २१ ॥

टिप्पनी⑥

आक्रोश33परिवादादिषु सर्वेषु शब्दकर्मसु अनध्यायः। यत्राध्ययनशब्देन ते ससृज्येरन् ॥ २१॥

22 छर्दयित्वा स्वप्नान्तम्

छर्दयित्वा *(=वमित्वा)* स्वप्नान्तम् *(नाधीयीत)*। २२

▼

⑤

>
▼ Bühler

22. After having vomited (he shall not study) until he has slept. 34

▼ हरदत्त-टीका

सूत्रम्⑥

छर्दयित्वा स्वप्नान्तम् ॥ २२ ॥

टिप्पनी⑥

छर्दनं वमनम् । तत्कृत्वा स्वप्नान्तं यावन्नाऽधीयीत ॥ २२ ॥

23 सर्पिर्वा प्राश्य

सर्पिर्वा प्राश्य *(अधीयीत)*। २३

▼

⑤

>
▼ Bühler

23. Or (he may study) having eaten clarified butter (after the attack of vomiting).

▼ हरदत्त-टीका

सूत्रम्⑥

सर्पिर्वा प्राश्य ॥ २३ ॥

टिप्पनी⑥

अथ वा सर्पिः प्राश्याऽधीयीत ॥ २३ ॥

24 पूतीगन्धः

पूतीगन्धः २४

▼

⑤

>
▼ Bühler

24. A foul smell (is a reason for the discontinuance of study). 35

▼ हरदत्त-टीका

सूत्रम्⑥

पूतिगन्धः ॥ २४ ॥

टिप्पनी⑥

दुर्गन्ध उपलभ्यमानोऽनध्यायहेतुः ॥ २४ ॥

25 शुक्तञ् चात्मसंयुक्तम्

शुक्तं *(=पक्वं कालपाकेनाम्लं जात)* चात्मसंयुक्तम् *(=उदरस्थम्)* २५

▼

⑤

>
▼ Bühler

25. Food turned sour (by fermentation), which he has in his stomach, (is a reason for the discontinuance of the recitation, until the sour rising ceases). 36

▼ हरदत्त-टीका

सूत्रम्⑥

शुक्तञ्चाऽऽत्मसंयुक्तम् ॥ २५ ॥

टिप्पनी⑥

यत्पक्वं कालपाकेनाऽम्लं जातं तच्छुक्तम् । तद्यावदात्मसंयुक्तं स्वोदरस्थमजीर्णं, यावत्तदनुगुण उद्गारस्तावदनध्यायहेतुः ॥ २५ ॥

26 प्रदोषे च भुक्त्वा

प्रदोषे च भुक्त्वा २६

▼

⑤

>
▼ Bühler

26. (Nor shall he study) after having eaten in the evening, 37

▼ हरदत्त-टीका

सूत्रम्⑥

प्रदोषे च भुक्त्वा नाऽधीयीत ॥ २६ ॥

टिप्पनी⑥

तेनाऽधीत्यैव भुञ्जीत ॥ २६ ॥

27 प्रोदकयोश्च पाण्योः

प्रोदकयोश्च *(= भुक्त्वार्द्रयोः)* पाण्योः २७

▼

⑤

>
▼ Bühler

27. Nor as long as his hands are wet. 38

▼ हरदत्त-टीका

सूत्रम्⑥

प्रोदकयोश्च पाण्योः ॥ २७ ॥

टिप्पनी⑥

भुक्त्वेत्येव । भुक्त्वा यावत्प्रोदकौ पाणी आर्द्रौ तावन्नाऽधीयीत । केचित् भुक्त्वेति नानुवर्तयन्ति ॥ २७ ॥

28 प्रेतसङ्क्लृप्तञ् चान्नम् भुक्त्वा

प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः २८

▼

⑤

>

▼ Bühler

28. (And he shall discontinue studying) for, a day and an evening, after having eaten food prepared in honour of a dead person (for whom the Sapiṇḍī-karaṇa has not yet been performed), 39

▼ हरदत्त-टीका

सूत्रम्⑥

प्रेतसंक्लृप्तं चान्नं भुक्त्वा सप्रदोषमहरनध्यायः ॥ २८ ॥

टिप्पनी⑥

यो मृतोऽसपिण्डीकृतस्स प्रेतः । तदुद्देशेन दत्तमन्नं भुक्त्वा सप्रदोषमहर्नाऽधीयीत । प्रदोषादूर्ध्वं न दोषः । अत्र मनुः —
40यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति । विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ॥' इति ॥ २८ ॥

29 आ च विपाकात्

आ च विपाकात् २९

▼

⑤

>
▼ Bühler

29. Or until the food (eaten on that occasion) is digested. 41

▼ हरदत्त-टीका

सूत्रम्⑥

आ च विपाकात् ॥ २९ ॥

टिप्पनी⑥

यदि तावता कालेन तदन्नं पक्वं जीर्णं न भवति, तत आविपाकात् तस्य नाऽधीयीत ॥ २९ ॥

30 अश्राद्धेन तु पर्यवदध्यात्

अश्राद्धेन तु पर्यवदध्यात् ३०

▼

⑤

>

▼ Bühler

30. But he shall (always) eat in addition (to the meal given in honour of a dead person), food which has not been given at a sacrifice to the Manes. 42

▼ हरदत्त-टीका

सूत्रम्⑥

अश्राद्धेन तु पर्यवदध्यात् ॥ ३० ॥

टिप्पनी⑥

जीर्णे अजीर्णे च तस्मिन् अश्राद्धेनाऽन्नेन पर्यवदध्यात् तस्योपर्यश्राद्धमन्नं भुञ्जीतेत्युक्तं भवति । केचित् अत्र 'अश्राद्धेने'ति वचनात् पूर्वत्रापि प्रेतान्नमिति श्राद्धमात्रं विवक्षितं मन्यन्ते ॥ ३० ॥

॥ इत्यापस्तम्बधर्मसूत्रे तद्वृत्तावुज्वलाया च दशमी कण्डिका ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩

2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
4. आप० ध० १.३०.८.↩
5. मनु० रमृ० २.६↩
6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
9. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
10. Manu II, 35.↩
11. आप० ध० १.३०.८.↩
12. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
13. मनु० रमृ० २.६↩
14. गौ० ध० १. १, २↩
15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
16. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
17. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which,

according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

18. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
20. Manu II, 69; Yājñ. I, 15.↩
21. Manu II, 144.↩
22. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
23. आप० ध० १.३०.८.↩
24. Manu II, 146-148.↩
25. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩
26. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

27. Manu II, 147.↩

28. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

29. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

30. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

31. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

32. Manu II, 37.↩

33. आप० ध० १.३०.८.↩

34. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

35. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

36. The meaning is, he shall keep all the restrictions imposed upon a student, as chastity, &c, but that he shall not perform the fire-worship or service to a teacher, nor study. Manu II, 39; XI. 192, Yājñ. I, 38; Weber, Ind. Stud. X, 101.↩

37. 'If he is strong, he shall bathe three times a day--morning, midday, and evening.'--Haradatta.↩

38. Brahman, apparently, here means 'Veda,' and those who neglect its study may be called metaphorically 'slayers of the Veda.'↩

39. Manu II, 40; Āśv. Gṛ. Sū. I, 19, 8, 9; Weber, Ind. Stud. X, 21.↩

40. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

41. Compare above, I, 1, 1, 28.↩

42. 'Because in this Sūtra the expression "food not given at a Śrāddha" occurs, some think that the preceding Sūtra refers to "food eaten at a Śrāddha."'--Haradatta. This explanation is not at all improbable.↩

११①

01 {अनध्ययनम्} काण्डोपाकरणे चामातृकस्य④

{अनध्ययनम्} काण्डोपाकरणे चामातृकस्य १

▼

⑤

>
▼ Bühler

1. (The recitation of the Veda shall be interrupted for a day and evening if he has eaten), on beginning a fresh Kāṇḍa (of his Veda), food given by a motherless person, 1

▼ हरदत्त-टीका

सूत्रम्⑥

काण्डोपाकरणे चाऽऽमातृकस्य ॥१॥

टिप्पनी⑥

काण्डोपाकरणं काण्डव्रतादेशनम् । तस्मिन्नहनि अमातृकस्यान्नं भुक्त्वा सप्रदोषमहरनध्यायः। अपर आह-भुक्त्वेति नाऽनुवर्तते । यथाचोत्तरत्र भुक्त्वा ग्रहणम् । काण्डोपाकरणे अमातृकस्य माणवकस्य सप्रदोषमहरनध्यायः। एतेनोत्तरं व्याख्यातम् ॥ १॥

02 काण्डसमापने चापितृकस्य

काण्डसमापने चापितृकस्य २

▼

⑤

>

▼ Bühler

2. And also if he has eaten, on the day of the completion of a Kāṇḍa, food given by a fatherless person.

▼ हरदत्त-टीका

सूत्रम्⑥

काण्डसमापने चाऽपितृकत्य ॥२॥

टिप्पनी⑥

काण्डसमापनं व्रतविसर्गः ॥२॥

03 मनुष्यप्रकृतीनाञ् च देवानां

मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वेत्येके ३

▼

⑤

>

▼ Bühler

3. Some declare, that (the recitation shall be interrupted for the same space of time), if he has eaten at a sacrifice offered in honour of gods who were formerly men. 2

▼ हरदत्त-टीका

सूत्रम्⑥

मनुष्यप्रकृतीनां च देवानां यज्ञे भुक्त्वत्येके ॥३॥

टिप्पनी⑥

ये मनुष्या भूत्वा प्रकृष्टेन तपसा देवास्सम्पन्नास्ते मनुष्यप्रकृतयो 3नन्दिकुबेरादयः । तेषां यज्ञः तत्प्रीत्यर्थं ब्राह्मणभोजनम्, तत्र भुक्त्वा सप्रदोषमहरनध्याय इत्येके मन्यन्ते । मनुभ्यमुखेन देवेष्विज्यमानेष्वित्यन्ये ॥३॥

04 पर्युषितैस्तण्डुलैराममांसेन च नानध्यायाः

पर्युषितैस्तण्डुलैराममांसेन च नानध्यायाः ४

▼

⑤

>

▼ Bühler

4. Nor is the recitation interrupted, if he has eaten rice received the day before, or raw meat (though these things may have been offered in honour of the dead), 4

▼ हरदत्त-टीका

सूत्रम्⑥

पर्युषितैस्तण्डुलैराममांसेन च नाऽनध्यायः ॥ ४ ॥

टिप्पनी⑥

'प्रेतसंक्लृप्तं चाऽन्न'(१०.२८)मित्यस्यापवादः। पर्युषिता रात्र्यन्तरिताः ह्यः प्रतिगृहीताः, तेषु तण्डुलेष्वद्य पक्त्वा भुज्यमानेषु नानध्यायः। तथा आममांसेन तदहर्भक्षितेनापि नानध्यायः। पर्युषितेनेत्येके । 'पर्युषितै'रिति वचनात्तदहर्भक्षितैः सप्रदोषमहरनध्यायः ॥ ४॥

05 तथौषधिवनस्पतिमूलफलैः

तथौषधिवनस्पतिमूलफलैः ५

▼

⑤

>
▼ Bühler

5. Nor (if he has eaten at a funeral dinner) roots or fruits of herbs and trees.

▼ हरदत्त-टीका

सूत्रम्⑥

तथौषधिवनस्पतिमूलफलैः॥५॥

टिप्पनी⑥

ओषधिग्रहणेन वीरुधोऽपि गृह्यन्ते । वनस्पतिग्रहणेन वृक्षमात्रम् । तेषां मूलैः सूरणकन्दादिभिः फलैश्चाऽम्रादिभिः पक्वैरपक्वैश्च तदहक्षितैरपि नाऽनध्यायः॥५॥

06 यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यङ्

यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत ६

▼

⑤

>
▼ Bühler

6. When he performs the ceremony for beginning of a Kāṇḍa, or when he studies the index of the Anuvākas 5 of a (Kāṇḍa), he shall not study that (Kāṇḍa) on that day (nor in that night).

▼ हरदत्त-टीका

सूत्रम्⑥

यत्काण्डमुपाकुर्वीत यस्य चानुवाक्यं कुर्वीत न तत्तदहरधीयीत ॥६॥

टिप्पनी⑥

यस्मिन्नहनि यत्काण्डमुपाकृतं न तत्तदहरधीयीत ।
तथा श्रावण्यां पौर्णमास्याम् उपाकृत्य
प्रशस्ते ऽहर्-अन्तरे यस्य काण्डस्यानुवाक्यम् अध्येतुम् आरम्भं कुर्वीत
न तत्-तद्-अहर् अधीयीत ।
अहर् इत्य् अहोरात्रोपलक्षणम् ॥६॥

07 उपाकरणसमापनयोश्च पारायणस्य तां

उपाकरणसमापनयोश्च पारायणस्य तां विद्याम् ७

▼

⑤

>
▼ Bühler

7. And if he performs the ceremonies prescribed on beginning or ending the recitation of one entire Veda, he shall not study that Veda (during that day). 6

▼ हरदत्त-टीका

सूत्रम्⑥

उपाकरणसमापनयोश्च पारायणस्य तां विद्याम् ॥ ७॥

टिप्पनी⑥

अनेकवेदाध्यायी यद्येकस्य वेदस्य पारायणं कुरुते तदा तस्य पारायणस्य 7ये उपाकरणोत्सर्जने, तयोः कृतयोस्तां विद्यां तदहर् नाऽधीयीत । एतदेव ज्ञापकं पारायणस्याऽप्युपाकरणोत्सर्जने भवत इति । 'तां विद्यामि'ति वचनाद्विद्यान्तराध्ययने न दोषः ॥ ७॥

08 वायुर्घोषवान्भूमौ वा तृण

वायुर्घोषवान्भूमौ वा तृण संवाहो वर्षति वा यत्र धाराः प्रवहेत् ८

▼

⑤

>
▼ Bühler

8. If the wind roars, or if it whirls up the grass on the ground, or if it drives the rain-drops forward during a rain-shower, (then the recitation shall be interrupted for so long a time as the storm lasts). 8

▼ हरदत्त-टीका

सूत्रम्⑥

वायुर्घोषवान् भूमौ तृणसंवाहो वर्षति वा यत्र धाराः प्रवहेत् ॥ ८॥

टिप्पनी⑥

घोषवान् कर्णश्रवः । भूमाववस्थितानि तृणानि संवाहयति उत्क्षिप्य गमयतीति तृणसंवाहः । वर्षति वा 9मेघे धाराः प्रवहेत् विक्षिपेत् । यत्र देशे एवंविधो वायुस्तत्र तावन्तं कालं नाऽधीयीत । अत्र मनुः —
10"कर्णश्रवेऽनिले रात्रौ दिवा पांसुसमूहने" ॥ इति ॥ ८॥

09 ग्रामारण्ययोश्च सन्धौ

ग्रामारण्ययोश्च सन्धौ ९

▼

⑤

>
▼ Bühler

9. (Nor shall he study) on the boundary between a village and forest,

▼ हरदत्त-टीका

सूत्रम्⑥

11ग्रामारण्ययोश्च सन्धौ महापथे च विप्रोष्य च समध्ययनं तदहः ॥९॥

प्रस्तावः⑥

उत्तरे द्वे सूत्रे निगदसिद्धे—

टिप्पनी⑥

यदा12 सहाऽधीयानाः कारणवशाद्विप्रवसेयुः । केचिच्चाचार्येण वा सङ्गतास्तदा समध्ययनं सहाऽधीयमानं प्रदेश तदहर्नाधीयीत । विप्रोषितानां यदहः पुनर्मेलनं तदहर्नाधीयीतेत्यन्ये ॥ ९ ॥

10 महापथे च

महापथे च १०

▼

⑤

>
▼ Bühler

10. Nor on a highway.

▼ हरदत्त-टीका

सूत्रम्⑥

महापथे च ॥

टिप्पनी⑥

(पूर्वसूत्रे व्याख्यातम् ।)

11 विप्रोष्य च समध्ययनन्

विप्रोष्य च समध्ययनं तदहः ११

▼

⑤

>
▼ Bühler

11. If (some of his) fellow-students are on a journey, he shall not study during that day, (the passage) which they learn together. 13

▼ हरदत्त-टीका

सूत्रम्⑥

विप्रोष्य च समध्ययनं तदहः ॥

टिप्पनी⑥

(पूर्वसूत्रे व्याख्यातम् ।)

12 स्वैरिकर्मसु च

स्वैरिकर्मसु च १२

▼

⑤

>
▼ Bühler

12. And whilst performing acts for his pleasure,

▼ हरदत्त-टीका

सूत्रम्⑥

स्वैरिकर्मसु च ॥१०॥

टिप्पनी⑥

नाधीयीतेत्येव ॥१०॥

13 यथा पाद प्रक्षालनोत्सादनानुलेपनाणीति

यथा पाद प्रक्षालनोत्सादनानुलेपनाणीति १३

▼

⑤

>
▼ Bühler

13. Such as washing his feet, shampooing or anointing himself,

▼ हरदत्त-टीका

सूत्रम्⑥

यथाहस्तप्रक्षालनोत्सादनानुलेखणानाति ॥ ११ ॥

प्रस्तावः⑥

अत्रोदाहरणम्—

टिप्पनी⑥

णत्वमाकस्मिकम् , अपपाठो वा ॥ ११ ॥

14 तावन्तङ् कालन् नाधीयीताध्यापयेद्वा

तावन्तं कालं नाधीयीताध्यापयेद्वा १४

▼

⑤

>
▼ Bühler

14. He shall neither study nor teach, as long as he is thus occupied.

▼ हरदत्त-टीका

सूत्रम्⑥

तावन्तं कालं नाऽधीयीताऽध्यापयेद्वा ॥ १२ ॥

टिप्पनी⑥

तेषु स्वैरिकर्मसु तावन्त कालमध्ययनमध्यापनञ्च वर्जयेत् ॥ १२ ॥

15 सन्ध्योः

सन्ध्योः १५

▼

⑤

>
▼ Bühler

15. (He shall not study or teach) in the twilight, 14

▼ हरदत्त-टीका

सूत्रम्⑥

सन्ध्योः ॥ १३ ॥

टिप्पनी⑥

सज्योतिषोऽज्योतिषोऽदर्शनात् उभे सन्ध्ये। तयोस्तावन्तं कालं नाधीयीताध्यापयेद्वा । एवमुत्तरत्राप्यनुवृत्तिः ॥ १३ ॥

16 तथा वृक्षमारूढः

तथा वृक्षमारूढः १६

▼

⑤

>
▼ Bühler

16. Nor whilst sitting on a tree, 15

▼ हरदत्त-टीका

सूत्रम्⑥

तथा वृक्षमारूढोऽप्सु चावगाढो नक्तं चापावृते ॥ १४ ॥

प्रस्तावः⑥

उत्तरे द्वे सूत्रे निगदसिद्धे—

टिप्पनी⑥

विवृतद्वारमपावृतम् । तत्र नक्तं नाधीयीत ॥ १४ ॥

17 अप्सु चावगाढः

अप्सु चावगाढः १७

▼

⑤

>
▼ Bühler

17. Nor whilst immersed in water,

▼ हरदत्त-टीका

सूत्रम्⑥

प्सु चावगाढः ॥

टिप्पनी⑥

(पूर्वसूत्रे व्याख्यातम् ।)

18 नक्तञ् चापावृते

नक्तं चापावृते १८

▼

⑤

>
▼ Bühler

18. Nor at night with open doors,

▼ हरदत्त-टीका

सूत्रम्⑥

नक्तं चापावृते ॥

टिप्पनी⑥

(पूर्वसूत्रे व्याख्यातम् ।)

19 दिवा चापिहिते

दिवा चापिहिते १९

▼

⑤

>
▼ Bühler

19. Nor in the day-time with shut doors.

▼ हरदत्त-टीका

सूत्रम्⑥

दिवा च पिहिते ॥ १५ ॥

टिप्पनी⑥

संवृतद्वारं पिहितम् । तत्र दिवा नाधीयीत ॥ १५ ॥

20 अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः

अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः *(=वसन्तोत्सवः)* २०

▼

⑤

>
▼ Bühler

20. During the spring festival and the festival (of Indra), in the month of Āṣāḍha (June-July), the study of an Anuvāka is forbidden. 16

▼ हरदत्त-टीका

सूत्रम्⑥

अविहितमनुवाकाध्ययनमाषाढवासन्तिकयोः ॥१६॥

टिप्पनी⑥

वासन्तिको वसन्तोत्सवः । स च चैत्रमासि शुक्लत्रयोदश्यां भवति । आषाढशब्देनापि तस्मिन्मासे क्रियमाणस्तादृशः कश्चिदिन्द्रोत्सवादिर्विवक्षितः। तयोस्तदहरनुवाकाध्ययनमविहितम् ।
अनुवाकग्रहणान्न्यूने न दोषः।
अपर आह- अनुवाकग्रहणान्मन्त्रब्राह्मणयोरेव प्रतिषेधः, नाङ्गानामिति ॥ १६ ॥

21 नित्यप्रश्नस्य चाविधिना

नित्यप्रश्नस्य चाविधिना २१

▼

⑤

>
▼ Bühler

21. (The recitation) of the daily portion of the Veda (at the Brahmayajña is likewise forbidden if done) in a manner differing from the rule (of the Veda). 17

▼ हरदत्त-टीका

सूत्रम्⑥

नित्यप्रश्नस्य चाऽविधिना ॥ १७ ॥

टिप्पनी⑥

नित्यं प्रश्नाध्ययनं यत्र स नित्यप्रश्नो ब्रह्मयज्ञः। तस्य चाविधिना वक्ष्यमाणेन प्रकारेण विनाऽनुवाकाध्ययनमविहितम् । यद्यपि नित्यं ब्रह्म यज्ञाध्ययनं तथापि केनचिदप्यङ्गेन विना न कर्तव्यम् । तेन विस्मृत्य प्रातराशे कृते प्रायश्चित्तमेव न ब्रह्मयज्ञः। मनुः—
'स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् । इति ॥ १७ ॥

22 तस्य विधिः

तस्य विधिः २२

▼

⑤

>
▼ Bühler

22. (Now follows) the rule (for the daily recitation) of that (Brahmayajña).

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य विधिः ॥ १८॥

टिप्पनी⑥

तस्य नित्यप्रश्नस्य विधिर्वक्ष्यते ॥ १८ ॥

23 अकृतप्रातराश उदकान्तङ् गत्वा

अकृतप्रातराश उदकान्तं गत्वा प्रयतः शुचौ देशेऽधीयीत यथाध्यायम् उत्सृजन् वाचा २३

▼

⑤

>
▼ Bühler

23. Before taking his morning-meal, he shall go to the water-side, and having purified himself, he shall recite aloud (a portion of the Veda) in a pure 18 place, leaving out according to (the order of the) texts (what he has read the day before).

▼ हरदत्त-टीका

सूत्रम्⑥

अकृतप्रातराश उदकान्तं गत्वा प्रयतः शुचौ देशेऽधीयीत यथाध्यायमुत्सृजन्वाचा ॥ २९ ॥

टिप्पनी⑥

अकृतदिवाभोजन उदकसमीपं गत्वा प्रयतः स्नानमार्जनादिशुद्धः शुचौ देशे प्राच्यामुदीच्यां वा दिश्यच्छदिर्दर्शेऽधीयीत । यथाध्यायं यथा पामनुषङ्गरहितमुत्सृजन् आदित आरभ्य प्रथमादिष्वहस्सु19 अधीयीत द्वितीयादिषूत्सृज्य ततः परमधीयीत । वाचा उच्चैरित्यर्थः ॥ १९ ॥

24 मनसा चानध्याये

मनसा चानध्याये २४

▼

⑤

>
▼ Bühler

24. If a stoppage of study is enjoined (for the day, he shall recite the daily portion) mentally.

▼ हरदत्त-टीका

सूत्रम्⑥

मनसा चाऽनध्याये ॥२०॥

टिप्पनी⑥

अनध्याये च मनसाऽधीयीत नित्यस्वाध्यायम् ॥ २० ॥

25 विद्युति चाभ्यग्रायां स्तनयित्नाव्

विद्युति चाभ्यग्रायां स्तनयित्नाव् अप्रायत्ये प्रेतान्ने नीहारे च मानसं परिचक्षते २५

▼

⑤

>
▼ Bühler

25. If lightning flashes without interruption, or, thunder rolls continually, if a man has neglected to purify himself, if he has partaken of a meal in honour of a dead person, or if hoarfrost lies on the ground, (in these cases) they forbid the mental recitation (of the daily portion of the Veda). 20

▼ हरदत्त-टीका

सूत्रम्⑥

विद्युति चाऽभ्यग्रायां स्तनयित्नावप्रायत्ये प्रेतान्ने नीहीरे च मानसं परिचक्षते ॥ २१ ॥

टिप्पनी⑥

विद्युति अभ्यग्रायामविरतायाम् । स्तनयित्नौ चाऽभ्यग्रे । अप्रायत्ये आत्मनोऽशुचिभावे । प्रेतान्ने च भुक्ते । नीहारे च नीहारो हिमानी तस्मिंश्च वर्तमाने । मानसमनन्तरोक्तमध्ययनं परिचक्षते वर्जयन्ति ॥ २१ ॥

26 श्राद्धभोजन एवैके

श्राद्धभोजन एवैके २६

▼

⑤

>

▼ Bühler

26. Some forbid it only in case one has eaten a funeral dinner. 21

▼ हरदत्त-टीका

सूत्रम्⑥

श्राद्धभोजन एवैके ॥ २२ ॥

टिप्पनी⑥

एके त्वाचार्याः श्राद्धभोजन एव मानसं परिचक्षते, न विद्युदादिषु ॥२२॥

27 विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र सन्निपतेयुस्तस्त्र्यहमनध्यायः

विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र संनिपतेयुस्तस्त्र्यहमनध्यायः २७

▼

⑤

>
▼ Bühler

27. Where lightning, thunder, and rain happen together out of season, the recitation shall be interrupted for three days. 22

▼ हरदत्त-टीका

सूत्रम्⑥

विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ23 यत्र सन्निपतेयुस्त्र्यहमनध्यायः ॥ २३ ॥

टिप्पनी⑥

अपर्तौ यस्मिन् देशे यो वर्षाकालः ततोऽन्यस्तत्रापर्तुः । तत्र यदि विद्युदादयस्सन्निपतेयुः समुदितास्स्युः तदा त्र्यहमनध्यायः ॥ २३ ॥

28 यावद्भूमिर्व्युदकेत्येके

यावद्भूमिर्व्युदकेत्येके २८

▼

⑤

>
▼ Bühler

28. Some (declare, that the recitation shall stop) until the ground is dry.

▼ हरदत्त-टीका

सूत्रम्⑥

यावद्भूमिर्व्युदकेत्येके ॥ २४ ॥

टिप्पनी⑥

यावता कालेन भूमिः विगतोदका भवति तावन्तं कालमनध्याय इत्येके मन्यन्ते ॥२४॥

29 एकेन द्वाभ्यां वैतेषामाकालम्

एकेन द्वाभ्यां वैतेषामाकालम् २९

▼

⑤

>
▼ Bühler

29. If one or two (of the phenomena mentioned in Sūtra 27 appear, the recitation shall be interrupted) from that hour until the same hour next day.

▼ हरदत्त-टीका

सूत्रम्⑥

एकेन द्वाभ्यां वैतेषामाकालम् ॥ २५ ॥

टिप्पनी⑥

एतेषां विद्युदादीनां मध्ये एकेन द्वाभ्यां वा योगे आकालमनध्यायः । अपरेद्युरा तस्य कालस्य प्राप्तिरित्यर्थः ॥ २५ ॥

30 सूर्याचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वान उल्कायामग्न्युत्पाते

सूर्याचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वान उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालम् ३०

▼

⑤

>
▼ Bühler

30. In the case of an eclipse of the sun or of the moon, of an earthquake, of a whirlwind, of the fall of a meteor, or of a fire (in the village), at whatever time these events happen, the recitation of all the sacred sciences (Vedas and Aṅgas) must be interrupted from that hour until the same hour next day. 24

▼ हरदत्त-टीका

सूत्रम्⑥

सूर्याचन्द्रमसोर्ग्रहणे भूमिचलेऽपस्वान उल्कायामग्न्युत्पाते च सर्वासां विद्यानां सार्वकालिकमाकालम् ॥२६॥

टिप्पनी⑥

'सुर्याचन्द्रमसो'रिति वचनं बृहस्पत्यादिनिवृत्त्यर्थम् । भूमिचले भूकम्पे । अपस्वाने निर्घाते । उल्कायामुल्कापाते । अग्न्युत्पाते25 ग्रामादिदाहे । एतेषु निमित्तेषु26 सर्वेषु सर्वासां विद्यानाम्—
27अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥ इत्युक्तानाम् ।

सार्वकालिकमृतौ चापर्तौ चाऽऽकालमनध्यायः। अत्र 'सर्वासामि'ति वचनादन्यत्र वेदानामेव प्रतिषेधः । अङ्गानामपीत्यन्ये ॥ २६ ॥

31 अभ्रञ् चापर्तौ सूर्याचन्द्र

अभ्रं चापर्तौ सूर्याचन्द्र मसोः परिवेष इन्द्र धनुः प्रतिसूर्यमत्स्यश्च वाते पूतीगन्धे नीहारे च सर्वेष्वेतेषु तावन्तं कालम् ३१

▼

⑤

>

▼ Bühler

31. If a cloud appears out of season, if the sun or the moon is surrounded by a halo, if a rainbow, a parhelion or a comet appears, if a (high) wind (blows), 28 a foul smell (is observed), or hoarfrost (lies on the ground, at all these occasions (the recitation of all the sacred sciences must be interrupted) during the duration (of these phenomena).

▼ हरदत्त-टीका

सूत्रम्⑥

अभ्रं चापर्तौ सूर्याचन्द्रमसोः परिवेष इन्द्रधनुः प्रतिसूर्यमत्स्यश्च वाते पूतिगन्धे नीहारे च सर्वष्वेतेषु तावत्कालम् ॥२७॥

टिप्पनी⑥

अपर्तावभ्रं दृश्यमानं यावत् दृश्यते तावत्कालमनध्यायः । एवं परिवेषादिवपि योज्यम् । बृहस्पत्यादिपरिवषे न दोषः । इन्द्रधनुः प्रसिद्धम् । सूर्यसमीपे तदाकृतिः प्रतिसूर्यः । मत्स्यः पुच्छवन्नवाम् । समाहारद्वन्द्वे छान्दसो लिङ्गव्यत्ययः । सर्वेष्वेतेषु वातादिषु च त्रिषु तावत्कालमनध्यायः । वाते घोषवति । पूतिगन्धे दुर्गन्धे । नीहारे हिमान्याम् । वातादिग्रहणं पूर्वोक्तानां श्वगर्दभादीनामुपलक्षणार्थम् । पुनरिह वचनं तावत्कालमिति विधातुम् । अत्रैव श्वगर्दभादिग्रहणे कर्तव्ये पूर्वत्र पाठस्य चिन्त्यं प्रयोजनम् ॥ २७ ॥

32 मुहूर्तं विरते वाते

मुहूर्तं विरते वाते ३२

▼

⑤

>

▼ Bühler

32. After the wind has ceased, (the interruption of the recitation continues) for one muhūrta. 29

▼ हरदत्त-टीका

सूत्रम्⑥

मुहर्तं विरते वाते ॥ २८ ॥

टिप्पनी⑥

वाते घोषवति विरतेऽपि मुहुर्तमात्रमनध्यायः। द्वे नाडिके मुहूर्तम् ॥ २८ ॥

33 सलावृक्यामेकसृक इति स्वप्नपर्यान्तम्

सलावृक्यामेकसृक इति स्वप्नपर्यान्तम् ३३

▼

⑤

>

▼ Bühler

विवरणम् । किञ्च आत्मन् पश्यन् आत्मनि पश्यन् उपलभमानः । सर्वभूतानि सर्वाणि (भूतानि)। सर्वेषां भूतानामात्मस्वरूपतामेव पश्यन्नित्यर्थः । सवत्राऽऽत्मानं च परम् । न मुह्येत मोह न गच्छेत् । न ह्यात्मैकत्वदर्शिनो मोहावतारः; (१) तत्र को मोह' इति च मन्त्रलिङ्गात्। कीडग्विशिष्टमा स्मदर्शनं मोहनिबर्हणमित्याह--चिन्तयन् उपसंहृतकरणः कविः मेधा वी सन् ध्यायमानः । न शब्दजनितदर्शनमात्रेण मोहापगमः । सर्वभूते. चतुप्रविष्टमकं संव्यवहारकाले यो हि युक्तः पश्येत् , स वै ब्रह्मा ब्राह्मणः । नाकपृष्ठे सुकरागौ(१) ब्रह्मणि । विराजति विविधं दीप्यते ॥९॥
02 निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य

निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति । स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठी विभाजः । तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः २

▼

⑤

>
▼ Bühler

2. He, who is intelligence itself and subtler than the thread of the lotus-fibre, pervades the universe, and who, unchangeable and larger than the earth, contains the universe; he, who is different from the knowledge of this world, obtained by the senses and identical with its objects, possesses the highest (form consisting of absolute knowledge). From him, who divides himself, spring all (created) bodies. He is the primary cause, he is eternal, he is unchangeable. 1

▼ हरदत्त-टीका

सूत्रम्⑥

निपुणोऽणीयान् बिसोर्णाया यस्सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति ।
स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽ नन्यस्य ज्ञेयात्परमेष्ठी विभाजः।
तस्मात्कायाःप्रभवन्ति सर्वे समूलं शाश्वतिकः स नित्यः ॥

टिप्पनी⑥

निपुणो मेधावी चित्स्वरूपः । बिसोर्णाया बिसतन्तोरप्यणीयान् सूक्ष्मः। य सर्वमावृत्य व्याप्य तिष्ठति । यश्च पृथिव्या अपि वर्षीयान् प्रवृद्धतरः सर्वगतत्वादेव सर्वमारभ्य विष्टभ्य शेषित्वेनाऽधिष्ठाय तिष्ठति । ध्रुवः एकरूपः। अस्य जगतो यदिन्द्रियैर्ज्ञानं इन्द्रियजन्यं ज्ञानं तस्मात् । कीदृशात ? अनन्यस्य ज्ञेयात् , पञ्चम्यर्थे षष्ठी, ज्ञेयात् नीलपीताद्याकारादनन्यभूतं नीलपीताद्याकारं, तस्माद्विषज्ञानादन्य इत्यर्थः । श्रूयते च 2 तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमय' इति ।
3 ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम् ॥ इति पुराणम् । स्वभावतः स्वच्छस्य चिद्रूपस्यऽऽत्मनो नीलपीताद्याकारकालुष्यं तद्रूपाया बुद्धेरनुरागकृतं भ्रान्तमित्यर्थः। वैषयिकज्ञानादन्य इति विशेषणेन ज्ञानात्मक इत्यपि सिद्धम्। 4 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति च श्रुतिः। एवंभूतस्याऽऽमा परमेष्ठी परमे स्वरूपे तिष्ठतीति । विभाज इत्यस्य परेण सम्बन्धः । विभजत्यात्मानं देवमनुष्यादिरूपेण नानाशरीरानुप्रवेशेनेति विभाक् । तस्माद्विभाजो निमित्तभूतात् सर्वे काया देवमनुष्यशरीराणि प्रभवन्ति उत्पद्यन्ते । स मूलं प्रपञ्चसृष्टेर्भोक्तृतया मूलकारणम् । स नित्यः अविनाशी । शाश्वतिक एकरूपः अविकारः ॥२॥

▼ शङ्कराचार्य-विवरणम्

निपुणोऽणीयान्बिसोर्णाया यः सर्वमावृत्य तिष्ठति । वर्षीयांश्च पृथिव्या ध्रुवः सर्वमारभ्य तिष्ठति । स इन्द्रियैर्जगतोऽस्य ज्ञानादन्योऽनन्यस्य ज्ञेयात्परमेष्ठी विभाजः । तस्मात्कायाः प्रभवन्ति सर्वे स मूलं शाश्वतिकः स नित्यः २

विवरणम्। किञ्च निपुण' सर्ववित् अणीयान् अणुतरो विसोर्णायाः बिसत तन्तोरपि । कोऽसौ ? य प्रकृत आत्मा सर्व समस्तं जगदावृत्य सं. व्याप्य तिष्ठति । किञ्च वर्षीयान् वृद्धतरः स्थूलतरश्च पृथिव्याः। सर्वा. त्मको हि सः । ध्रुव. नित्यः सर्व कृत्स्नमारभ्य संस्तम्भनं कृत्वा । तिष्ठति वर्तते ।

(२) येन द्यौरुमा पृथवी च बढा' इति मन्त्रलिङ्गात् । स सर्वेश्वरः सर्वज्ञः एको विनेय इत्यर्थः। स परमात्मा इन्द्रियैर्जन्यते यशानं ज गतोऽस्य, तस्मात् ज्ञानादन्यो विलक्षणः, लौकिकज्ञानादन्य इति विशे. षणाज्ञानात्मक इत्यतेत् सिद्धम् । 'सत्यं ज्ञानमनन्तमिति च श्रुतेः। अस्य जगत इन्द्रियजन्यज्ञानादन्य इत्युक्तम् । अतश्च तद्यतिरिक्तं ज. १. इशा. उ. ७. २. ८.७.३. HELP I । .. . आपस्तम्बधर्मसूत्रे (प.८)क.२३. PAL A गदिति प्राप्तम् । अतस्तन्मा भूदित्याह-अनन्यस्य अपृथग्भूतस्य ज. गतः, ज्ञेयात् ज्ञातव्यात् परमार्थस्वरूपाद्वयात् परमेश्वराद् घटादेरिव मदः । स च परमेष्ठी परमे प्रकृष्टे स्वे माहिम्नि हृदाकाशेऽवस्थातुं शीलमस्येति परमेष्ठी । स्वयमेव विभाज' विभक्तो देवपितृमनुष्यादि. ना ज्ञातृशेयज्ञानभेदेन च, यस्मात् स एव ज्ञेय आत्मा स्वतो विभजति जगदनेकधा । तस्मादेवाऽऽत्मनः काया. शारीराण्याकाशादिक्रमेण प्रभवन्ति सर्वे ब्रह्मादिलक्षणाः। अतो मूलं स जगतः । (१) यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः । अत एव स शाश्वतिकः । यो हि पृथिव्यादिविकार, सोऽबादिक्रमेण विनश्येत् , पर मूलकारणमापद्यते, सोऽशाश्वतिकोऽ नित्यः । अयं चाऽऽत्मा परं मूलम् । न तस्याऽप्यन्यन्मूलमस्ति, यतो जा. तो विनश्येत् , मूलमापद्यते, ततस्तद्विलक्षणत्वाच्छाश्वतिकः शश्वदे. करूपः । अतो नित्यः एकत्वमहत्वमूलत्वेभ्यश्च ॥ १० ॥

- १. तै. उ. ३. १.

03 दोषाणान् तु विनिर्घातो

दोषाणां तु विनिर्घातो योगमूल इह जीविते । निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ३

▼

⑤

>

▼ Bühler

3. But the eradication of the faults is brought about in this life by the means (called Yoga). A wise man who has eradicated the (faults) which destroy the creatures, obtains salvation.

▼ हरदत्त-टीका

सूत्रम्⑥

दोषाणां तु निर्घातो योगमूल इह जीविते ।
निर्हृत्य भूत दाहीयान् क्षेमं गच्छति पण्डितः ॥ ११ ॥ ३ ॥

टिप्पनी⑥

दोषाणां वक्ष्यमाणानां क्रोधादीनां निर्घातः निर्मूलनम् । इह जीविते योगमूलः योगाः वक्ष्यमाणा अक्रोधादयः तन्मूलकः । अतश्च तान् भूतदाहीयान् भूतानि दहतः क्रोधादीन्दोषान् निर्हृत्य क्षेमं गच्छति आत्मत्राणद्वारेण । पण्डितो 5लब्धज्ञानः आत्मसाक्षात्कारी । क्षेमं अभयं मोक्षम् 6अभयं वै जनक प्राप्तोऽसीति बृहदारण्यकम् ॥ समाप्ताः श्लोकाः ॥ ३ ॥

▼ शङ्कराचार्य-विवरणम्

दोषाणां तु विनिर्घातो योगमूल इह जीविते । निर्हृत्य भूतदाहीयान् क्षेमं गच्छति पण्डितः ३

विवरणम् । एवं यथोक्तमात्मान विदितवत आध्यात्मिका योगा न्यायसहिता अप्रतिबन्धेन भविष्यन्ति । मिथ्याप्रत्ययपूर्वका हि दोषाः। दोषनिमिः सश्च धर्माधर्मजनितः ससारः दोषनिवृत्तावत्यन्तं विनिवर्तते इत्येतम. थै दर्शयिष्यन्नाह--

दोषाणां तु निर्घातो योगमूल इह जीविते । निहत्य भूत दाहीयान् क्षेमं गच्छति पण्डितः ॥ ११ ॥ ३ ॥ ___ दोषाणां तु क्रोधादीनां निर्घात विनाशः। योगा अक्रोधादयः, त. न्मूलः तनिमित्तमित्येतत् । अक्रोधादिषु हि सत्सु प्रतिद्वन्द्विनो दोषा दुर्बलत्वानिहन्यन्ते । इह जवित इति दोषप्रभवकमीनीमत्तत्वाज्जीवित तस्य देहधारणावसानो दोषव्यापार इत्येतद् दर्शयति । तत्प्रतिपक्षेश्व क्रोधादिषु कथं नु नाम मुमुक्षवः प्रयत्नातिशय कुयुरिति योगदोषयो रितरेतरविरोधित्वे सति स्थितिगतिवद् योगेभ्यो दोषाणामेव निर्धातः, न तु विपर्यय इत्येतत् । कथामिति चेत् ? उच्यते-सम्यग्दर्शनसचिव. त्वाद् बलवन्तो योगाः । मिथ्याप्रत्ययसचिवक्त्वात दुर्बलत्वानिहन्यन्ते । निहन्तीत्येतदप्युक्तम् । बुद्धिबलवद्धयस्तद्धीनानां लोके निर्धातो दृष्टः । 'अक्रोधनः' (१. १. २३) 'क्रोधादींश्च---' (१. ११. २५) इति लि नात् । निर्हत्य अपहृत्य । भूतदाहान् दोषेषु(न?) ह्युद्भुतेषु भूतानि द. हन्त इव अग्निना परितप्यन्ते । अतो भूतदाहा दोषा उच्यन्ते । तान् निहत्य । क्षेमं निर्भय मोक्षं गच्छति। ___"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"अभयं वै जनक प्राप्तो अलि' न भवति विदषां ततो भयम' इत्यादिश्रतिस्मतिभ्य. । न दोषप्रशममात्रेणाऽब्रह्मविदः क्षेमप्राप्तिरित्याह-पण्डित इति । ब्रह्मविदि ह्यत्र पण्डितशब्दः प्रयुक्तो, न शास्त्रविदि । (१)"तस्माद् ब्राह्मणः पा ण्डित्य निर्विद्य" इति श्रुतेः । इहाऽऽत्मविद्याधिकारात । यदि तर्हि दोषनिहरणं पण्डितोऽप्यपक्षेत, तं प्रति न हि ब्रह्मवि द्या क्षेमप्राप्तिनिमित्तम् । यदि ब्रह्मविद्यैव क्षेमप्राप्तिनिमित्तं, ब्रह्मविद्या नन्तरमेव न दुःखमुपलभेत । नैष दोषः । उक्तो ह्यत्र परिहारः--सम्यग ज्ञानबलावष्टम्भाद् बलिनो योगा दुर्वलान् दोषान् मिथ्याप्रत्ययभवान् निहन्तुमलमिति । तस्माद् ब्रह्मविद्ययैव क्षेमप्राप्तिः । अन्यथा दोषनिह

रणकर्मक्षययोरसम्भवात् । १. ब. उ. ३. ५. १. wwwPhomemain ८ आपस्तम्बधर्मसूत्रे (प.८)क.२३ विद्यया चेद् दोषनिहरणकर्मक्षयावश्यं भवतः, तत इदमयनका. यत्वाद् दोषनिहरणस्य नित्यानुवाद रूपमनर्थकम्, निहत्येति, न, प्रवृत्तकर्माक्षिप्तत्वाद् दोषाणाम्। द्विविधानि बनेकजन्मान्तरकृतानि कर्माणि-फलदानाय प्रवृत्तान्यप्रवृत्तानि च । यत्तु प्रवृत्त कर्म, तेनाक्षि ना दोषाः कर्तुः सुखदुःखादिफलदानाय, दोषाभावे फलारम्भकत्वा. नुपपत्तेः । न हि रागद्वेषादिशून्ये सुखदुःख प्रवृत्तिलब्धिः कदाचित् कस्यचिदिह दृश्यते । तस्मात् फलदानाय प्रवृत्तेन कर्मणाक्षिप्ता दोषाः प्रसङ्गेन प्राप्तबला यत्नतो निहर्तव्या । प्रवृत्याधिक्यहेतुत्वप्रसङ्गात् । अत एवेदमुक्तम्-दोषाणां तु निर्घातो योगमूले इह जीवित इति। मन्द. मध्यमोत्तमापेक्षत्वाच्च । ब्रह्मविदामपि न सर्वेषां समा बह्मप्रतिपत्तिः, विवेकातिशयदर्शनात कस्याचत । 'एष ब्रह्मविदां वरिष्ट' इति च श्रुतः सम्यग्दर्शनसम्पन्न' इति च स्मृतः। मन्दमध्यमब्रह्मविदपेक्षया त्याग. वैराग्येन्द्रियजयाविधेरर्थवत्त्वम् : उत्तम ब्रह्मविदां त्वर्थप्राप्तमेतत् सवमि. त्यनुवादमात्रम् । (१) रसोऽप्यस्य परं दृष्ट्वा निवर्तते, इति वचनात् गुणा तीत्तलक्षणवचनेभ्यश्च । प्रवृत्तकांक्षिप्तदोषात् तजानतचेष्टाभ्यश्च भ. वति विदुषोऽपि देहान्तरोत्पत्तिरिति चेद-मुक्तषुवत् प्रवृत्तकाक्षिप्त त्वाद् विद्वहोषचेष्टानां प्रवृत्त कर्मविभागनवोपक्षीणशक्तित्वात प्रयोजना न्ताराभावाच्च न जन्मान्तरारम्भकत्वमुपपद्यते । यद्यप्रवृत्तं कम, तत सत्यवावस्थमेव ब्रह्मविद्याहुताशनदग्धबीजशक्तित्वाचाल जन्मान्तरार. म्भाय, 'क्षीयन्ते चाऽस्य कमाणि'(२) 'ज्ञानाग्निः सर्वकमाणि'इत्यादिश्रु. तिस्मृतिभ्यः । अतः सिद्धा पण्डितस्य दोषनिहरणात क्षमप्राप्तिः ॥ ११॥

१. श्रीभ० गीता० २. ५९. २. श्रीभगव. ४. ३७.
05 अथ भूतदाहीयान्दोषानुदाहरिष्यामः

अथ भूतदाहीयान्दोषानुदाहरिष्यामः ४

▼

⑤

>
▼ Bühler

4. Now we will enumerate the faults which tend to destroy the creatures.

▼ हरदत्त-टीका

सूत्रम्⑥

अथ भूतदाहीयान्दोषानुदाहरिष्यामः ॥ १२ ॥ ४॥

टिप्पनी⑥

भूतानां दाहो भूतदाहः तस्मै हिताः भृतदाहीयाः तस्मै हितमिति छः।

05 क्रोधो हर्षो

क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥ १३ ॥ ५ ॥

▼

⑤

>

▼ Bühler

5. (These are) anger, exultation, grumbling, covetousness, perplexity, doing injury, hypocrisy, lying, gluttony, calumny, envy, lust, secret hatred, neglect to keep the senses in subjection, neglect to concentrate the mind. The eradication of these (faults) takes place through the means of (salvation called) Yoga.

▼ हरदत्त-टीका

सूत्रम्⑥

क्रोधो हर्षो रोषो लोभो मोहो दम्भो द्रोहो मृषोद्यमत्याशपरीवादावसूया काममन्यू अनात्म्यमयोगस्तेषां योगमूलो निर्घातः ॥ १३ ॥ ५ ॥

टिप्पनी⑥

7ताडनाक्रोशादिहेतुकोऽन्तःकरणविक्षोभः स्वेदकम्पादिलिङ्गः क्रोधः । हर्षः इष्टलाभाच्चेतस उद्रेको रोमाञ्चादिलिङ्गः । रोषः क्रोधस्यैव कियानपि भेदो मित्रादिषु प्रतिकूलेषु मनसो वैलोम्यमात्रकार्यकरः। लोभो द्रव्यसङ्गः, यो धर्मव्ययमपि रुणद्धि । मोहः कार्याकार्ययोरविवेकः। स च प्रायेण क्रोधादिजन्योऽपि पृथगुपदिश्यते कदाचित्तदभावेऽपि सम्भवतीति । दम्भो धार्मिकत्व8प्रकाशनेन लोकवञ्चनम् । द्रोहोऽपकारः। मृषोद्यमनृतवादः । अत्याशोऽत्यशनम् । परीवादः परदोषाभिधानम् । असूया परगुणे9ष्वक्षमा । कामः स्त्रीसंसर्गः । मन्युः गूढो द्वेषः । अनात्म्य अजितेन्द्रियत्वं जिह्वाचापलादि । अयोगो विक्षिप्तचित्तता । एते भूतदाहीया दोषाः । तेषां योगमूलो निर्घातः ॥५॥

06 अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ६

▼

⑤

>
▼ Bühler

6. Freedom from anger, from exultation, from grumbling, from covetousness, from perplexity, from hypocrisy (and) hurtfulness; truthfulness, moderation in eating, silencing a slander, freedom from envy, self-denying liberality, avoiding to accept gifts, uprightness, affability, extinction of the passions, subjection of the senses, peace with all created

beings, concentration (of the mind on the contemplation of the Ātman), regulation of one's conduct according to that of the Āryas, peacefulness and contentedness;--these (good qualities) have been settled by the agreement (of the wise) for all (the four) orders; he who, according to the precepts of the sacred law, practises these, enters the universal soul.

▼ हरदत्त-टीका

सूत्रम्⑥

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन् विधिना 10सार्वगामी भवति ॥ १४ ॥ ६॥

प्रस्तावः⑥

के पुनस्ते योगा इति, उच्यते —

टिप्पनी⑥

के पुनस्ते योगाः ? तानाह—
एते चाऽक्रोधादयोऽपि भावरूपाः न क्रोधाद्यभावमात्रम् , क्रोधादिनिर्घातहेतुतयोपदेशात् । के पुनस्ते ? अक्रोधः, क्रोधादिषु प्रसक्तेष्वपि मा कार्षमिति सङ्कल्पः। अहर्षः, इष्टलाभालाभेषु चेतस ऐकरूप्यम् । अरोषः मित्रादिषु प्रतिकूलेष्वपि मनोविकाराभावः । अलोभः सन्तोषोऽलम्बुद्धिः। अमोहोऽवधानम् । अदम्भो धर्मानुष्ठानम् । अद्रोहः परेष्वपकारिष्वप्यनपकारः । अनसूया परगुणेष्वभिमोदनम् । सत्यवचनं यथादृष्टार्थवादित्वम् । सम्विभागः आत्मान11मुपरुध्याऽप्यग्राद्दिदानम् । त्यागोऽपरिप्रहः । आर्जवं मनोवाक्कायानामेकरूपत्वम् । मार्दवं सूपगम्यता। शमः मन्युपरित्यागः । दमः12इन्द्रियजयः । एताभ्यामेव गतत्वात् पूर्वस्वस्मिन् क्रमे अकामः, अमन्युः, आत्मवत्वमिति नोपदिष्टम् । सर्वभूतैरविरोधः । सर्वग्रहणं क्षुद्रैरविरोधार्थम् । योगः ऐकाप्यम् । आर्याणां भावः आर्यं शिष्टाचारानुपालनम् । आनृशंसं आनृशंस्यं

व्यवहारवचनादौ प्रसक्तनैष्ठुर्यस्य वर्जनम् । तुष्टिरनिर्वेदः । समयो ब्यवस्था । सा च प्रकरणाद्धर्मज्ञानाम् । पदं विषयः । एते अक्रोधादयः सर्वेषामाश्रमाणां सेव्याः, न केवलं योगिनामेवेति धर्मज्ञानां समय इत्यर्थः । एते हि भाव्यमानाः क्रोधादीनू समूलघातं घ्नन्ति । अतश्च तान्यनुतिष्ठन् विधिना सार्वगामी भवति । तान्यक्रोधादीनि तुष्ट्यन्तानि । विधिना यथाशास्त्रम् । अनुतिष्ठन् सार्वगामी सर्वस्मै हितः सार्वः आत्मा तं गच्छति प्राप्नोति। 'विधिने'ति वचनात्13प्राणिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेत् ।' इत्यादिके विषये अनृतवचनादावपि न दोष इति ॥ ६ ॥

इति श्रीहरदत्तविरचितायामापस्तम्बधर्मसत्रवृत्तावुज्वलायां त्रयोविंशी कण्डिका ॥ २३ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामु ज्ज्वलायां प्रथमप्रश्नेऽष्टमः पटलः ॥८॥ .

▼ शङ्कराचार्य-विवरणम्

अक्रोधोऽहर्षोऽरोषोऽलोभोऽमोहोऽदम्भोऽद्रोहः सत्यवचनमनत्याशोऽपैशुनमनसूया संविभागस्त्याग आर्जवं मार्दवं शमो दमः सर्वभूतैरविरोधो योग आर्यमानृशंसं तुष्टिरिति सर्वाश्रमाणां समयपदानि तान्यनुतिष्ठन्विधिना सार्वगामी भवति ६

विवरणम् । __ अक्रोधोऽहर्षः इत्येवमाद्या अयोगविपरीताः । अतस्ते समाधिलक्षण स्वाद योगा। सविभागः आत्मनो यात्रालाधनस्याऽर्थिभ्यः संविभजनम् । स्यागः दृष्टादृष्टेष्टभोगानां शक्तितः परित्यजम् , तत्साधनानां च । आर्जवम् ऋजुता, अदुष्टाकलनपूर्विका वाङ्मनाकायानां प्रवृतिः। मार्दव मृदुत्वम् । शमोऽन्तःकरणोपशमः। दमो बाह्यकरणापेशमः। इदमन्यद् योगलक्षणं संक्षेपत उच्यते-सर्वभूताविरोधो योगः, विरोघे हि भूतानां पीडा, तदभावेऽपीडा । स एव सर्वभूतापीडालक्षणो योगः। आर्यम् आर्याणां भावः अक्षुद्रता । आनृशंसम् आनृशंस्यम् , अक्रौर्यम् । तुष्टिः लब्धव्यस्याऽलाभेऽपि चेतसा प्रसन्नतयाऽवस्थानं लाभ इव । सर्व भताविरोलक्षणांहिला परिव्राजकस्यैव सम्भवतीत्यायर्यादीनां त्रया. णामन्येषां चाविरुद्धानां सर्वाश्रमान प्रति प्राप्तिरितीतिशब्दसाम द्‚ि इतिशब्दस्य च प्रकारवचनत्वादार्यादीनीत्थंप्रकाराणि सर्वाश्र मान् प्रति गमयति सर्वाश्रमाणां समयपदानोति । समयस्थानानीत्ये तत् । अवश्यानुष्ठेयानीत्यर्थः । तान्येतानि यथोक्तान्यनुतिष्ठन् विधिना सर्वगामी सर्वगमनशीलः, शानाभिव्यक्तिक्रमेण । भवति मुच्यते इत्यर्थः ।। इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीशङ्करभगवत्पादाचार्यस्य कृतिषु आपस्तम्बीयधर्मशास्त्राध्यात्मपटलविवरणम् ॥

इति अष्टमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

4. आप० ध० १.३०.८.↩

5. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

6. आप० ध० १.३०.८.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

12. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

13. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

၀၉①

२४①

01 क्षत्रियं हत्वा गवां④

क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् १

▼

⑤

>
▼ Bühler

1. He who has killed a Kṣatriya shall give a thousand cows (to Brāhmaṇas) for the expiation of his sin. 1

▼ हरदत्त-टीका

सूत्रम्⑥

क्षत्रियं हत्वा गवां सहस्रं वैरयातनार्थं दद्यात् ॥ १ ॥

टिप्पनी⑥

क्षत्रियं हत्वा गवां सहस्रं ब्राह्मणेभ्यो दद्यात्। किमर्थम् ? वैरयातनार्थं वैरं पापं तस्य यातनं निहरणं तदर्थम् "ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थ"(२४.४)इति वक्ष्यति । तेन प्रायश्चित्तरूपमिदं दानम्। प्रायश्चित्तं च पापक्षयार्थम् । तत्किमर्थं वैरयातनार्थमित्युच्यते ? केचिन्मन्यन्ते नाऽभुक्तं क्षीयते कर्म पुण्यमपुण्यं च । प्रायश्चित्तं तु नैमित्तिकं कर्मान्तरं 2यथा गृहदाहादौ क्षामवत्यादय इति । तान्निराकर्तुमिदमुक्तम् । श्रौतेऽप्युक्तं-3दोषनिघातार्थानि भवन्ती'ति । अपर आह-यो येन

हन्यते स हतो म्रियमाणस्तस्मिन्वैरं करोति-अपि नामाऽहमेनं जन्मान्तरेऽपि वध्यासमिति । तस्य वैरस्य यातनार्थमिदमिति प्रायश्चित्तार्थत्वमपि वक्ष्यमाणेन सिद्धमिति ॥ १॥
02 शतं वैश्ये

शतं वैश्ये २

▼

⑤

>
▼ Bühler

2. (He shall give) a hundred cows for a Vaiśya, 4

▼ हरदत्त-टीका

सूत्रम्⑥

शतं वैश्ये ॥२॥

टिप्पनी⑥

वैश्ये हते गवां शतं दद्यात् ॥ २॥

03 दश शूद्रे

दश शूद्रे ३

▼

⑤

>
▼ Bühler

3. Ten for a Śūdra, 5

▼ हरदत्त-टीका

सूत्रम्⑥

दश शूद्रे ॥३॥

टिप्पनी⑥

शूद्रे हते दश दद्यात् । गा इति प्रकरणागम्यते ॥३॥

04 ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थः

ऋषभश्चात्राधिकः सर्वत्र प्रायश्चित्तार्थः ४

▼

⑤

>
▼ Bühler

4. And in every one (of these cases) one bull (must be given) in excess (of the number of cows) for the sake of expiation.

▼ हरदत्त-टीका

सूत्रम्⑥

ऋषभश्चाऽत्राधिकः सर्वत्र प्रायश्चित्तार्थः॥ ४॥

टिप्पनी⑥

सर्वेष्वेतेषु निमित्तेषु ऋषभोऽप्यधिको देयः। न केवलं गा एव । इदं प्रायश्चित्तत्रयं मानवेन समानविषयम् । यथाऽऽह—

6अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः ।
ऋषभैकसहस्रा गा दद्याच्छुद्ध्यर्थमात्मनः ॥
त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतम् ।
वलन् दूरतरे ग्रामाद्वृक्षमूलनिकेतनः ॥

एतदेव चरेदब्दं प्रायश्चित्तं द्विजोत्तमः।
प्रमाप्य वैश्यं वृत्तस्थ दद्याद्वैकशतं गवाम् ॥
एतदेव व्रतं कृत्स्नं षण्मासान्श्छूद्रहा चरेत् ।
ऋषभैकादशा वाऽपि दयाद्विप्राय गास्सिताः ॥ इति ॥४॥

05 स्त्रीषु चैतेषामेवम्

स्त्रीषु चैतेषामेवम् ५

▼

⑤

>
▼ Bühler

5. And if women of the (three castes mentioned have been slain) the same (composition must be paid).

▼ हरदत्त-टीका

सूत्रम्⑥

स्त्रीषु चैतेषामेवम् ॥ ५॥

टिप्पनी⑥

एतेषां क्षत्रियादीनां स्त्रीषु च हतासु एवमेव प्रायश्चित्तं यथा पुरुषेषु॥५॥

06 पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं

पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाभिशस्तः ६

▼

⑤

>
▼ Bühler

6. He who has slain a man belonging to the two (first-mentioned castes) who has studied the Veda, or had been initiated for the performance of a Soma-sacrifice, becomes an Abhiśasta. 7

▼ हरदत्त-टीका

सूत्रम्⑥

पूर्वयोर्वर्णयोर्वेदाध्यायं हत्वा सवनगतं वाऽभिशस्तः ॥६॥

टिप्पनी⑥

उक्तेषु यौ पूर्वौ वर्णौ क्षत्रियवैश्यौ तयोर्यो वेदाध्यायः अधीतवेदः तं हत्वा अभिशस्तो भवति । अभिशस्त इति ब्रह्मघ्नोऽभिधानम् । सवनगतं वा, तयोरेव वर्णयोः यः सवनगतः सवनशब्देन न प्रातस्सवनादीन्युच्यन्ते, नापि यागमात्रम् । किं तर्हि ? सोमयागः। तत्र यो दीक्षितः सवनगतः 'ब्राह्मणो वा एष जायते यो दीक्षित' इति दर्शनात्। तं च हत्वाऽभिशस्तो भवति । पूर्वयोर्वर्णयोरिति किम् ? ब्राह्मणे मा भूत् । इष्यते ब्राह्मणे। वक्ष्यति च 'ब्राह्मणमात्रं 'चे'(२४.७.)ति। एवं तर्हि शूद्रे मा भूत् । न शुद्रो वेदाध्यायः सवनगतो वा भवति । इदं तर्हि प्रयोजनं पूर्वयोर्वर्णयोरेव यथा स्यात्तयोरेव यावनुलोमी8 करणाम्बष्ठौ तयोर्मा भूदिति । तेनान्ये वर्णधर्मा अनुलोमानामपि भवन्ति ॥ ६ ॥

07 ब्राह्मणमात्रञ् च

ब्राह्मणमात्रं च ७

▼

⑤

>
▼ Bühler

7. And (he is called an Abhiśasta) who has slain a man belonging merely to the Brāhmaṇa caste (though he has not studied the Veda or been initiated for a Soma-sacrifice),

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मणमात्रं च ॥ ७ ॥

टिप्पनी⑥

हत्वाऽभिशस्तो भवति । मात्रग्रहणान्नाऽभिजनविद्यासंस्काराद्यपेक्षा ॥

08 गर्भञ् च तस्याविज्ञातम्

गर्भं च तस्याविज्ञातम् ८

▼

⑤

>

▼ Bühler

8. Likewise he who has destroyed an embryo of a (Brāhmaṇa, even though its sex be) undistinguishable,

▼ हरदत्त-टीका

सूत्रम्⑥

गर्भ च तस्याऽविज्ञातम् ॥ ८॥

टिप्पनी⑥

तस्य ब्राह्मणमात्रस्य । गर्भं च स्त्रीपुन्नपुंसकभेदेनाऽविज्ञातम् । हत्वाभिशस्तो भवति ॥८॥

09 आत्रेयीञ् च स्त्रियम्

आत्रेयीं *(=ऋतुस्नाताम्)* च स्त्रियम् ९

▼

⑤

>
▼ Bühler

9. Or a woman (of the Brāhmaṇa caste) during her courses. 9

▼ हरदत्त-टीका

सूत्रम्⑥

आत्रेयीं च स्त्रियम् ॥९॥

टिप्पनी⑥

10 'ऋतुस्नातामात्रेयीमाहु'रिति वसिष्ठः । तस्येति वर्तते । आत्रेयीं च ब्राह्मणनस्त्रियं हत्वाऽभिशस्तो भवति । ब्रह्महा भवति । सम्भवत्यस्यां ब्राह्मणगर्भ इति । अत्रिगोत्रजा आत्रेयीत्यन्ये ॥ ९॥

10 तस्य निर्वेषः

तस्य निर्वेषः *(=प्रायश्चित्तम्)* १०

▼

⑤

>
▼ Bühler

10. (Now follows) the penance for him (who is an Abhiśasta).

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य निर्वेषः ॥ १० ॥

टिप्पनी⑥

तस्य सर्वप्रकाराभिशस्तस्य निर्वेषः प्रायश्चित्तं वक्ष्यते ॥१०॥

11 अरण्ये कुटिङ् कृत्वा

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽर्धशाणीपक्षमधोनाभ्युपरिजान्वाच्छाद्य ११

▼

⑤

>
▼ Bühler

11. He (himself) shall erect a hut in the forest, restrain his speech, carry (on his stick) the skull (of the person slain) like a flag, and cover the space from his navel to his knees with a quarter of a piece of hempen cloth. 11

▼ हरदत्त-टीका

सूत्रम्⑥

अरण्ये कुटिं कृत्वा वाग्यतः शवशिरध्वजोऽधशाणोपक्षमधोनाभ्युपरिजान्वाच्छाद्य ॥ १ ॥

टिप्पनी⑥

कृत्वेति वचनान्न परकृता कुटी ग्राह्या । वाक् यता नियता येन स वाग्यतः वाचयमः। आहिताग्न्यादिषु दर्शनात् निष्ठान्तस्य परनिपातः। शवशिरः ध्वजो यस्य स शवशिरोध्वजः । सकारलोपश्छान्दसः। स्वव्यापादितस्य शिरो ध्वजदण्डस्याग्रे प्रोतं कृत्वेत्यर्थः यस्य कस्यचिच्छवस्येत्यन्ये । शणस्य विकारःशाणी पटी तस्या अर्धमर्धशाणी तस्याः पक्षमर्धशाणीपक्ष आयामविस्तारयोरुभयोरप्यर्धम् । अधो नाभि उपरिजानु च यथा भवति तथा तावन्तं प्रदेशमाच्छाद्य । सापेक्षत्वात् 'ग्रामे प्रतिष्ठेते'(२४.१४.)ति वक्ष्यमाणेन सम्बन्धः । मध्ये क्रियान्तरविधिः ॥११॥

12 तस्य पन्था अन्तरा

तस्य पन्था अन्तरा वर्त्मनी १२

▼

⑤

>
▼ Bühler

12. The path for him when he goes to a village, is the space between the tracks (of the wheels).

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य पन्था अन्तरा वर्मनी ॥ १२॥

टिप्पनी⑥

तस्य ग्रामं प्रविशतः वर्त्मनी अन्तरा शकटादेर्वत्मनोर्मध्ये पन्था वेदितव्यः । अपर आह- यत्र रथ्यादावुभयोः पार्श्वयोर्वर्त्मनी भवतः तत्र तयोर्मध्येन सूकरादिपथेन सञ्चरेदिति ॥ १२ ॥

13 दृष्ट्वा चान्यमुत्क्रामेत्

दृष्ट्वा चान्यमुत्क्रामेत् १३

▼

⑤

>
▼ Bühler

13. And if he sees another (Ārya), he shall step out of the road (to the distance of two yards).

▼ हरदत्त-टीका

सूत्रम्⑥

दृष्ट्वा चाऽन्यमुत्क्रामेत् ॥ १३ ॥

टिप्पनी⑥

अन्यमार्यं दृष्ट्वा पथ उत्क्रामेत् । तत्र कौटिल्यः12 'पञ्चारत्नयो रथपथश्चत्वारो हस्तिपथः द्वौ क्षुद्रपशुमनुष्याणा'मिति । तेन मनुष्येषु द्वौ हस्तावुत्क्रामेदिति ॥ १३॥

14 खण्डेन लोहितकेन शरावेण

खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत १४

▼

⑤

>

▼ Bühler

14. He shall go to the village, carrying a broken tray of metal of an inferior quality.

▼ हरदत्त-टीका

सूत्रम्⑥

खण्डेन लोहितकेन शरावेण ग्रामे प्रतिष्ठेत ॥१४॥

टिप्पनी⑥

खर्परमात्रं खण्डम् । 13लोहितकमनाप्रीतम् । एवम्भूतं शरावं भिक्षा पात्रं गृहीत्वा ग्रामे प्रतिष्ठेत । ग्रामं गच्छेत् ॥ १४ ॥

15 कोऽभिशस्ताय भिक्षामिति सप्तागाराणि

कोऽभिशस्ताय भिक्षामिति सप्तागाराणि चरेत् १५

▼

⑤

>

▼ Bühler

15. He may go to seven houses only, (crying,) 'Who will give alms to an Abhiśasta?'

▼ हरदत्त-टीका

सूत्रम्⑥

कोऽभिशस्ताय भिक्षामिति14 सप्ताऽगारं चरेत् ॥१५॥

टिप्पनी⑥

15अभिशस्तो ब्रम्हहा । तस्मै मह्यं को धार्मिको भिक्षां ददातीति उच्चैर्ब्रुवाणः सप्ताऽगाराणि चरेत् । सप्तग्रहणमधिकनिवृत्यर्थम् । द्वित्रेष्वागारेषु यदि पर्याप्तं लभ्यते तदा तावत्येव ॥ १५ ॥

16 सा वृत्तिः

सा वृत्तिः १६

▼

⑤

>

▼ Bühler

16. That is (the way in which he must gain) his livelihood.

▼ हरदत्त-टीका

सूत्रम्⑥

सा वृत्तिः॥ १६॥

टिप्पनी⑥

सप्तस्वगारेषु या च यावती लभ्यते सैव वृत्तिः अपर्याप्ताऽपि ॥१६॥

17 अलब्धोपवासः

अलब्धोपवासः १७

▼

⑤

>
▼ Bühler

17. If he does not obtain anything (at the seven houses), he must fast.

▼ हरदत्त-टीका

सूत्रम्⑥

अलब्ध्वोपवासः ॥ १७ ॥

टिप्पनी⑥

यदि सप्तागारेषु न किञ्चिल्लभ्यते तदोपवास एव तस्मिन्नहनि ॥

18 गाश्च रक्षेत्

गाश्च रक्षेत् १८

▼

⑤

>
▼ Bühler

18. And (whilst performing this penance) he must tend cows.

▼ हरदत्त-टीका

सूत्रम्⑥

गाश्च रक्षेत् ॥१८॥

टिप्पनी⑥

एवं प्रायश्चित्तं कुर्वन्नहरहर्गाश्च रक्षेत् ॥ १८॥

19 तासान् निष्क्रमणप्रवेशने द्वितीयो

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः १९

▼

⑤

>

▼ Bühler

19. When they leave and enter the village, that is the second occasion (on which he may enter) the village.

▼ हरदत्त-टीका

सूत्रम्⑥

तासां निष्क्रमणप्रवेशने द्वितीयो ग्रामेऽर्थः ॥ १९ ॥

टिप्पनी⑥

तासां गवां निष्क्रमणसमये प्रवेशनसमये च द्वितीयो ग्रामेऽर्थः प्रयोजनम् । भिक्षार्थ प्रथममुक्तम् । नाऽन्यथा ग्रामं प्रविशेदित्युक्तं भवति ॥

20 द्वादश वर्षाणि चरित्वा

द्वादश वर्षाणि चरित्वा सिद्धः सद्भिः संप्रयोगः २०

▼

⑤

>

▼ Bühler

20. After having performed (this penance) for twelve years, he must perform) the ceremony known (by custom), through which he is re-admitted into the society of the good. 16

▼ हरदत्त-टीका

सूत्रम्⑥

द्वादश वर्षाणि17 चरित्वा सिद्धः सद्भिस्सम्प्रयोगः ॥२०॥

टिप्पनी⑥

एवं द्वादश वर्षाणि व्रतमेतच्चरित्वा सद्भिः सम्प्रयोगः कर्तव्यः । सद्भिः सह सम्प्रयुज्यते येन विधिना स कर्तव्यः। स शिष्टाचारे शास्त्रान्तरे च सिद्धः स उच्यते-कृतप्रायश्चित्तः स्वहस्ते यवसं गृहीत्वा गामाह्वयेत् । सा यद्यागत्य श्रद्दधाना भक्षयति तदा सम्यगनेन व्रतं चरितमिति जानीयात् , अन्यथा नेति ॥ २० ॥

21 आजिपथे वा कुटिम्कृत्वा

आजिपथे वा कुटिङ्कृत्वा ब्राह्मणगव्योपजिगीषंआणो वसेत्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः २१

▼

⑤

>
▼ Bühler

21. Or (after having performed the twelve years' penance), he may build a hut on the path of robbers, and live there, trying to take from them the cows of Brāhmaṇas. He is free (from his sin), when thrice he has been defeated by them, or when he has vanquished them. 18

▼ हरदत्त-टीका

सूत्रम्⑥

आजिपथे वा कुटिं कृत्वा ब्राह्मणगव्योऽपजिगीषमाणो वसेस्त्रिः प्रतिराद्धोऽपजित्य वा मुक्तः ॥ २१ ॥

टिप्पनी⑥

सङ्ग्रामेण जेतव्या दस्यवो येन पथा ग्रामं प्रविश्य गवादिकमपहृत्याऽपसरन्ति स आजिपथः । तस्मिन्वा कुटिं कृत्वा वसेत् । किं चिकीर्षन् ? ब्राह्मणगव्यः 19 'वा छन्दसी'ति पूर्वसवर्णाभावे यणादेशः। ब्राह्मणगवीरपजिगीषमाणः दस्यूनपजित्य प्रत्याहर्तुमिच्छन् । एष वसन् दस्युभिर्ह्रियमाणं गवादिकमुद्दिश्य तैर्युद्धं कुर्वन् त्रिः प्रतिराद्धः तैरपजितः अपजित्य वा तान् गवादिकं प्रत्याहृत्य ब्राह्मणेभ्यो दत्वा मुक्तो भवति तस्मादेनसः । द्वादशवार्षिके प्रवृत्तस्येदम् । एवमुत्तरमपि ॥ २१ ॥

22 आश्वमेधिकं वावभृथमवेत्य मुच्यते

आश्वमेधिकं वावभृथमवेत्य मुच्यते २२

▼

⑤

>
▼ Bühler

22. Or he is freed (from his sin), if (after the twelve years' penance) he bathes (with the priests) at the end of a horse-sacrifice. 20

▼ हरदत्त-टीका

सूत्रम्⑥

आश्वमेधिकं वाऽवभृथमवेत्य मुच्यते ॥ २२ ॥

टिप्पनी⑥

अथ वाऽश्वमेधावभृथे स्नात्वा मुच्यते ॥ २२ ॥

23 धर्मार्थसन्निपातेऽर्थग्राहिण एतदेव

धर्मार्थसंनिपातेऽर्थग्राहिण एतदेव २३

▼

⑤

>
▼ Bühler

23. This very same (penance is ordained) for him who, when his duty and love of gain come into conflict, chooses the gain. 21

▼ हरदत्त-टीका

सूत्रम्⑥

धर्मार्थसन्निपातेऽर्थग्राहिण एतदेव ॥ २३ ॥

टिप्पनी⑥

धर्मस्याऽग्निहोत्रादेः, अर्थस्य च कुड्यकरणादेः 22 युगपद्यत्र सन्निपातः तोभयानुग्रहासम्भवे धर्मलोपेन योऽर्थं गृह्णाति तस्याऽप्येतदेव प्रायश्चित्तम् । अथवा धर्मं हित्वाऽर्थहेतोः कौटसाक्ष्यादि करोति तद्विषयमेतत् । अत्र गौतमः—
23 'कौटसाक्ष्यं राजगामि पैशुनं गुरोरनृताभिशंसनं महापातकसमानी'ति । मनुरपि—

24 अनृतं च समुत्कर्षे राजगामि च पैशुनम् ॥
गुरोश्चाऽलीकनिर्बन्धः समानि ब्रह्महत्यया' ॥ इति ॥ २३ ॥

24 गुरुं हत्वा श्रोत्रियं

गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छवासाच्चरेत् २४

▼

⑤

>
▼ Bühler

24. If he has slain a Guru or a Brāhmaṇa, who has studied the Veda and finished the ceremonies of a Soma-sacrifice, he shall live according to this very same rule until his last breath. 25

▼ हरदत्त-टीका

सूत्रम्⑥

गुरुं हत्वा श्रोत्रियं वा कर्मसमासमेतेनैव विधिनोत्तमादुच्छवासाच्चरेत् ॥ २४ ॥

टिप्पनी⑥

गुरुः पित्राचार्यादिः । श्रोत्रियोऽधीतवेदः । स यदि कर्मसमाप्तो भवति सोमान्तानि कर्माणि समाप्तानि यस्य स कर्मसमाप्तः । तो हत्वा एतेनैवाऽनन्तरोक्तेन विधिना ओत्तमादुच्छवासात् । उत्तम उच्छवासःप्राणविनियोगः । आ तस्माच्चरेत् ॥ २४॥

25 नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्मषन्

नास्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते २५

▼

⑤

>

▼ Bühler

25. He cannot be purified in this life. But his sin is removed (after death). 26

▼ हरदत्त-टीका

सूत्रम्⑥

नास्याऽस्मिंल्लोके प्रत्यापत्तिर्विद्यते ॥ २५ ॥

टिप्पनी⑥

अश्वमेधावभृथादिषु सम्भवत्स्वपि अस्याऽस्मिंल्लोके अस्मिन् जीविते प्रत्यापत्तिः शुद्धिर्नास्तीत्यर्थः ॥ २५ ॥

सूत्रम्⑥

कल्मषं तु निर्हण्यते ॥ २६ ॥

टिप्पनी⑥

मृतस्य कल्मषं निर्हण्यते । 27तेन पुत्रादिभिः संस्कारादिः कर्तव्य इति भावः । अन्ये तु पूर्वं सूत्रं तन्निवृत्त्यर्थं मन्यन्ते । प्रत्यापत्तिः पुत्रादिभिः पित्रादिभावेन सम्बन्ध इति ॥२६॥

इति हरदत्तविरचितायामापस्तम्बसूत्रवृत्तौ चतुर्विंशी कडिका ॥२४॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
5. Manu II, 35.↩
6. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
7. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
11. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the

commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

13. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

14. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

15. आप० ध० १.३०.८.↩

16. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

17. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

18. Manu II, 69; Yājñ. I, 15.↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. Manu II, 144.↩

21. Manu II, 146-148.↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

24. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

25. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

26. Manu II, 147.↩

27. आप० ध० १.३०.८.↩

२५①

01 गुरुतल्पगामी सवृषणं शिश्नम्④

गुरुतल्पगामी सवृषणं शिश्नं परिवास्याञ्जलावाधाय दक्षिणां दिशमनावृत्तिं व्रजेत् १

▼

⑤

>
▼ Bühler

1. He who has had connection with a Guru's wife shall cut off his organ together with the testicles, take them into his joined hands and walk towards the south without stopping, until he falls down dead. 1

▼ हरदत्त-टीका

सूत्रम्⑥

गुरुतल्पगामी सवृषणं शिश्न परिवास्याऽञ्जलावाधाय दक्षिणां दिशमनावृत्ति व्रजेत् ॥ १॥

टिप्पनी⑥

गुरुरत्र पिता, नाऽऽचार्यादिः। तल्पशब्देन शयनवाचिना भार्या लक्ष्यते । सा च साक्षाज्जननी2 न तत्सपत्नी। तां गत्वा सवृषणं साण्डं शिश्नं परिवास्य क्षुरादिना छित्वाऽञ्जलावाधाय दक्षिणां दिशं व्रजेत् । अनावृत्तिम् आवृत्तिर्न क्रियते यस्यां तां दिशमनावर्तमानो गच्छेत् । अथ ये3

दक्षिणस्योदधेस्तीरे वसन्ति तेऽपि यावद्देशं गत्वा उदधिमेव प्रवेक्ष्यन्ति । मरणं ह्यत्र विवक्षितम् । अत्र सर्वतः—

4पितृदारान् समारुह्य मातृवर्जं नराधमः।
भगिनीं मातुराप्तां वा स्वसारं वाऽन्यमातृजाम् ॥
एता गत्वा स्त्रियो मोहात5 तप्तकृच्छ्रं समाचरेत् ॥ इति ।
नारदस्तु—
'माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
6पितृव्यपत्नी शिष्यस्त्री भगिनी तत्सखी स्नुषा ।
दुहिताऽऽचार्यभार्या च सगोत्रा शरणागता ।
राशी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या । आसामन्यतमां गत्वा गुरुतल्पग उच्यते ।
शिश्नस्योत्कृन्तनं तत्र नाऽन्यो दण्डो विधीयते ॥ इति ॥ १ ॥
02 ज्वलितां वा सूर्मिम्

ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुयात् २

▼

⑤

>
▼ Bühler

2. Or he may die embracing a heated metal image of a woman. 7

▼ हरदत्त-टीका

सूत्रम्⑥

ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुयात् ॥ २॥

टिप्पनी⑥

आयसी ताम्रमयी वा अन्तस्सुषिरा स्त्रीप्रकृतिरत्र सूर्मिः। तां ज्वलितामग्नौ तप्ताम् । परिष्वज्य समाप्नुयात् समाप्तिं गच्छेत् म्रियेत ॥२॥

03 सुरापोऽग्निस्पर्शां सुराम् पिबेत्

सुरापोऽग्निस्पर्शां *(क्वतिथां)* सुरां पिबेत् ३

▼

⑤

>

▼ Bühler

3. A drinker of spirituous liquor shall drink exceedingly hot liquor so that he dies. 8

▼ हरदत्त-टीका

सूत्रम्⑥

सुरापोऽग्निस्पर्शां सुरां पिबेत् ॥ ३ ॥

टिप्पनी⑥

'गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।'
तस्याः पाता सुरापः । सः अग्निस्पर्शां 9अग्निकथितां सुरां पिबेत् । तया दग्धकायः शुद्ध्यति ॥ ३॥

04 स्तेनः प्रकीर्णकेशोऽए मुसलमादाय

स्तेनः प्रकीर्णकेशोऽए मुसलमादाय राजानं गत्वा कर्माचक्षीत । तेनैनं हन्याद्वधे मोक्षः ४

▼

⑤

>

▼ Bühler

4. A thief shall go to the king with flying hair, carrying a club on his shoulder, and tell him his deed. He (the king) shall give him a blow with that (club). If the thief dies, his sin is expiated. 10

▼ हरदत्त-टीका

सूत्रम्⑥

स्तेनः प्रकीर्णकेशोंऽसे मुसलमाधाय राजानं गत्वा कर्माऽऽचक्षीत । तेनैनं हन्याधे मोक्षः ॥ ४॥

टिप्पनी⑥

स्तनो ब्राह्मणस्वर्णहारी। अंसे स्वे स्कन्धे । मुसलमाधाय आयसं खादिरं वा धारयन् । राजानं गवा कर्माऽऽचक्षीत-एवंकर्माऽस्मि, शाधि मामिति। स तेन मुसलेन एनं स्तेनं हन्यात् , यथा मृतो भवति । 11वधेन स्तेयात् मोक्षो भवति ॥ ४॥

05 अनुज्ञातेऽनुज्ञातारमेनः

अनुज्ञातेऽनुज्ञातारमेनः ५

▼

⑤

>
▼ Bühler

5. If he is forgiven (by the king), the guilt falls upon him who forgives him, 12

▼ हरदत्त-टीका

सूत्रम्⑥

अनुज्ञातेऽनुज्ञातारमेनः स्पृशति ॥५॥

टिप्पनी⑥

यदि राजा दयादिना तमनुजानीयात् गच्छेति, तदा तमनुज्ञातारं राजानमेव तदेनः स्पृशति ॥ ५॥

06 अग्निं वा प्रविशेत्तीक्ष्णं

अग्निं वा प्रविशेत्तीक्ष्णं वा तप आयच्छेत् ६

▼

⑤

>
▼ Bühler

6. Or he may throw himself into the fire, or perform repeatedly severe austerities, 13

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निं वा प्रविशेत ॥६॥

टिप्पनी⑥

उत्तरमृजु ॥६॥

सूत्रम्⑥

तीक्ष्णं वा तप आयच्छेत् ॥ ७ ॥

तीक्ष्णं तपः महापराकादि । तद्वा आयच्छेत् आवर्तयेत् ॥७॥

07 भक्तापचयेन वात्मानं समाप्नुयात्

भक्तापचयेन वात्मानं समाप्नुयात् ७

▼

⑤

>
▼ Bühler

7. Or he may kill himself by diminishing daily his portion of food,

▼ हरदत्त-टीका

सूत्रम्⑥

भक्तापचयेन वाऽऽत्मानं समाप्नुयात् ॥८॥

टिप्पनी⑥

भक्तमन्नम् । तस्याऽपचयो ह्रासः। प्रथमे दिने यावन्तो ग्रासाः ते एकेन न्यूना द्वितीये । एवं तृतीयादिष्वपि आ एकस्माद् ग्रासात् । तत्रापि यदि न समाप्तिः ततस्तत्रैव ग्रासपरिमाणापचयः कर्तव्यः । एवं भक्तापचयेनाऽऽत्मानं समाप्नुयात् समापयेत् ॥

08 कृच्छ्रसंवत्सरं वा चरेत्

कृच्छ्रसंवत्सरं वा चरेत् ८

▼

⑤

>
▼ Bühler

8. Or he may perform Kṛcchra penances (uninterruptedly) for one year. 14

▼ हरदत्त-टीका

सूत्रम्⑥

कृच्छ्रसंवत्सरं वा चरेत् ॥ ९॥

टिप्पनी⑥

अथ वा संवत्सरमेकं नैरन्तर्येण कृच्छ्रांश्चरेत् । एषामेनस्सु गुरुषु गुरूणि, लघुषु लघूनीति व्यवस्था ॥ ९॥

09 अथाप्युदाहरन्ति स्तेयङ् कृत्वा

अथाप्युदाहरन्ति । स्तेयं कृत्वा सुरां पीत्वा गुरुदारं च गत्वा ब्रह्महत्यामकृत्वा चतुर्थकाला मितभोजनाः स्युरपोऽभ्यवेयुः सवनानुकल्पम् ९

▼

⑤

>
▼ Bühler

9. Now they quote also (the following verse): 15

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽप्युदाहरन्ति ॥ १० ॥

टिप्पनी⑥

अस्मिन्नेव विषये पुराणश्लोकमप्युदाहरन्तीत्यर्थः ॥ १०॥

10 स्थानासनाभ्यां विहरन्त एते

स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरप पापं नुन्दते १०

▼

⑤

>
▼ Bühler

10. Those who have committed a theft (of gold), drunk spirituous liquor, or had connection with a Guru's wife, but not those who have slain a Brāhmaṇa, shall eat every fourth meal-time a little food, bathe at the times of the three libations (morning, noon, and evening), passing the day standing and the night sitting. After the lapse of three years they throw off their guilt.

▼ हरदत्त-टीका

सूत्रम्⑥

स्तेयं कृत्वा सुरां पीत्वा गुरुदारं च गत्वा ब्रह्महत्यामकृत्वा ।
चतुर्थकाला मितभोजिनः स्यु16रपोऽभ्यवेयुः सवनानुकल्पम् ।
स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैरप पापं नुदन्ते ॥ ११ ॥

टिप्पनी⑥

ब्रह्महत्याव्यतिरिक्तानि स्तेयादीनि कृत्वा चतुर्थकालाश्चतुर्थो भोजनकालो येषाम् । यथा- अद्य दिवा भुङ्क्ते श्वो नक्तमिति, ते तथोक्ताः। तथापि मितभोजिनः न मृष्टाशिनः। 17अपोऽभ्यवेयुः भूमिगतास्वप्सु स्नानं कुर्युः । सवनानुकल्पं, यथा सवनानि प्रातस्सवनादीन्यनुक्लृप्तानि अनुसृतान्यनुष्ठितानि भवन्ति तथा18 त्रिषवणमित्यर्थः । तिष्ठेयुरहनि, रात्रावासीरन् । एवं स्थानासनाभ्यां विहरन्तः कालक्षेपं कुर्वन्तः। एते त्रिभिर्वर्षैस्तत्पापमपनुदन्ते ॥ ११ ॥

11 प्रथमं वर्णम् परिहाप्य

प्रथमं वर्णं परिहाप्य प्रथमं वर्णं हत्वा संग्रामं गत्वावतिष्ठेत । तत्रैनं हन्युः ११

▼

⑤

>
▼ Bühler

11. (A man of any caste) excepting the first, who has slain a man of the first caste, shall go on a battle-field and place himself (between the two hostile armies). There they shall kill him (and thereby he becomes pure). 19

▼ हरदत्त-टीका

सूत्रम्⑥

प्रथमं वर्णं परिहाप्य प्रथमं वर्णं हत्वा सङ्ग्रामं गत्वाऽवतिष्ठेत तत्रैनं हन्युः ॥ १२ ॥

टिप्पनी⑥

प्रथमो वर्णो ब्राह्मणः । तं हत्वा सङ्ग्रामं गत्वा सेनयोर्मध्येऽवतिष्ठेत् । किं सर्वे ? नेत्याह-प्रथमं वर्णं परिहाप्य ब्राह्मणवर्जमितरो वर्णः क्षत्रियादिरित्यर्थः । तत्र स्थितमेनं ते सैनिका हन्युः, त एनं हतं विदध्युः । अघ्नन्त एनस्विनः स्युः, यथा राजा स्तेनम् । स मृतश्शुद्ध्यति ॥ १२ ॥

12 अपि वा लोमानि

अपि वा लोमानि त्वचं मांसमिति हावयित्वाग्निं प्रविशेत् १२

▼

⑤

>

▼ Bühler

12. Or such a sinner may tear from his body and make the priest offer as a burnt-offering his hair, skin, flesh, and the rest, and then throw himself into the fire. 20

▼ हरदत्त-टीका

सूत्रम्⑥

अपि वा लोमानि त्वचं मांसमिति हावयित्वाऽग्निं प्रविशेत् ॥ १३ ॥

टिप्पनी⑥

अनन्तरोक्त एव विषये प्रायश्चित्तान्तरम् । इतिशब्दो लोहितादीनामप्युपलक्षणार्थः। आत्मनो लोमादीन्युत्कृत्य पुरोहितेन हावयित्वा होमं कारयित्वा पश्चात् स्वयं तस्मिन्नग्नौ प्रविशेत् , मृतः शुद्धति । तत्राऽग्निमुपसमाधाय जुहुयात्21 "लोमानि मृत्योर्जुहोमि, लोमभिर्मृत्युं वासये स्वाहा । त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासये स्वाहा ॥ लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं वासये स्वाहा । स्नावानि मृत्योर्जुहोमि स्नावभिर्मृत्युं वासये स्वाहा। मांसानि मृत्योर्जुहोमि मांसैर्मृत्युं वासये स्वाहा । अस्थीनि मृत्योर्जुहोमि अस्थभिर्मृत्युं वासये स्वाहा । मज्जानं मृत्योर्जुहोमि मज्जभिमृत्युं वासये स्वाहा। मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासये स्वाहा" इत्येते मन्त्राः वसिष्ठेन पठिताः ॥१३॥

13 वायसप्रचलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलडेरिकाश्वहिंसायां शूद्र वत्प्रायश्चित्तम्

वायसप्रचलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलडेरिकाश्वहिंसायां शूद्र वत्प्रायश्चित्तम् १३

▼

⑤

>

▼ Bühler

13. If a crow, a chameleon, a peacock, a Brāhmaṇī duck, a swan, the vulture called Bhāsa, a frog, an ichneumon, a musk-rat, or a dog has been killed, then the same penance as for a Śūdra must be performed. 22

▼ हरदत्त-टीका

सूत्रम्⑥

वायसप्रचलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलडेरिकाश्वहिंसायां शूद्रवत्प्रायश्चित्तम् ॥ १४ ॥

टिप्पनी⑥

वायसः काकः । प्रचलाकः कामरूपी कृकलासः । बर्हिणो मयूरः । चक्रवाको दिवा मिथुनचर , रात्रौ विरही। हंसो मानसवासी। भासो गृध्रविशेषः। नकुलमण्डूकादयः प्रसिद्धाः । डेरिका गन्धमूषिका । एतेषां समुदितानां वधे शूद्रवत्प्रायश्चित्तम् । प्रत्येकं वधे तु कल्प्यम् । केचित् प्रत्येकं वध एतत्प्रायश्चित्तमित्याहुः ॥१४॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने पञ्चविंशी कण्डिका ॥ २५ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. आप० ध० १.३०.८.↩
6. मनु० स्मृ० २.६↩
7. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
8. Manu II, 35.↩
9. गौ० ध० १. १, २↩
10. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
12. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
13. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
14. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also

Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

15. Manu II, 69; Yājñ. I, 15.↩
16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
17. आप० ध० १. ३१. १.↩
18. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩
19. Manu II, 144.↩
20. Manu II, 146-148.↩
21. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
22. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

२६①

01 धेन्वनडुहोश्चाकारणात्④

धेन्वनडुहोश्चाकारणात् १

▼

⑤

>
▼ Bühler

1. (The same penance must be performed), if a milch-cow or a full-grown ox (has been slain), without a reason. 1

▼ हरदत्त-टीका

सूत्रम्⑥

धेन्वनडुहोश्चाऽकारणात् ॥१॥

टिप्पनी⑥

धेनुः पयस्विनी गौः । अनड्वान् अनोवहनयोग्यो बलीवर्दः । तयोः कारणमन्तरेण हिंसायां शूद्रवत्प्रायश्चित्तं कर्तव्यम् । कारणं कोपो मांसेच्छा वा । ताभ्यां विना, अबुद्धिपूर्वमित्यर्थः । बुद्धिपुर्वं तु2 'गाश्च वैश्यव'दित्यादि स्मृत्यन्तरे द्रष्टव्यम् ॥ १ ॥

02 धुर्यवाहप्रवृत्तौ चेतरेषाम् प्राणिनाम्

धुर्यवाहप्रवृत्तौ चेतरेषां प्राणिनाम् २

▼

⑤

>

▼ Bühler

2. And for other animals (which have no bones), if an ox-load of them has been killed. 3

▼ हरदत्त-टीका

सूत्रम्⑥

धुर्यवाहप्रवृत्तौ चेतरेषां प्राणिनाम् ॥ २॥

टिप्पनी⑥

धुरं वहतीति धुर्यो बलीवर्दः । तेन वोढुं शक्त्या धुर्यवाहाः। तावत्सु हिंसायाः प्रवृत्तौ सत्याम् । इतरेषां प्राणिनां केवलं प्राणा एव येषां नाऽस्थीनि तेषां हिंसायां शूद्रवत्प्रायश्चित्तमिति। अत्र गौतमः4 अस्थन्वतां सहस्रं हत्वा अनस्थिमतामनुडुद्धारे चेति ॥ २॥

03 अनाक्रोश्यमाक्रुश्यानृतं वोक्त्वा त्रिरात्रमक्षीराक्षारालवणभोजनम्

अनाक्रोश्यमाक्रुश्यानृतं वोक्त्वा त्रिरात्रमक्षीराक्षारालवणभोजनं ३

▼

⑤

>
▼ Bühler

3. He who abuses a person who (on account of his venerability) ought not to be abused, or speaks an untruth (regarding any small matter) must abstain for three days from milk, pungent condiments, and salt. 5

▼ हरदत्त-टीका

सूत्रम्⑥

अनाक्रोश्यमाक्रुश्याऽनृतं वोक्त्वा त्रिरात्रमक्षीराक्षारलवणभोजनम् ॥ ३ ॥

टिप्पनी⑥

येन यो न कथञ्चनाऽऽक्रोशमर्हति स पित्राचार्यादिरनाक्रोश्यः । तमाक्रुश्य अनृतं वोक्त्वा पातकोपातकवर्जं, त्रिरात्रं क्षीरादि भोजने वर्जयेत् । क्षीरग्रहणेन तद्विकाराणां दध्यादीनामपि6 ग्रहणमित्याहुः ॥३॥

04 शूद्रस्य सप्तरात्रमभोजनम्

शूद्रस्य सप्तरात्रमभोजनम् ४

▼

⑤

>
▼ Bühler

4. (If the same sins have been committed) by a Śūdra, he must fast for seven days.

▼ हरदत्त-टीका

सूत्रम्⑥

शुद्रस्य सप्तरात्रमभोजनम् ॥ ४ ॥

टिप्पनी⑥

शुद्रस्त्वनन्तरोक्तविषये सप्तरात्रमुपवसेत् ॥ ४॥

05 स्त्रीणाञ् चैवम्

स्त्रीणां चैवम् ५

▼

⑤

>

▼ Bühler

5. And the same (penances must also be performed) by women, (but not those which follow). 7

▼ हरदत्त-टीका

सूत्रम्⑥

स्त्रीणां चैवम् ॥५॥

टिप्पनी⑥

'क्षत्रियं हत्वे'(२४. १.)त्यादिषु अन्नवचनान्तेषु निमित्तेषु यानि प्रायश्चित्तान्युक्तानि तानि स्त्रीणामप्येवमेव कर्तव्यानि । एतत् 'चत्वारो वर्णा' इति जात्याभिधानादेव8 प्राप्तं सन्नियमार्थमुच्यते—अत ऊर्ध्वं पुरुषस्यैव न स्त्रीणामिति । अपर आह— जात्याभिधानादेव सिद्धे अतिदेशार्थं वचनम् । अतिदेशेषु चाऽर्धं प्राप्यते इति स्मार्तो न्यायः । तेन स्त्रीणामर्धप्राप्त्यर्थं वचनमिति । तथा च भार्गवः —

अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ॥' इति ॥५॥

06 येष्वाभिशस्त्यन् तेषामेकाङ्गञ् छित्त्वाप्राणहिंसायाम्

येष्वाभिशस्त्यं तेषामेकाङ्गं छित्त्वाप्राणहिंसायाम् *(ततः शूद्रहप्रायश्चित्तम्)* ६

▼

⑤

>

▼ Bühler

6. He who cuts off a limb of a person for whose murder he would become an Abhiśasta (must perform the penance prescribed for killing a Śūdra), if the life (of the person injured) has not been endangered.

▼ हरदत्त-टीका

सूत्रम्⑥

येष्वाभिशस्त्यं तेषामेकाङ्गं छित्वाऽप्राणिहिंसायाम् ॥६॥

टिप्पनी⑥

येषु हतेषु 'सवनगतं वाऽभिशस्त, (२४.९) इत्यादिना अभिशस्तत्वमुक्तं तेषामेकाङ्गं छित्वा शूद्रवत्प्रायश्चित्तं कुर्यात् । अप्राणिहिंसायां यदि छेदनेन तस्याङ्गस्य शक्ति9र्न हन्यते ॥६॥

07 अनार्यवपैशुनप्रतिषिद्धाऽचारेष्वभक्ष्याभोज्यापेयप्राशने शूद्रायाञ् च

अनार्यव-पैशुन-प्रतिषिद्धाऽचारेष्व्
अभक्ष्याऽभोज्याऽपेय-प्राशने
शूद्रायां च रेतः सिक्त्वा ऽयोनौ च
दोषवच् च कर्माभिसंधिपूर्वं कृत्वा ऽनभिसंधिपूर्वं वा
ऽब्लिङ्गाभिर् अप उपस्पृशेद्
वारुणीभिर् वान्यैर् वा पवित्रैर् यथा कर्माभ्यासः ७

▼

⑤

>
▼ Bühler

7. He who has been guilty of conduct unworthy of an Aryan, of calumniating others, of actions contrary to the rule of conduct, of eating or drinking things forbidden, of connection with a woman of the Śūdra caste, of an unnatural crime, of performing; magic rites with intent (to harm his enemies) or (of hurting others) unintentionally, shall bathe and sprinkle himself with water, reciting the (seven) verses addressed to the Waters, or the verses addressed to Varuṇa, or (other verses chosen from the Anuvāka, called) Pavitra, in proportion to the frequency with which the crime has been committed. 10

▼ हरदत्त-टीका

सूत्रम्⑥

11अनार्यवपैशुनप्रतिषिद्धाचारेश्वभक्ष्या भोज्यापेयप्राशने शूद्रायां च रेतस्सिक्त्वाऽयोनौ च दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वाऽब्लिङ्गाभिरप उपस्पृशेद्वारुणीभिर्वाऽन्यैर्वा पवित्रमन्त्रैर्यथा कर्माभ्यासः ॥७॥

टिप्पनी⑥

आर्याणां भाव आर्यम् । तद्यस्मिन्नाचारेऽस्ति तदार्यवम् । मत्वर्थीयो वप्रत्ययः। ततोऽन्यदनार्यवम् । असत्यभाषणादि । पैशुनं परदोषकथनं राजगामि प्रतिषिद्धाचारः 'ष्ठीवनमैथुनयोः कर्माऽसुवर्जये(३०.१९)दित्यादेरनुष्ठानम् । अभक्ष्यं वृथाकृसरादि । अभोज्यं केशकीटद्युपहतम् । अपेयम् अनिर्दशायाः गोः क्षीरादि । एतेषां प्राशने । शूद्रायां च वेश्याप्रभृतौ रेतः सिक्त्वा । अयोनी च जलादौ रेतः सिक्त्वा । दोषवच्च कर्म श्रौतमाभिचारिकम् । अभिसन्धिपूर्वं बुद्धिपूर्वं कृत्वा। अनभिसन्धिपूर्वं वा परपीडादिकरं कर्म कृत्वा । अब्लिङ्गाभिः12 "आपो हि ष्ठा मयोभुव' इति तिसृभि13 हिरण्यवर्णाश्शुचयः पावका' इति चतसृभिरप उपस्पृशेत् ।

तूष्णीं प्रथमं स्नात्वा पश्चादेतैर्मन्त्रैर्मार्जनं कुर्यात् । वारुणीभिर्वा 14 इमं मे वरुण, 'तत्त्वा यामि, 'त्वन्नो अग्ने' इत्येताभिरन्यैर्वा पवित्रैः 15पवमानस्सुवर्जन' इत्यतेनानुवाकेन 16 शुद्धवतीभिः 17 तरत्समन्दीयेन च । यथा कर्माभ्यासः कृतः 18 तावत्कृत्वोऽप उपस्पृशेत् । रहस्यप्रायश्चित्तमेतदित्याहुः ॥७॥

08 गर्दभेनावकीर्णी निर्ऋतिम् पाकयज्ञेन

गर्दभेनावकीर्णी निर्ऋतिं पाकयज्ञेन यजेत ८

▼

⑤

>

▼ Bühler

8. A (student) who has broken the vow of chastity, shall offer to Nirṛti an ass, according to the manner of the Pākayajña-rites. 19

▼ हरदत्त-टीका

सूत्रम्⑥

गर्दभेनाऽवकीर्णी निर्ऋतिं पाकयज्ञेन यजेत ॥ ८ ॥

टिप्पनी⑥

यो ब्रह्मचारी स्त्रियमुपेयात् सोऽवकीर्णी गर्दभेन निर्ऋतिं यजेत पाकयज्ञेन स्थालीपाकविधानेन । अत्र मनुः—

20 'अविकीर्णा तु काणेन गर्दभेन चतुष्पथे।
पाकयज्ञविधानेन, यजेत निर्ऋतिं निशि ॥' इति ।
हारीतस्तु—
"स्त्रीष्ववकीर्णी निर्ऋत्यै चतुष्पथे गर्दभं पशुमालभेत पाकयज्ञधर्मेण। भूमौ पशुपुरोडाशश्रपणमप्स्ववदानैः प्रचार्याऽऽज्यं जुहोति 'कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा । कामाभिद्रुग्धोस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहा' इति ॥ ८॥

09 तस्य शूद्रः प्राश्नीयात्

तस्य शूद्रः प्राश्नीयात् ९

▼

⑤

>

▼ Bühler

9. A Śūdra shall eat (the remainder) of that (offering).

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य शुद्रः प्राश्नीयात् ॥ ९ ॥

टिप्पनी⑥

तस्य गर्दभस्य सर्पिष्मद्धविरुच्छिष्टं शुद्रः प्राश्नीयात् 21 तेन सर्पिष्मता ब्राह्मण'मित्यस्याऽपवादः ॥९॥

10 मिथ्याअधीतप्रायश्चित्तम्

मिथ्याऽधीत-प्रायश्चित्तम् १०

▼

⑤

>

▼ Bühler

10. (Now follows) the penance for him who transgresses the rules of studentship.

▼ हरदत्त-टीका

सूत्रम्⑥

मिथ्याधीतप्रायश्चित्तम् ॥ १० ॥

टिप्पनी⑥

नियमातिक्रमेणाऽधीतं मिथ्याधीतम् । तद्दोषनिर्हरणाय प्रायश्चित्तं वक्ष्यते ॥१०॥

11 संवत्सरमाचार्यहिते वर्तमानो वाचं

संवत्सरम् आचार्य-हिते वर्तमानो
वाचं यच्छेत्
स्वाध्याय एवोत्सृजमानो वाचम्
आचार्य आचार्य-दारे भिक्षाचर्ये च ११

▼

⑤

>

▼ Bühler

11. He shall for a year serve his teacher silently, emitting speech only during the daily study (of the Veda, in announcing necessary business to) his teacher or his teacher's wife, and whilst collecting alms.

▼ हरदत्त-टीका

सूत्रम्⑥

सम्वत्सरमाचार्यहिते वर्तमानो वाचं यच्छेत्स्वाध्याय एवोत्सृजमानो वाचमाचार्य आचार्यदारे वा भिक्षाचर्ये च ॥११॥

टिप्पनी⑥

आचार्यहिते वर्तमानो वाचंयमः स्यात् । 22स्वाध्यायादिष्वेषु वाचमुत्सृजमानः । आचार्ये तं प्रति कार्यनिवेदने । एवमाचार्यदारे । भिक्षाचर्यं भिक्षाचरणम्। तत्र च 'भवति भिक्षां देही'ति । अस्मादेव ज्ञायते-असमावृत्तविषयमेतदिति ॥ ११ ॥

12 एवमन्येष्वपि दोषवत्स्वपतनीयेषूत्तराणि यानि

एवमन्येष्व् अपि दोषवत्स्व् अपतनीयेषूत्तराणि यानि वक्ष्यामः १२

▼

⑤

>
▼ Bühler

12. The following penances) which we are going to proclaim, may be performed for the same sin, and 23 also for other sinful acts, which do not cause loss of caste.

▼ हरदत्त-टीका

सूत्रम्⑥

एवमन्येष्वपि दोषवत्स्वपतनीयेषूत्तराणि यानि वक्ष्यामः ॥ १२ ॥

टिप्पनी⑥

यथा मिथ्याधीतस्येदं प्रायश्चित्तमेवमुत्तराणि यानि प्रायश्चित्तानि वक्ष्यामः तान्यन्येष्वपि । अपिशब्दान्मिथ्याधीतेऽपि । दोषवत्स्वपतनीयेषु पतनीयव्यतिरिक्तेषु कर्मसु येष्वाहत्य प्रायश्चित्तं नोक्तं तद्विषयाणि द्रष्टव्यानि ॥ १२॥

13 काममन्युभ्यां वा जुहुयात्कामोऽकार्षीन्मन्युरकार्षीदिति

काम-मन्युभ्यां वा जुहुयात् -
कामोऽकार्षीन् मन्युर् अकार्षीद् इति जपेद् वा १३

▼

⑤

>
▼ Bühler

13. He may either offer oblations to Kāma and Manyu (with the following two Mantras), 'Kāma (passion) has done it; Manyu (anger) has done it.' Or he may mutter (these Mantras). 24

▼ हरदत्त-टीका

सूत्रम्⑥

काममन्युभ्यां वा जुहुयात्कामोऽकार्षीन्मन्युरकार्षीदिति ॥१३ ॥

टिप्पनी⑥

स्वाहाकारान्ताभ्यां होमः । आज्यं द्रव्यम् ॥ १३ ॥

14 पर्वणि वा तिलभक्ष

पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूत उदकम् उपस्पृश्य सावित्रीं प्राणायामशः सहस्र-कृत्व आवर्तयेद् अप्राणायामशो वा १४

▼

⑤

>

▼ Bühler

14. Or, after having eaten sesamum or fasted on the days of the full and new moon he may, on the following day bathe, and stopping his breath, repeat the Gāyatrī one thousand times, or he may do so without stopping his breath.

▼ हरदत्त-टीका

सूत्रम्⑥

जपेद्वा ॥ १४ ॥

टिप्पनी⑥

अस्मिन् पक्षे न स्वाहाकारः। केचित्तु 'कामाय स्वाहा' 'मन्यवे स्वाहे'ति होममिच्छन्ति । जपपक्षे तु सूत्रोपदिष्टौ मन्त्राविति । दोषाभ्यासानुरूपं जपहोमयोरावृत्तिः ॥१४॥

सूत्रम्⑥

पर्वणि वा तिलभक्ष उपोष्य वा श्वोभूत उदकमुपस्पृश्य सावित्रीं प्राणायामशस्सहस्रकृत्व आवर्तयेदप्राणायामशो वा ॥१५॥

टिप्पनी⑥

पर्वणि पौर्णमास्याममावास्यायां वा । तिलानेव भक्षयति नान्यदोदनादिकमिति तिलभक्षः । श्वोभूते उदकमुपस्पृश्य स्नात्वा सावित्रीं प्राणायामशः प्राणायामेन एकस्मिन्प्राणायामे यावत्कृत्व आवर्तयितुं शक्यं तावत्कृत्व आवर्तयेत् । एवमा सहस्रपूर्तेः प्राणायामावृत्तिः । अप्राणायामशो वा 25जपकाले प्राणानायच्छेत् , तुष्णीं जपेद्वेति ॥ १५ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने षड्विंशी कण्डिका ॥२६॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. Manu II, 35.↩
6. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
7. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

12. आप० ध० १.३०.८.↩

13. मनु० रमृ० २.६↩

14. आप० ध० १. ३१. १.↩

15. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

16. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

> विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
> तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

    इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

17. आप० ध० १ ३१. ६.↩

18. इदं च तर्किकादिमतमनुसृत्य प्रभाकरमतञ्च । भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणां चोदनालक्षणानां धर्मत्वाङ्गीकारात् । उक्तं हि भट्टपादैः-

> श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः ।
> चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥ इति । श्लो. वा. १२. १९१.

    ↩

19. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which,

according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

20. गौ० ध० १. १, २↩

21. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

22. आप० ध० १ १२.१०.↩

23. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

24. Manu II, 69; Yājñ. I, 15.↩

25. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

२७①

01 श्रावण्याम् पौर्णमास्यान् तिलभक्ष④

श्रावण्यां पौर्णमास्यां तिल-भक्ष उपोष्य वा
श्वोभूते महानदम् उदकम् उपस्पृश्य
सावित्र्या समित्-सहस्रम् आदध्याज् जपेद् वा १

▼

⑤

>
▼ Bühler

1. After having eaten sesamum or having fasted on the full moon day of the month Srāvaṇa July-August), he may on the following day bathe in the water of a great river and offer (a burnt-oblation of) one thousand pieces of sacred fuel, whilst. reciting the Gāyatrī, or he may mutter (the Gāyatrī) as many times. 1

▼ हरदत्त-टीका

सूत्रम्⑥

श्रावण्यां वा पौर्णमास्यां तिलभक्ष उपोष्य वा श्वो भूते 2माहानदमुदकमुपस्पृश्य सावित्र्या समित्सहस्रमादध्याज्जपेद्वा ॥१॥

टिप्पनी⑥

गिरिप्रभवा समुद्रगामिनी नदी महानदी तत्र भवं माहानदम् । समित्सहस्रं याज्ञिकस्य वृक्षस्य । 'आदध्यादि'ति वचनान्न होमधर्मः स्वाहाकारः3 'जुहोतिचोदना स्वाहाकारप्रदान,' इत्युक्तत्वात् । जपेद् वा ॥१॥
02 इष्टियज्ञक्रतून् वा पवित्रार्थान्

इष्टि-यज्ञ-क्रतून् वा पवित्रार्थान् आहरेत् २

▼

⑤

>
▼ Bühler

2. Or he may perform Iṣṭis and Soma-sacrifices for the sake of purifying himself (from his sins), 4

▼ हरदत्त-टीका

सूत्रम्⑥

इष्टियज्ञक्रतून्वा पवित्रार्थानाहरेत् ॥ २ ॥

टिप्पनी⑥

पवित्रार्थाः शुद्ध्यर्थाः 5मृगाराद्या इष्टयः । 6यज्ञक्रतवः सोमयागा अग्निष्टोमादयः । तान्येतानि षट् प्रायश्चित्तानि एनस्सु गुरुषु गुरूणि, लघुषु लघूनि ॥ २॥

03 अभोज्यम् भुक्त्वा नैष्पुरीष्यम्

अभोज्यं भुक्त्वा नैष्पुरीष्यम् *(कदेति चेत् -)*३

▼

⑤

>
▼ Bühler

3. After having eaten forbidden food, he must fast, until his entrails are empty. 7

▼ हरदत्त-टीका

सूत्रम्⑥

अभोज्यं भुक्त्वा नैष्पुरीष्यम् ॥३॥

टिप्पनी⑥

अभोज्यस्य मार्जारादिमांसस्य भक्षणे निष्पुरीषभावः कर्तव्यः । यावदुदरं निष्पुरीषं भवति तावदुपवस्तव्यम् ॥ ३॥

04 तत्सप्तरात्रेणावाप्यते

तत्-सप्त-रात्रेणावाप्यते ४

▼

⑤

>
▼ Bühler

4. That is (generally) attained after seven days.

▼ हरदत्त-टीका

सूत्रम्⑥

तत्सप्तरात्रेणाऽवाप्यते ॥ ४ ॥

प्रस्तावः⑥

तत्कियता कालेनाऽवाप्यते ? तदाह—

टिप्पनी⑥

तत् नैष्पुरीष्यम् । सप्तरात्रेणाऽवाप्यते सप्तरात्रमुपवस्तव्यमित्यर्थः । सप्तरात्रमुपवसदित्येव सिद्धे नैष्पुरीष्यवचनाद्येषां त्रिरात्रेणैव तदवाप्यते तेषां तावतैव शुद्धिः। तथा च गौतमः-8 'अभोज्यभोजने निष्पुरीषभावः त्रिरात्रावरमभोजनं सप्तरात्रं वे'ति ॥ ४ ॥

05 हेमन्तशिशिरयोर्वोभयोः सन्ध्योरुदकमुपस्पृशेत्

हेमन्त-शिशिरयोर् वोभयोः संध्योर् उदकम् उपस्पृशेत् ५

▼

⑤

>
▼ Bühler

5. Or he may during winter and during the dewy season (November-March) bathe in cold water both morning and evening.

▼ हरदत्त-टीका

सूत्रम्⑥

हेमन्तशिशिरयोर्वोभयोस्सन्ध्योर्वोदकमुपस्पृशेत् ॥ ५ ॥

टिप्पनी⑥

उभयोः सन्ध्ययोः सायं प्रातश्च । उदकमुपस्पृशेत् भूमिगतास्वप्सु स्नायात् । उद्धृताभिर्वा शीताभिः ॥ ५ ॥

06 कृच्छ्रद्वादशरात्रं वा चरेत्

कृच्छ्र-द्वादश-रात्रं वा चरेत् ६

▼

⑤

>
▼ Bühler

6. Or he may perform a Kṛcchra penance, which lasts twelve days.

▼ हरदत्त-टीका

सूत्रम्⑥

कृच्छ्वादशरात्रं वा चरेत् ॥ ६ ॥

टिप्पनी⑥

द्वादशरात्रसाध्यो व्रतविशेषः कृच्छ्रद्वादशरात्रः ॥ ६ ॥

07 त्र्यहमनक्ताश्यदिवाशी ततस्त्र्यहन् त्र्यहमयाचितव्रतस्त्र्यहन्

त्र्यहम् अनक्ताश्य्
अदिवाशी ततस् त्र्यहं
त्र्य्-अहम् अयाचित-व्रतस्
त्र्यहं नाश्नाति किंचनेति
कृच्छ्र-द्वादश-रात्रस्य विधिः ७

▼

⑤

>
▼ Bühler

7. The rule for the Kṛcchra penance of twelve days (is the following): For three days he must not eat in the evening, and then for three days not in the morning; for three days he must live on food which has been given unasked, and three days he must not eat anything. 9

▼ हरदत्त-टीका

सूत्रम्⑥

त्र्यहमनक्ताश्यदिवाशी ततस्त्र्यहम्, त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किञ्चनेति कृच्छ्रद्वादशरात्रस्य विधिः ॥ ७ ॥

प्रस्तावः⑥

तस्य विधिमाह10—

टिप्पनी⑥

आदितस्त्रिष्वहस्सु नक्तं नाश्नीयात् । दिवैव भुञ्जीत । ततस्त्र्यहमदिवाशी रात्रावेव भुञ्जीत । न दिवा । ततस्त्र्यहमयाचितमेव भुञ्जीत। याच्ञाप्रतिषधोऽयम । तेन स्वद्रव्यस्याप्रतिषेधः । तथा च गौतमः 11 'अथाऽपरं त्र्यहं न कंचन याचे'दिति । ततत्र्यहं नाश्नाति किञ्चन फलादिकमपीति । एवं कृच्छ्रद्वादशरात्रस्य विधिः । तत्र स्मृत्यन्तरवशाद्धविष्यमन्नं, ब्रह्मचर्यं, स्त्रीशूद्रादिभिरसम्भाषणं च द्रष्टव्यम् ॥ ७ ॥

08 एतमेवाभ्यसेत्संवत्सरं स कृच्छ्रसंवत्सरः

एतम् एवाभ्यसेत् संवत्सरं - स कृच्छ्रसंवत्सरः ८

▼

⑤

>

▼ Bühler

8. If he repeats this for a year, that is called a Kṛcchra penance, which lasts for a year.

▼ हरदत्त-टीका

सूत्रम्⑥

एतमेवाऽभ्यस्येत्संवत्सरं स कृच्छ्रसंवत्सरः ॥८॥

टिप्पनी⑥

एतमेव विधिं संवत्सरं निरन्तरमभ्यस्येत् । स एष कृच्छ्रसंवत्सरो वेदितव्यः । यः पूर्वोक्तः 'कच्छ्रसंवत्सरं वा चरे'(२५.९)दिति ॥८॥

09 अथापरम् बहून्यप्यपतनीयानि कृत्वा

अथाऽपरम् ।
बहून्य् अप्य् अपतनीयानि कृत्वा
त्रिभिर् अनश्नत्-पारायणैः कृत-प्रायश्चित्तो भवति ९

▼

⑤

>
▼ Bühler

9. Now follows another penance. He who has committed even a great many sins which do not cause him to fall, becomes free from guilt, if, fasting, he recites the entire Śākhā of his Veda three times consecutively. 12

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽपरं बहून्यप्यपतनीयानि कृत्वा त्रिभिरनश्नन् पारायणैः कृतप्रायश्चित्तो भवति ॥ ९ ॥

टिप्पनी⑥

अथाऽपरं प्रायश्चित्तमुच्यते । अनश्नतैव निरन्तरं त्रीणि पारायणानि कर्तव्यानि । आदित आरभ्याऽऽसमाप्तेर्वेदस्याऽध्ययनं पारायणम् । बहून्यपि । अपिशब्दात्किं पुनरेकं द्वे वा ॥९॥

10 अनार्यां शयने बिभ्रेद्ददद्वृद्धिङ्

अनार्यां शयने बिभ्रेद्,
ददद् वृद्धिं(=interest) (स्वद्रव्यस्य), कषाय-पः(=सुराव्यतिरिक्तं मद्यं पिबन्) ।
अब्राह्मण इव (सर्वान्) वन्दित्वा,
तृणेष्व् आसीत पृष्ठ-तप् १०

▼

⑤

>
▼ Bühler

10. He who cohabits with a non-Aryan woman, he who lends money at interest, he who drinks (other) spirituous liquors (than Surā), he who praises everybody in a manner unworthy of a Brāhmaṇa, shall sit on grass, allowing his back to be scorched (by the sun).

▼ हरदत्त-टीका

सूत्रम्⑥

अनार्यां शयने विभ्रद्ददद्वृद्धिं कषायपः ।
अब्राह्मण इव वन्दित्वा तृणेष्वासीत पृष्ठतप् ॥१०॥

टिप्पनी⑥

अनार्यां शूद्रा तां शयने बिभ्रत् उपगच्छन् ।
ददद् वृद्धिं वृद्ध्यर्थं द्रव्यं ददत् । वृद्ध्याजीव इत्यर्थः ।
सुराव्यतिरिक्तं मद्यं कषायः । 13 तस्य पाता कषायपः ।
यश्चाऽब्राह्मण इव सर्वान् वन्दी भूत्वा स्तौति स सर्वोऽपि तृणेषूदयादारभ्याऽऽसीत् ।
यावदस्याऽऽदित्यः पृष्ठं पश्चाद्भागं तपति । आदित्ये तपति तदानुगुण्याचरणात् स्वयमेव पृष्ठतवित्युच्यते । अभ्यासे अभ्यासो यावता शुद्धिं मन्यते ॥ १०॥

11 यदेकरात्रेण करोति पापङ्

यद् एकरात्रेण करोति पापं
कृष्णं*(→शूद्रं)* वर्णं ब्राह्मणः सेवमानः ।
चतुर्थ-काल उदकाभ्यवायी *(स्नानकर्ता)*
त्रिभिर् वर्षैस् तद् अपहन्ति पापम् ११

▼

⑤

>
▼ Bühler

11. A Brāhmaṇa removes the sin which he committed by serving one day and night (a man of) the black race, if he bathes for three years, eating at every fourth meal-time. 14

▼ हरदत्त-टीका

सूत्रम्⑥

यदेकरात्रेण करोति पापं कृष्णं वर्णं ब्राह्मणस्सेधमानः चतुर्थकाल 15उदकाभ्यवायी त्रिभिर्वर्षैस्तदपहन्ति पापम् ॥ ११॥

टिप्पनी⑥

कृष्णो वर्णः शूद्रः। तमाज्ञाकरो भूत्वा वृत्त्यर्थं सेवमानः । शिष्टं स्पष्टं गतं च । अपर आह- शूद्रां मैथुने सेवमान इति । अस्मिन्पक्षे ऋतावुपगमने अपत्योत्पत्ताविदं द्रष्टव्यम् । मनुः—
16वृषलीफेनपीतस्य निश्वासोपहतस्य च ।
तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥ इति ॥११॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने सप्तविंशी कण्डिका ॥२७॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्ने नवमः पटलः ॥ ९ ॥

इति नवमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
5. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
6. आप० ध० १.३०.८.↩
7. Manu II, 35.↩
8. मनु० रमृ० २.६↩
9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

13. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

14. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

१०①

२८①

01 यथा कथा च④

यथा कथा च परपरिग्रहम् अभिमन्यते - स्तेनो ह भवतीति कौत्स-हारीतौ, तथा कण्व-पुष्करसादी १

▼

⑤

>
▼ Bühler

1. He who, under any conditions whatsoever, covets (and takes) another man's possessions is a thief; thus (teach) Kautsa and Hārita as well as Kaṇva and Pushkarasādi.

▼ हरदत्त-टीका

सूत्रम्⑥

यथा कथा च परपरिग्रहमभिमन्यते स्तेनो ह भवतीति कौत्सहरीतौ तथा काण्वपुष्करसादी ॥१॥

टिप्पनी⑥

1यथा कथा च आपद्यनापदि वा भूयांसमल्पं वा, परपरिग्रहं परस्वमभिमन्यते-ममेदमस्त्विति बुद्धौ कुरुते2 सर्वथा स्तेन एव भवतीति कौत्सादयो मन्यन्ते ॥१॥

बुद्धौ कृत्वाऽऽदत्त इत्यर्थ , इत्यधिक क. छ. पु.

02 सन्त्यपवादाः परिग्रहेष्विति वार्ष्यायणिः

सन्त्य् अपवादाः परिग्रहेष्व् इति वार्ष्यायणिः २

▼

⑤

>
▼ Bühler

2. Vārshyāyaṇi declares, that there are exceptions to this law, in regard to some possessions.

▼ हरदत्त-टीका

सूत्रम्⑥

संत्यपवादाः परपरिग्रहेष्विति वार्ष्यायणिः ॥ २॥

टिप्पनी⑥

वार्ष्यायणिस्तु मन्यते केषुचित्परपरिग्रहेषु स्तेयस्याऽपवादास्सन्तीति॥

03 शम्योषा युग्यघासो न

शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति ३

▼

⑤

>

▼ Bühler

3. (E.g.) seeds ripening in the pod, food for a draught-ox; (if these are taken), the owners (ought) not (to) forbid it. 3

▼ हरदत्त-टीका

सूत्रम्⑥

शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति ॥ ३ ॥

प्रस्तावः⑥

तानेवोदाहरति —

टिप्पनी⑥

शमी बीजकोशी तस्याम् **उष्यन्ते** दह्यन्ते कालवशेन पच्यन्ते इति **शम्योषाः** - कोशीधान्यानि मुद्ग-माष-चणकादीनि ।

युगं वहतीति **युग्यः** शकटवाही बलीवर्दः, तस्य **घासो** भक्षस्तृणादिः **युग्यघासः** ।

एते आदीयमानाः स्वामिनो न प्रतिषेधयन्ति - स्वामिभिः प्रतिषेधं न कारयन्ति ।

एतेष्व् आदीयमानेषु स्वामिनो न प्रतिषेधुम् अर्हन्तीत्य् अर्थः । स्वयंग्रहणेऽपि न स्तेय-दोष इति यावत् । अत्र स्मृत्यन्तरे विशेषः —

> 'चणकव्रीहिगोधूम-
> यवानां मुद्गमाषयोः ।

> अनिषिद्धैर् ग्रहीतव्यो
> मुष्टिर् एकाऽध्वनि स्थितैः ॥'

मनुस्तु—
4 द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥ ३ ॥

04 अतिव्यपहारो व्यृद्धो भवति

अतिव्यपहारो व्यृद्धो भवति ४

▼

⑤

>
▼ Bühler

> 4. To take even these things in too great a quantity is sinful.

▼ हरदत्त-टीका

सूत्रम्⑥

अतिव्यवहारो व्यृद्धो भवति ॥ ४ ॥

टिप्पनी⑥

शम्योषादिष्वपि अतिव्यवहारो व्यृद्धो दुष्टो भवति, अतिमात्रापहारे स्तेयदोषो भवतीत्यर्थः ॥ ४ ॥

05 सर्वत्रानुमतिपूर्वमिति हारीतः

सर्वत्रानुमतिपूर्वमिति हारीतः ५

▼

⑤

>
▼ Bühler

5. Hārita declares, that in every case the permission (of the owner must be obtained) first.

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वत्राऽऽनुमतिपूर्वमिति हारीतः ॥ ५ ॥

टिप्पनी⑥

सर्वेषु द्रव्येषु सर्वास्ववस्थासु स्वाम्यनुमतिपूर्वमेव ग्रहणमिति हारीत आचार्यो मन्यते ॥५॥

06 न पतितमाचार्यञ् ज्ञातिं

न पतितमाचार्यं ज्ञातिं वा दर्शनार्थो गच्छेत् ६

▼

⑤

>
▼ Bühler

6. He shall not go to visit a fallen teacher or blood relation.

▼ हरदत्त-टीका

सूत्रम्⑥

न पतितमाचार्यं ज्ञातिं वा दर्शनार्थो गच्छेत् ॥ ६ ॥

टिप्पनी⑥

'न पतितैः सव्यवहारो विद्यत'(२१.५.) इत्युक्तेऽपि पुनरुच्यते- आचार्यादिषु विशेषं वक्ष्यामीति ॥ ६ ॥

07 न चास्माद्भोगानुपयुञ्जीत

न चास्माद्भोगानुपयुञ्जीत ७

▼

⑤

>

▼ Bühler

7. Nor shall he accept the (means for procuring) enjoyments from such a person. 5

▼ हरदत्त-टीका

सूत्रम्⑥

न चाऽस्माद्भोगानुपयुञ्जीत ॥ ७ ॥

टिप्पनी⑥

अस्मात्पतितादाचार्यात् ज्ञातेर्वा पित्रादेः भोगान् भोगसाधनानि दायप्राप्तान्यपि नोपयुञ्जीत न गृह्णीयात् ॥ ७ ॥

08 यदृच्छासन्निपात उपसङ्गृह्य तूष्णीं

यदृच्छासंनिपात उपसंगृह्य तूष्णीं व्यतिव्रजेत् ८

▼

⑤

>
▼ Bühler

8. If he meets them accidentally he shall silently embrace (their feet) and pass on.

▼ हरदत्त-टीका

सूत्रम्⑥

यदृच्छासन्निपात उपसंगृह्य तूष्णीं व्यतिव्रजेत् ॥ ८॥

टिप्पनी⑥

यदि पतितैराचार्यादिभिर्यदृच्छया सन्निपातः सङ्गतिः स्यात् तदाऽविधिनोपसङ्गृह्य तुष्णीं तैस्सह किञ्चिदप्यसम्भाष्य व्यतिव्रजेत् गच्छेत् । न क्षणमपि सह तिष्ठेत् ॥ ८॥

09 माता पुत्रत्वस्य भूयांसि

माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा नित्या पतितायामपि ९

▼

⑤

>
▼ Bühler

9. A mother does very many acts for her son, therefore he must constantly serve her, though she be fallen.

▼ हरदत्त-टीका

सूत्रम्⑥

माता पुत्रत्वस्य भूयांसि कर्माण्यारभते तस्यां शुश्रूषा नित्या पतितायामपि ॥९॥

टिप्पनी⑥

पुत्रत्वस्य, स्वार्थिकस्त्वः । यथा 'देहत्वमेवान्य'दिति । पुत्रस्य कृते माता भूयांसि दृष्टार्थानि गर्भधारणाशुचिनिर्हरणस्तन्यदानप्रदक्षिणनमस्कारोपवासादीनि कर्माणि करोति तस्मात्तस्यां पतितायामपि शुश्रूषा अभ्यङ्गस्नापनादिका । नित्या नित्यमेव कर्तव्या ॥९॥

10 न तु धर्मसन्निपातः

न तु धर्मसंनिपातः स्यात् १०

▼

⑤

>
▼ Bühler

10. But (there shall be) no communion (with a fallen mother) in acts performed for the acquisition of spiritual merit.

▼ हरदत्त-टीका

सूत्रम्⑥

न तु धर्मसन्निवापः स्यात् ॥ १० ॥

टिप्पनी⑥

एकस्मिन् धर्मे सहाऽन्वयो धर्मसन्निवापः । स पतितया मात्रा सह न कर्तव्यः। नामसुब्रह्मण्यायां मातुर्नामग्रहणम् । वरुणप्रघासेषु 6यावन्तो यजमानस्याऽमात्याः सस्त्रीकास्तावन्त्येकातिरिक्तानी'त्येवमादिकमुदाहरणम् । किं पुनरेवमादिषु मातुरन्वयः शुश्रूषा ? ओमित्याह । अन्विता हि सा सम्मता मन्यते । निरस्ता तु विमता। वैश्वदेवार्थे च पाके सा न भोजयितव्या । मृतायास्तु तस्याः संस्कारादिकाः क्रियाः कर्तव्याः नेति विप्रतिपन्नाः ॥१०॥

11 अधर्माहृतान्भोगाननुज्ञाय न वयञ्

अधर्माहृतान् भोगान् अनुज्ञाय
न वयं चाधर्मश् चेत्य् अभिव्याहृत्या
ऽधोनाभ्य् उपरिजान्व् आछाद्य
त्रिषवणम् उदकम् उपस्पृशन्न्
अक्षीराक्षारालवणं भुञ्जानो
द्वादश वर्षाणि नागारं प्रविशेत् ११

▼

⑤

>
▼ Bühler

11. Enjoyments taken unrighteously he shall give up; he shall say, 'I and sin (do not dwell together).' Clothing himself with a garment reaching from the navel down to the knee, bathing daily, morn, noon, and evening, eating food which contains neither milk nor pungent condiments, nor salt, he shall not enter a house for twelve years. 7

▼ हरदत्त-टीका

सूत्रम्⑥

धर्माहृतान् भोगाननुज्ञाय न वयं चाऽधर्मश्चेत्यभि व्याहृत्याऽधो नाभ्युपरिजान्वाच्छाद्य त्रिषवणमुदकमुपस्पृशन्नक्षीराक्षारलवणं भुञ्जानो द्वादशवर्षाणि नाऽगारं प्रविशेत् ॥ ११ ॥

टिप्पनी⑥

ब्राह्मणस्वहरणम्,
8चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्य तु गच्छति ॥

इत्येवमादिकमुदाहरणम्। ये अधर्माहृता भोगास्ताननुज्ञाय परित्यज्य 'न वयं चाऽधर्मश्चेति प्रैषं ब्रूयात् । तस्यार्थः— वयं चाऽधर्मश्च सह न वर्तामह इति । अधो नाभीत्यादि (२४.११.)गतम् । नात्राऽर्धशाणीपक्षो भिक्षाचर्यं वा ॥ ११ ॥

12 ततः सिद्धिः

ततः सिद्धिः १२

▼

⑤

>
▼ Bühler

12. After that he (may be) purified.

▼ हरदत्त-टीका

सूत्रम्⑥

ततस्सिद्धिः ॥१२॥

टिप्पनी⑥

एतस्य द्वादशवार्षिकस्याऽन्ते सिद्धिः शुद्धिर्भवति ॥ १२ ॥

13 अथ सम्प्रयोगः स्यादार्यैः

अथ संप्रयोगः स्याद् आर्यैः १३

▼

⑤

>
▼ Bühler

13. Then he may have intercourse with Aryans.

▼ हरदत्त-टीका

सूत्रम्⑥

अथ सम्प्रयोगस्स्यादार्यैः ॥ १३ ॥

टिप्पनी⑥

प्रायश्चित्तोपदेशात सिध्युपदेशाच्च सिद्धे पुनर्वचनं 'ज्ञानात्साम्यं तु गच्छती'त्यस्याऽपवादार्थम् ॥ १३ ॥

14 एतदेवान्येषामपि पतनीयानाम्

एतद् एवान्येषाम् अपि पतनीयानाम् १४

▼

⑤

>

▼ Bühler

14. This penance may also be employed in the case of the other crimes which cause loss of caste (for which no penance has been ordained above).

▼ हरदत्त-टीका

सूत्रम्⑥

एतदेवाऽन्येषामपि पतनीयानाम् ॥ १४ ॥

टिप्पनी⑥

उक्तव्यतिरिक्तानि यानि पतनीयानि पूर्वमुक्तानि तेषु यत्राऽऽहत्य प्रायश्चित्तं 9नोक्तं तेषामप्येतदनन्तरोक्तमेव प्रायश्चित्तं वेदितव्यम् । उक्तविषये विकल्प इत्यन्ये । तत्र ज्ञानाज्ञानकृतो विकल्पः ॥१४॥

15 गुरुतल्पगामी तु सुषिरां

गुरुतल्पगामी तु सुषिरां सूर्मिं प्रविश्योभयत आदीप्याभिदहेदात्मानम् १५

▼

⑤

>
▼ Bühler

15. But the violator of a Guru's bed shall enter a hollow iron image and, having caused a fire to be lit on both sides, he shall burn himself. 10

▼ हरदत्त-टीका

सूत्रम्⑥

गुरुतल्पगामी तु सुषिरां सूर्मिं प्रविश्योभयत आदीप्याऽभिदहेदात्मानम् ॥१५॥

टिप्पनी⑥

यस्तु गुरुतल्पगामी सोऽन्तःप्रवेशयोग्यां सुषिरां सूर्मिं कृत्वा प्रविशेत प्रविश्योभयतः पार्श्वयो11र्वह्निमादीपयेत् । आदीप्याऽऽत्मानमभिदहेत् । “ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुया (२५.२.)" दित्यत्रैव कियानपि विशेषः । अनन्तरोक्तस्य वैकल्पिकस्य निवृत्त्यर्थं वचनम् ॥ १५ ॥

16 मिथ्यैतदिति हारीतः

मिथ्यैतदिति हारीतः १६

▼

⑤

>

▼ Bühler

16. According to Hārita, this (last-mentioned penance must) not (be performed).

▼ हरदत्त-टीका

सूत्रम्⑥

मिथ्यैतदिति हारीतः ॥ १६ ॥

टिप्पनी⑥

हारीतस्त्वृषिर्मन्यते- एतदनन्तरोक्तं मरणान्तिकप्रायश्चित्तं मिथ्या न कर्तव्यमिति ॥ १६॥

17 यो ह्यात्मानम् परं

यो ह्यात्मानं परं वाभिमन्यते *(=हन्ति)* ऽभिशस्त एव स भवति १७

▼

⑤

>
▼ Bühler

17. For he who takes his own or another's life becomes an Abhiśasta.

▼ हरदत्त-टीका

सूत्रम्⑥

यो ह्यात्मानं परं वाऽभिमन्यतेऽभिशस्त एव स भवति ॥ १७ ॥

प्रस्तावः⑥

कुत इत्यत आह—

टिप्पनी⑥

हिशब्दो हेतौ । यस्मात् य आत्मन परं वाऽभिमन्यते मारयति सोऽभिशस्त एव भवति ब्रह्महैव भवति । 12न च पतनीयापनोदनं चिकीर्षुरन्यत् पतनीयं कर्तुमर्हतीति । हेत्वभिधानादभिशस्तवचनाच्चाऽन्येषामपि मरणान्तिकानां ब्राह्मणविषये निवृत्तिः ॥ १७॥

18 एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् नास्यास्मिंल्

एतेनैव विधिनोत्तमादुच्छ्ववासाच्चरेत् । नास्यास्मिंल् लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते १८

▼

⑤

>
▼ Bühler

18. He (the violator of a Guru's bed) shall perform to his last breath (the penance) prescribed by that rule (Sūtra 11). He cannot be purified in this world. But (after death) his sin is taken away.

▼ हरदत्त-टीका

सूत्रम्⑥

एतेनैव विधिनोत्तमादुज्छासाचरेनाऽस्याऽस्मिल्लोके प्रत्यापत्तिर्विद्यते कल्पषं तु निहण्यते ॥ १८ ॥

प्रस्तावः⑥

किं तर्हि तस्य प्रायश्चित्तमिति 13 आह—

टिप्पनी⑥

'अधोनाभ्युपरिजान्वि'(२८.११.)त्यादि यदनन्तरोक्तमेतेनैव विधिना । शिष्टं गतम् ॥ १८॥

19 दारव्यतिक्रमी खराजिनम् बहिर्लोम

दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय दारव्यतिक्रमिणे भिक्षामिति सप्तागाराणि चरेत् । सा वृत्तिः षण्मासान् १९

▼

⑤

>
▼ Bühler

19. He who has unjustly forsaken his wife shall put on an ass's skin, with the hair turned outside, and beg in seven houses, saying, 'Give alms to him who forsook his wife.' That shall be his livelihood for six months.

▼ हरदत्त-टीका

सूत्रम्⑥

दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय 'दारव्यतिक्रमिणे भिक्षा'मिति सप्ताऽगाराणि चरेत् । सा वृत्तिः षण्मासान् ॥ १९ ॥

टिप्पनी⑥

14 यस्तु अन्तरेणैव निमित्तं कौमारान् दारान् परित्यजति स दारव्यतिक्रमी । खरस्य, गर्दभस्याऽजिनं बहिर्लोम परिधाय वसित्वा दारव्यतिक्रमिणे भिक्षां दत्तेति सप्तागाराणि भिक्षां चरेत् । 15कौमारदारपरित्यागिने भिक्षां दत्ते'ति वासिष्ठे । 16सा वृत्तिः षण्मासान् । ततः सिद्धिः ॥ १९ ॥

20 स्त्रियास्तु भर्तृव्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तङ्

स्त्रियास्तु भर्तृव्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तं कालम् २०

▼

⑤

>
▼ Bühler

20. But if a wife forsakes her husband, she shall perform the twelve-night Kṛcchra penance for as long a time.

▼ हरदत्त-टीका

सूत्रम्⑥

स्त्रियास्तु भर्तुर्व्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावन्तं कालम् ॥ २० ॥

टिप्पनी⑥

भर्तुर्व्यतिक्रम इति छान्दसो रेफलोपः । व्यतिक्रमः परित्यागः । या तु स्त्री भर्तारं परित्यजत्यन्तरेण निमित्तं, तस्यास्तावन्त कालं षण्मासान् कृच्छ्रद्वादशरात्राभ्यासः प्रायश्चित्तम् ॥ २० ॥

21 अथ भ्रूणहा श्वाजिनङ्

अथ भ्रूणहा श्वाजिनं खराजिनं वा बहिर्लोम परिधाय पुरुषशिरः प्रतीपानार्थमादाय २१

▼

⑤

>
▼ Bühler

21. He who has killed a Bhrūṇa (a man learned in the Vedas and Vedāṅgas and skilled in the performance of the rites) shall put on the skin of a dog or of an ass, with the hair turned outside, and take a human skull for his drinking-vessel,

▼ हरदत्त-टीका

सूत्रम्⑥

अथ भ्रूणहा वाजिनं खराजिनं वा बहिर्लोम परिधाय पुरुषशिरः प्रतीपानार्थमादाय ॥२१॥

टिप्पनी⑥

इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्नेऽष्टाविंशी कण्डिका ॥२८॥

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
3.   1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

    ↩
4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
5. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
7. Manu II, 35.↩

8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

10. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

15. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

16. आप० ध० १.३०.८.↩

२९①

02 खट्वाङ्गन् दण्डार्थे कर्मनामधेयम्④

खट्वाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति । ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाभ्युपाश्रयेन्न हि म आर्यैः संप्रयोगो विद्यते १-१

एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् । नास्यास्मिंल् लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते १-२

▼

⑤

>

▼ Bühler

1. And he shall take the foot of a bed instead of a staff and, proclaiming the name of his deed, he shall go about (saying), 'Who (gives) alms to the murderer of a Bhrūṇa?' Obtaining thus his livelihood in the village, he shall dwell in an empty house or under a tree, (knowing that) he is not allowed to have intercourse with Aryans. According to this rule he shall act until his last breath. He cannot be purified in this world. But (after death) his sin is taken away.

▼ हरदत्त-टीका

सूत्रम्⑥

खटाङ्गं दण्डार्थे कर्मनामधेयं प्रब्रुवाणश्चङ्क्रम्येत को भ्रूणघ्ने भिक्षामिति । ग्रामे प्राणवृत्तिं प्रतिलभ्य शून्यागारं वृक्षमूलं वाऽभ्युपाश्रये'न्न हिम आर्यैः सह सम्प्रयोगो विद्यते । एतेनैव

विधिनोत्तमादुच्छवासाच्चरेत् । नाऽस्यास्मिंल्लोके प्रत्यापत्तिर्विद्यते । कल्मषं तु निर्हण्यते॥ १ ॥

टिप्पनी⑥

षडङ्गस्य वेदस्याऽध्येता, तदर्थवित्, प्रगोगशास्त्रस्य सव्याख्यस्यार्थवित् कर्मणामनुष्ठाताऽनुष्ठापयिता च ब्राह्मणो भ्रूणः । तथा च बौधायनः— 1'वेदानां किञ्चिदधीत्य ब्राह्मणः । एका शाखामधीत्य श्रोत्रियः । अङ्गाध्याय्यनूचानः । कल्पाध्याय्यृषिकल्पः। सूत्रप्रवचनाप्यायी भ्रूणः' इति । तं यो हतवान् स भ्रूणहा । स शुनः खरस्य वाऽजिनं वहिर्लोमपरिधाय पुरुषस्य यस्य कस्यचिन्मृतस्य शिरः, प्रतीपानार्थम् । प्रतिर्धात्वानुवादः 2 'उपसर्गस्य घञ्यमनुष्ये बहुल'मिति बाहुलको दीर्घः । पानमेव प्रतीपानम् । पानग्रहणमुपलक्षणम् । भोजनमपि तत्रैव । खटाङ्गं दण्डार्थे, खट्वाया अङ्गं खट्वाङ्गमीषादि तण्द्दण्डकृत्ये आदाय । “भ्रणहाऽस्मीत्येवं कर्मनिबन्धनमात्मनो नामधेयं प्रब्रुवाणश्चक्रम्येत इतस्ततश्चरेत् । कापालिकतन्त्रप्रसिद्धस्य खट्वाङ्गस्य वा ग्रहणम् । भिक्षाचरणकाले च को भ्रूणघ्ने भिक्षा ददातीति चरेत् । चरित्वा प्रामे प्राणवृत्तिं प्राणयात्रामात्रं प्रतिलभ्य शून्यागारं वृक्षमूलं वा निवासार्थमभ्युपाश्रयेत्- 'न हि म आर्यैः सह सम्प्रयोगो विद्यत' इत्येवं मन्यमानः । कियन्तं कालमेवं चरितव्यमित्यत आह— एतेनैवेत्यादि । गतम् ।

'श्रोत्रियं वा कर्मसमाप्त(२४.२४.) मित्यत्र यः श्रोत्रियः 3ग्रन्थधारी अर्थज्ञश्च न भवति अनुष्ठापयिता च न भवति तस्य प्रहणम् ॥२॥

सूत्रम्⑥

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ २॥

टिप्पनी⑥

'क्षत्रियं हत्वे'त्येवमादिकेऽनुक्रान्तेऽपि विषये यः प्रमत्तो हन्ति प्रमादे नाऽबुद्धिपूर्वं हन्ति तस्याऽपि दोषफलं प्राप्तमेव । न तु प्रमादकृतमिति दोषाभावः ॥२॥
02 यः प्रमत्तो

यः प्रमत्तो हन्ति, प्राप्तं दोषफलम् २

▼

⑤

>
▼ Bühler

2. He even who slays unintentionally, reaps nevertheless the result of his sin.

▼ हरदत्त-टीका

सूत्रम्⑥

यः प्रमत्तो हन्ति प्राप्तं दोषफलम् ॥ २॥

टिप्पनी⑥

'क्षत्रियं हत्वे'त्येवमादिकेऽनुक्रान्तेऽपि विषये यः प्रमत्तो हन्ति प्रमादे नाऽबुद्धिपूर्वं हन्ति तस्याऽपि दोषफलं प्राप्तमेव । न तु प्रमादकृतमिति दोषाभावः ॥२॥

03 सह सङ्कल्पेन भूयः

सह संकल्पेन भूयः ३

▼

⑤

>
▼ Bühler

3. (His guilt is) greater, (if he slays) intentionally.

▼ हरदत्त-टीका

सूत्रम्⑥

सह सङ्कल्पेन भूयः ॥ ३ ॥

टिप्पनी⑥

सङ्कल्पेन सह वधे कृते भूयः प्रभूततरं भवति । तेन प्रमादकृते लघुप्रायश्चित्तम् , बुद्धिपूर्वं तु गुर्विति । यत्पुनः पूर्वमुक्तं 'दोषवच्च कर्माभिसन्धिपूर्वं कृत्वाऽनभिसन्धिपूर्वं वे(२६.७)'ति तत्र तेषु प्रायश्चित्तेषु विशेषाभावादिदमुक्तम् ॥ ३ ॥

04 एवमन्येष्वपि दोषवत्सु कर्मसु

एवमन्येष्वपि दोषवत्सु कर्मसु ४

▼

⑤

>

▼ Bühler

4. The same (principle applies) also to other sinful actions,

▼ हरदत्त-टीका

सूत्रम्⑥

एवमन्येष्वपि दोषवत्सु कर्मसु ॥ ४ ॥

टिप्पनी⑥

अन्येष्वपि हननव्यतिरिक्तेषु दोषवत्सु कर्ममु एवमेव द्रष्टव्यम्-अबुद्धिपूर्वं कृतेऽल्पो दोषः , बुद्धिपूर्वे महानिति ॥ ४॥

05 तथा पुण्यक्रियासु

तथा पुण्यक्रियासु ५

▼

⑤

>
▼ Bühler

5. And also to good works. 4

▼ हरदत्त-टीका

सूत्रम्⑥

तथा पुण्यक्रियासु ॥ ५ ॥

टिप्पनी⑥

पुण्यक्रियास्वप्येष एव न्यायः— अबुद्धिपूर्वेऽल्पं फलम्, बुद्धिपूर्वे महदिति। तद्यथा— ब्राह्मणस्स्वान्यपहृत्य चोरेषु धावत्सु यदृच्छया कश्चिच्छूर आगतस्तान् हन्यात्, स्वयमेव वा शूरं

दृष्ट्वा चोरा अपहृतानि द्रव्याण्युत्सृज्य पलायेरन् तदा शूरस्याऽल्पं पुण्यफलम् । यदा तु बुद्धिपूर्वं स्वयमेव चोरेभ्यः प्रत्याहृत्य स्वानि स्वामिभ्यो ददाति तदा महदिति । एवं स्वभार्याबुद्ध्या परदारगमनेऽल्पम्, अन्यत्र महदिति ॥५॥

06 परीक्षार्थोऽपि ब्राह्मण आयुधन्

परीक्षार्थोऽपि ब्राह्मण आयुधं नाददीत ६

▼

⑤

>
▼ Bühler

6. A Brāhmaṇa shall not take a weapon into his hand, though he be only desirous of examining it.

▼ हरदत्त-टीका

सूत्रम्⑥

परीक्षार्थोऽपि ब्राह्मण आयुधं नाऽऽददीत ॥ ६॥

टिप्पनी⑥

गुणदोषज्ञानं परीक्षा । तया अर्थः प्रयोजनं यस्य सः । एवंभूतोऽपि ब्राह्मण आयुधं न गृह्णीयात् किं पुनर्हिंसार्थ इत्यपिशब्दार्थः ॥ ७ ॥

07 यो हिंसार्थमभिक्रान्तं हन्ति

यो हिंसार्थमभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन्दोष इति पुराणे ७

▼

⑤

>

▼ Bühler

7. In a Purāṇa (it has been declared), that he who slays an assailant does not sin, for (in that case) wrath meets wrath.

▼ हरदत्त-टीका

सूत्रम्⑥

यो हिंसार्थमभिकान्तं हन्ति मन्युरेव मन्युं स्पृशति न तस्मिन् दोष इति पुराणे ॥ ७ ॥

प्रस्तावः⑥

अस्य प्रतिप्रसवः—

टिप्पनी⑥

यस्तु हिंसार्थं मारणार्थमभिक्रान्तमभिपतितं हन्ति न तस्मिन् दोषो विद्यत इति पुराणे श्रुतम् । दोषाभावे हेतुः-यस्मान्मन्युरेव मन्युं स्पृशति न पुनः पुरुषः पुरुषम् । अत्र वसिष्ठबौधायनौ—

5स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम् ।
न तेन भ्रूणहा स स्यान्मन्युस्तं मन्युमृच्छति ॥ इति ॥
मनुस्तु—

6शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुद्ध्यते । द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥
आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे ।
स्त्रीविप्राभ्यवपत्तौ च घ्नन् धर्मेण न दुष्यति ॥ इति ॥

गौतमः- 7'प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीते'ति ॥

वसिष्ठः— 8अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥
आततायिनमायान्तमपि वेदान्तपारगम् ।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत् ॥' इति ॥७॥

08 अथाभिशस्ताः समवसाय पतितपुत्रेषु

अथाभिशस्ताः समवसाय
पतित-पुत्रेषु चरेयुर् धार्म्यम् इति
सांशित्येतरेतर-याजका इतरेतराध्यापका मिथो विवहमानाः ८

▼

⑤

>
▼ Bühler

8. But Abhiśastas shall live together in dwellings (outside the village); considering this their lawful (mode of life), they shall sacrifice for each other, teach each other, and marry amongst each other.

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽभिशस्ताः समवसाय चरेयुर्धार्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवाहमानाः ॥८॥

प्रस्तावः⑥

पतितैरकृतप्रायश्चित्तैरुत्पादितानां पुत्राणामपि पातित्यमस्तीति प्रतिपादयितुं पूर्वपक्षमाह —

टिप्पनी⑥

अथशब्दोऽर्थान्तरप्रस्तावं सूचयति । अभिशस्ताः पतिताः । समवसाय चरेयुः । अवसानं गृहम् । समित्येकीभावे । ग्रामाद्बहिरेकस्मिन् प्रदेशे गृहाणि कृत्वा चरेयुः । धार्म्यं धर्म्ये वक्ष्यमाणं वृत्तमिति । सांशित्य संशितां तीक्ष्णां बुद्धिं कृत्वा । निश्चित्येत्यर्थः । इतरेतरं याजयन्तः । इतरेतरमध्यापयन्तः परस्परं विवाहसम्बन्धं च कुर्वन्तश्चरेयुः वर्तेरन्निति ॥८ ॥

09 पुत्रान्सन्निष्पाद्य ब्रूयुर्विप्र व्रजततास्मदेवं

पुत्रान्संनिष्पाद्य ब्रूयुर् -
"विप्रव्रजततास्मद् -
एवं ह्य् अस्मत्स्व् आर्याः संप्रत्यपत्स्यते"ति ९

▼

⑤

>
▼ Bühler

9. If they have begot sons, let them. say to them: 'Go out from amongst us, for thus the Āryas, (throwing the guilt) upon us, will receive you (amongst their number).' 9

▼ हरदत्त-टीका

सूत्रम्⑥

पुत्रान् सन्निष्पाद्य ब्रूयुर्विप्रजताऽस्मदेवं ह्यस्मत्स्वार्यास्सम्प्रत्यपत्स्यतेति ॥९॥

टिप्पनी⑥

अथ ते पुत्रान् सन्निष्पाद्य ब्रूयुः हे पुत्राः अस्मत् अस्मत्तः। विप्रव्रजत विविधं प्रकर्षेण च स्नेहमुत्सृज्याऽऽर्यसमीपं गच्छत ।
एवं ह्यस्मासु अस्मास्व् आर्याः शिष्टाः सम्प्रत्यपत्स्यत । 10
'आशंसायां भूतवच्चेति' भविष्यति लुङ् । सकारात्परो यकारोऽपपाठश्छान्दसो वा । सम्प्रतिपत्तिं करिष्यन्ति । आर्याणामप्येतदभिप्रेतं भविष्यति । यस्मादस्माभिरेव पतनीयं कर्माऽनुष्ठितं न भवद्भिः । न च पतितेनोत्पादितस्य पातित्यम्, अन्यत्वात् ॥९॥

10 अथापि न सेन्द्रि

अथापि न सेन्द्रि यः पतति १०

▼

⑤

>
▼ Bühler

10. For the organs do not become impure together with the man.

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽपि न सेन्द्रियः पतति ॥ १०॥

प्रस्तावः⑥

एतदेवोपपादयति

टिप्पनी⑥

न हि पतितो भवन् सहेन्द्रियेण पतति, पुरुष एव पतति, नेन्द्रियं शुक्लमिति । अथापिशब्दावपि चेत्यस्याऽर्थे ॥ १० ॥

11 तदेतेन वेदितव्यम् अङ्गहीनो

तदेतेन वेदितव्यम् । अङ्गहीनो हि साङ्गं जनयति ११

▼

⑤

>
▼ Bühler

11. (The truth of) that may be learned from this (parallel case); a man deficient in limbs begets a son who possesses the full number of limbs. 11

▼ हरदत्त-टीका

सूत्रम्⑥

तदेतेन वेदितव्यमङ्गहीनो ऽपि साङ्गं जनयति ॥ ११ ॥

प्रस्तावः⑥

कथं न सेन्द्रियः पततीत्याह—

टिप्पनी⑥

तदनन्तरोक्तमर्थरूपमेतेन वक्ष्यमाणेन निदर्शनेन वेदितव्यम् । चक्षुराद्यङ्गहीनोऽपि साङ्गं चक्षुरादिमन्तं जनयति, एवमधिकारविकलः साधिकारं जनयिष्यति । स्त्रिया अपि कारणत्वात् तस्याश्च दोषाभावात् ॥ ११ ॥

12 मिथ्यैतदिति हारीतः

मिथ्यैतदिति हारीतः १२

▼

⑤

>
▼ Bühler

12. Hārita declares that this is wrong.

▼ हरदत्त-टीका

सूत्रम्⑥

मिथ्येतदिति हारीतः ॥ १२ ॥

प्रस्तावः⑥

दूषयति—

टिप्पनी⑥

एतदनन्तरोक्तमर्थरूपं मिथ्या न युक्तमिति हारीतो मन्यते ॥ १२॥

13 दधिधानीसधर्मा स्त्री भवति

दधिधानीसधर्मा स्त्री भवति १३

▼

⑤

>
▼ Bühler

13. A wife is similar to the vessel which contains the curds (for the sacrifice). 12

▼ हरदत्त-टीका

सूत्रम्⑥

दधिधानीसधर्मा स्त्री भवति ॥ १३ ॥

प्रस्तावः⑥

कुत इत्याह—

टिप्पनी⑥

दधि धीयते यस्यां सा दधिधानी स्थाली । तया सधर्मा सदृशी स्त्री भवति ॥

14 यो हि दधिधान्यामप्रयतम्

यो हि दधिधान्यामप्रयतं पय आतच्य मन्थति न तेन धर्मकृत्यं क्रियते । एवमशुचि शुक्लं यन्निवर्तते न तेन सह संप्रयोगो विद्यते १४

▼

⑤

>
▼ Bühler

14. For if one makes impure milk curdle (by mixing it with whey and water) in a milk-vessel and stirs it, no sacrificial rite can be performed with (the curds produced from) that. Just so no intercourse can be allowed with the impure seed which comes (from an Abhiśasta).

▼ हरदत्त-टीका

सूत्रम्⑥

यो हि दधिधान्यामप्रयत्तं पय आतञ्च्य मन्थति न तेन धर्मकृत्यं क्रियेत एवमशुचि शुक्लं यन्निवर्तते न तेन सह सम्प्रयोगो विद्यते ॥ १४ ॥

प्रस्तावः⑥

ततः किम् ?

टिप्पनी⑥

यो हि पुरुषः दधिधान्यां स्थाल्याम्, अप्रयतं श्वाद्युपहतम् , पय आतञ्च्य तक्राद्यातञ्चनेन संस्कृत्य मन्थति न तेन तदुत्पन्नेन घृतादिना धर्मकृत्यं यागादिकं क्रियते। एवं पतितसम्बन्धेनाऽशुचि शुक्लं स्त्रियां निषितं शोणितेनाकं यन्निवर्तते येन रूपेण निष्पद्यते न तेन सह सम्प्रयोगो विद्यते शिष्टानाम् । अत्र चा'शुचि शुक्ल'मित्येत'दथापि न सेन्द्रिय पतती'त्यस्य दूषणम् । न हि वाचनिकेऽर्थे युक्तय क्रमन्ते । तथा च समानायामप्युत्पत्तौ पुत्र एव पतति न दुहिता । यथाऽऽह वसिष्ठः—

13 'पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः । सा हि परगामिनी तामरिक्थामुपेयात्' । इति ॥ १४ ॥

15 अभीचारानुव्याहारावशुचिकरावपतनीयौ

अभीचारानुव्याहारावशुचिकरावपतनीयौ १५

▼

⑤

>
▼ Bühler

15. Sorcery and curses (employed against a Brāhmaṇa) cause a man to become impure, but not loss of caste.

▼ हरदत्त-टीका

सूत्रम्⑥

अभीचारा14नुव्याहारावशुचिकरावपतनीयौ ॥ १५ ॥

टिप्पनी⑥

अभिचारः एवाऽभीचार । 15 'उपसर्गस्य धञी'ति दीर्घः । अभीचारः श्येनादिः । अनुव्याहारः शापः । तौ ब्राह्मणविषयेऽपि क्रियमाणावशुचिः करावेव, न तु पतनीयौ ॥ १५ ॥

16 पतनीयाविति हारीतः

पतनीयाविति हारीतः १६

▼

⑤

>
▼ Bühler

16. Hārita declares that they cause loss of caste.

▼ हरदत्त-टीका

सूत्रम्⑥

पतनीयाविति हारीतः ॥ १६ ॥

टिप्पनी⑥

हारीतस्तु तावपि पतनीयाविति मन्यते ॥ १६ ॥

17 पतनीयवृत्तिस्त्वशुचिकराणान् द्वादश मासान्द्वादशार्धमासान्द्वादश

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान्द्वादशार्धमासान्द्वादश द्वादशाहान्द्वादश सप्ताहान्द्वादश त्र्यहान्द्वादशाहं सप्ताहं त्र्यहमेकाहम् १७

▼

⑤

>

▼ Bühler

17. But crimes causing impurity must be expiated, (when no particular penance is prescribed,) by performing the penance enjoined for crimes causing loss of caste during twelve months, or twelve half months, or twelve twelve-nights, or twelve se’nnights, or twelve times three days, or twelve days, or seven days, or three days, or one day.

▼ हरदत्त-टीका

सूत्रम्⑥

पतनीयवृत्तिस्त्वशुचिकराणां द्वादश मासान् द्वादशाऽर्धमासान् द्वादश द्वादशाहान् द्वादश सप्ताहान् द्वादश त्र्यहान् द्वादश द्व्यहान् द्वादशाहं सप्ताहं त्र्यहं द्व्यहमेकाहम् ॥ १७ ॥

टिप्पनी⑥

अशुचिकराणामपि कर्मणां येषामाहत्य प्रायश्चित्तं नोक्तं तेषामपि पतनीयेषु कर्मसु या वृत्तिः प्रायश्चित्तं सैव प्रायश्चित्तिः। कियन्तं कालम् ? द्वादश मासाद्येकाहान्तम् ॥ १७ ॥

18 इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः १८

▼

⑤

>

▼ Bühler

18. Thus acts causing impurity must be expiated according to the manner in which the (sinful) act has been committed (whether intentionally or unintentionally).

▼ हरदत्त-टीका

सूत्रम्⑥

इत्यशुचिकरनिर्वेषो यथा कर्माभ्यासः ॥ १८ ॥

प्रस्तावः⑥

किमविशेषेण सर्वेष्वेवाऽशुचिकरेष्वयं कालविकल्पः ? नेत्याह—

टिप्पनी⑥

इत्येषोऽशुचिकरनिर्वेषो यथा कर्माभ्यासस्तथा वेदितव्यः । बुद्धिपूर्वे सानुबन्धेऽभ्यासे च भूयांसं कालम्, विपरीते विपर्यय इति ॥१८॥

॥ इत्यापस्तम्बसूत्रवृत्तौ प्रथमप्रश्ने एकोनत्रिंशी कण्डिका ॥ २९ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्वलायां प्रथमप्रश्ने दशमः पटलः ॥ १० ॥

इति दशमः पटलः

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

3. आप० ध० १. ३१. १.↩

4. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩

5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

7. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

8. आप० ध० १.३०.८.↩

9. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. Manu II, 35.↩

12. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

15. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

११①

३०①

01 विद्यया स्नातीत्येके④

विद्यया स्नातीत्येके १

▼

⑤

>
▼ Bühler

1. Some declare, that a student shall bathe after (having acquired) the knowledge of the Veda, (however long or short the time of his studentship may have been). 1

▼ हरदत्त-टीका

सूत्रम्⑥

विद्यया स्नातीत्येके १

प्रस्तावः⑥

'न समावृत्ता वपेरन्' (८. ७.) स्नातस्तु काल' (१०.७.) इत्यादिषु प्रसक्तस्य स्नानस्य कालमाह —

टिप्पनी⑥

वेदविद्या विद्या । तया सम्पन्नः स्नानं कुर्यादित्येके मन्यन्ते । मनुरित्याह—
2वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम् ।
अविप्लुतब्रह्मचर्यो गृहस्थाश्रममावसेत् ॥ इति ॥ १॥
02 तथा व्रतेनाष्टाचत्वारिंशत्परीमाणेन

तथा व्रतेनाष्टाचत्वारिंशत्परीमाणेन २

▼

⑤

>
▼ Bühler

2. (He may) also (bathe) after having kept the student's vow for forty-eight, (thirty-six or twenty-four) years, (though he may not have mastered the Veda).

▼ हरदत्त-टीका

सूत्रम्⑥

तथा व्रतेनाऽष्टाचत्वारिंशत्परीमाणेन ॥२॥

टिप्पनी⑥

परिमाणमेव परीमाणम् । छान्दसो दीर्घः । अष्टाचत्वारिंशद्ग्रहणं 3 'पादूनम्, अर्धेने'(२.१३,१४)त्यादिपूर्वोक्तस्याप्युपलक्षणम् । अष्टाचत्वारिंशदादिपरिमाणेन व्रतेन 4वा सम्पन्नः स्नायात् असम्पन्नोऽपि विद्यया ॥२॥

पादूनम् , अर्धेन, त्रिभिर्वा' इत्येतेषां पूर्वोक्तानामुपलक्षणम् । इति. क. पु.

'अथ ब्रह्मचर्यविधिः' इत्यारभ्य प्रपञ्चितेन समिदाधानभिक्षाचरणगन्धादिवर्जनादिरूपेण । अस्ति च तेषु व्रतशब्दः 'यथा व्रतेषु समर्थः स्याद्यानि वक्ष्यामः" इति । इह तु समुदायाभिप्रायमेकवचनम् । तेन वा व्रतेन सम्पन्नस्स्नायात् । असम्पन्नोऽपि विद्यया । 'चत्वारि वेदव्रतानी'त्येषां तु ग्रहणमत्र नाऽऽङ्कनीयम् । यथोक्तं विश्वरूपे । इत्यधिकः पाठो ग. पु.

03 विद्याव्रतेन चेत्येके

विद्याव्रतेन चेत्येके ३

▼

⑤

>
▼ Bühler

Some declare, that the student (shall bathe) after (having acquired) the knowledge of the Veda and after (the expiration of) his vow.

▼ हरदत्त-टीका

सूत्रम्⑥

विद्या व्रतेन चेत्येके ॥३॥

टिप्पनी⑥

विद्येति तृतीयैकवचनस्याकारस्य5 'सुपां सुलुक्' इत्यादिना लुक् । विद्यया व्रतेन चोभाभ्यां सम्पन्नः स्नायादित्येके मन्यते । एवं च 6'वेदमधीत्य स्नास्य'नित्यत्र वेदमधीत्येत्युपलक्षणम् । अत्र याज्ञवल्क्यः —

7वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ।
अविप्लुतब्रह्मचर्यो लक्षण्या स्त्रियमुद्वहेत् ॥ इति ।

- अत्र व्रतशब्देनाऽग्नीन्धनभैक्षाचरणादयो ब्रह्मचारिधर्मा उच्यते। तेषु हि कालपरिमाणस्य श्रुतत्वातू पारं नीत्वेति युज्यते । दृश्यते च तेषु व्रतशब्दः। 'यथा व्रतेषु समर्थस्स्याद्यानि वक्ष्याम इति। न तु सावित्र्यादीनि वेदव्रतान्युच्यन्ते । तेषां तत्तत्प्रदेशाध्ययनशेषतया तदभावेऽभावाद्वेदं व्रतानि वेति विकल्पानुपपत्तेः । अतः कालविशेषावच्छिन्नानि व्रतानि वेदमुभयं वा पारं नीत्वेत्यर्थः * ॥ ३ ॥

- *.एतच्चिन्हान्तर्गतो भागोऽधिकपाठतया परिगणितः ख. पुस्तके । ग. पुस्तके नास्ति पाठः । अन्यत्र तु यथायथमस्ति ।

04 तेषु सर्वेषु स्नातकवद्वृत्तिः

तेषु सर्वेषु स्नातकवद्वृत्तिः ४

▼

⑤

>

▼ Bühler

4. To all those persons who have bathed (In accordance with any of the above rules must be shown) the honour due to a Snātaka.

▼ हरदत्त-टीका

सूत्रम्⑥

तेषु सर्वेषु स्नातकवद्वृत्तिः ॥ ४ ॥

टिप्पनी⑥

विद्यास्नातको व्रतस्नातक उभयस्नातक इति त्रयः स्नातका उक्ताः तेषु सर्वेषु स्नातकवत् 'तदर्हती'ति वतिः । स्नातकार्हा वृत्तिः पूजा8 'यत्राऽस्मा अपचिति'मित्यादिः कार्या । न तु व्रतस्नातके न्यूना, उभयस्नातकेऽधिकेति ॥ ४॥

05 समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायाम् फलविशेषः

समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ५

▼

⑤

>
▼ Bühler

5. The reverence (shown to a Snātaka) brings, however, different rewards according to the degree of devotion or of learning (possessed by the person honoured).

▼ हरदत्त-टीका

सूत्रम्⑥

समाधिविशेषाच्छ्रुतिविशेषाच्च पूजायां फलविशेषः ॥५॥

प्रस्तावः⑥

यद्यप्येवं तथाऽपि पूजयितुः फलविशेषोऽस्तीत्याह—

टिप्पनी⑥

कर्तव्येषु कर्मस्ववधानं समाधिः श्रुतिः श्रुतम् ॥ ५ ॥

06 अथ स्नातकव्रतानि

अथ स्नातकव्रतानि ६

▼

⑤

>

▼ Bühler

6. Now follow the observances (chiefly to be kept) by a Snātaka.

▼ हरदत्त-टीका

सूत्रम्⑥

अथ स्नातकव्रतानि ॥ ६ ॥

टिप्पनी⑥

इत उत्तरं स्नातकव्रतान्यधिकृतानि वेदितव्यानि । यद्यपि वक्ष्यमाणेषु कानिचित् साधारणान्यपि भवन्ति तथाऽपि भूम्ना स्नातकव्रतान्यधिक्रियन्ते ॥६॥

07 पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण

पूर्वेण ग्रामान् निष्क्रमण-प्रवेशनानि शीलयेद्, उत्तरेण वा ७

▼

⑤

>
▼ Bühler

7. He shall usually enter the village and leave it by the eastern or the northern gate.

▼ हरदत्त-टीका

सूत्रम्⑥

पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण वा ॥ ७ ॥

टिप्पनी⑥

यदा ग्रामान्निष्कामति ग्रामं वा प्रविशति तदा पूर्वेण द्वारणोत्तरेण वा कुर्यात्, न द्वारान्तरेण । शीलयेदिति वचनाद्यदृच्छया द्वारान्तरेण निष्क्रमणप्रवेशनयोरपि न प्रायश्चितम् ॥ ७ ॥

08 सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च

संध्योश् च बहिर्ग्रामाद् आसनं, वाग्-यतश् च ८

▼

⑤

>
▼ Bühler

8. During the morning and evening twilights, he shall sit outside the village, and not speak anything (referring to worldly matters).

▼ हरदत्त-टीका

सूत्रम्⑥

सन्ध्योश्च बहिर्ग्रामादासनं वाग्यतश्च ॥ ८ ॥

टिप्पनी⑥

अहोरात्रयोः सन्धानं सन्धिः ।
तौ च द्वौ - सायं प्रातश् च । 9
'सज्योतिष्याज्योतिषोऽदर्शनात्' इति गौतमः ।
तयोस् सन्ध्ययोर् ग्रामाद् बहिर् आसीत ।

वाग्यतश् च भवेत् । मनुः पुनराह—

> 10 'पूर्वां सन्ध्यां जपंस् तिष्ठेत्
> सावित्रीम् आर्कदर्शनात् ॥
> पश्चिमां तु समासीत
> सम्यगृक्षविभावनात् ॥'

इति

> 11तिष्ठेत् पूर्वाम् आसीतोत्तराम्

इति गौतमः। एते ब्रह्मचारि-विषये।
स्नातके आसनस्य वाङ्-निमनस्य चाऽत्र विधानात् ॥
अन्ये तु -
आसनग्रहणं स्थानस्याऽप्य् उपलक्षणम्,
वाग्यमश् च लौकिक्या वाचो निवृत्तिः,
न सावित्रीजपस्येति वर्णयन्ति ॥ ८ ॥

09 विप्रतिषेधे श्रुतिलक्षणम् बलीयः

विप्रतिषेधे श्रुतिलक्षणं *(सन्ध्याग्निहोत्रादिचोदकम्)* बलीयः ९

▼

⑤

>
▼ Bühler

9. (But an Agnihotrī, who is occupied at home by oblations in the morning and evening, must not go out; for) in the case of a conflict (of duties), that enjoined by the Veda is the more important.

▼ हरदत्त-टीका

सूत्रम्⑥

विप्रतिषेधे श्रुतिलक्षणं बलीयः ॥ ९॥

प्रस्तावः⑥

अहिताग्निविषयेऽस्याऽपवादः—

टिप्पनी⑥

विरोधो विप्रतिषेधः अग्निहोत्रिणो बहिर् आसनम् अग्निहोत्रहोमश् च विरुध्येते । तथा च श्रूयते- "समुद्रो वा एष यद् अहो-रात्रः, तस्यैते गाथे तीर्थे यत् सन्धी, तस्मात् सन्धौ होतव्यम्" इति । तत्र श्रुति-लक्षणम् अग्निहोत्रम् एव कर्तव्यम्, न स्मार्तं बाहिरासनम् । तस्य कल्प्य-मूलत्वाद् इतरस्य च , क्लृप्त-मूलत्वाद् अति । 12जैमिनिरत्याह— 13विरोधे त्वनपेक्षं स्यादसति हनुमानमिति ॥ ९॥

10 सर्वान्रागान्वाससि वर्जयेत्

सर्वान् रागान् वाससि वर्जयेत् १०

▼

⑤

>
▼ Bühler

10. He shall avoid all dyed dresses, 14

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वान्रागान्वाससि वर्जयेत् ॥ १० ॥

टिप्पनी⑥

कुसुम्भादयस्सर्वे रागाः वाससि वर्जनीयाः, न केनचिद्रक्त-वासो बिभृयादिति ॥ १०॥

11 कृष्णञ् च स्वाभाविकम्

(वस्त्रं यत्) कृष्णं च स्वाभाविकम् ११

▼

⑤

>
▼ Bühler

11. And all naturally black cloth.

▼ हरदत्त-टीका

सूत्रम्⑥

कृष्णं च स्वाभाविकम् ॥ ११ ॥

टिप्पनी⑥

यश् च स्वभावतः कृष्णं कम्बलादि तदपि न वसीत ॥ ११ ॥

12 अनूद्भासि वासो वसीत

अनूद्भासि वासो वसीत १२

▼

⑤

>

▼ Bühler

12. He shall wear a dress that is neither shining,

▼ हरदत्त-टीका

सूत्रम्⑥

अनूद्भासि वासो वसीत ॥ १२ ॥

टिप्पनी⑥

उद्भासनशीलमुद्भासि उल्बणम् । ततोऽन्यदनूद्भासि । छान्दसो दीर्घः । एवंभूतं वासो वसीत् आच्छादयेत् ॥ १२ ॥

13 अप्रतिकृष्टञ् च शक्तिविषये

अ-प्रतिकृष्टं *(जीर्णत्वादेः)* च शक्तिविषये १३

▼

⑤

>

▼ Bühler

13. Nor despicable, if he is able (to afford it). 15

▼ हरदत्त-टीका

सूत्रम्⑥

अप्रतिकृष्टं च शक्तिविषये ॥ १३ ॥

टिप्पनी⑥

प्रतिकृष्टं निकृष्टं जीर्णं मलवत् स्थूलं च । तद्विपरीतमप्रतिकृष्टम् । तादृशं च वासो वसीत शक्तौ सत्याम् ॥ १३ ॥

14 दिवा च शिरसः

दिवा च शिरसः प्रावरणं वर्जयेन् - मूत्र-पुरीषयोः कर्म परिहाप्य १४

▼

⑤

>
▼ Bühler

14. And in the day-time he shall avoid to wrap up his head, except when voiding excrements.

▼ हरदत्त-टीका

सूत्रम्⑥

दिवा च शिरसः प्रावरणं वर्जयेन् - मूत्र-पुरीषयोः कर्म परिहाप्य ॥ १४॥

टिप्पनी⑥

चकारः पूर्वापेक्षया समुच्चयार्थः । दिवा शिरसः प्रावरणं पटादिना न कुर्यात् । किमविशेषेण ? नेत्याह- मूत्रपुरीषयोः कर्म क्रियां परिहाप्य वर्जयित्वा ॥ १४ ॥

15 शिरस्तु प्रावृत्य मूत्रपुरीषे

शिरस् तु प्रावृत्य मूत्र-पुरीषे कुर्याद् - भूम्यां किंचिद् *(तृणादि)* अन्तर्धाय १५

▼

⑤

>
▼ Bühler

15. But when voiding excrements, he shall envelop his head and place some (grass or the like) on the ground. 16

▼ हरदत्त-टीका

सूत्रम्⑥

शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्यात् भूम्यां किञ्चिदन्तर्धाय ॥ १५ ॥

टिप्पनी⑥

दिवा रात्रौ च मूत्रपुरीषे कुर्वन् शिरः प्रावृत्त्य कुर्यात् । भूम्यां किञ्चिदन्तर्धाय तृणादिकम्, न साक्षात् भूम्यामेव । इह कामचारे प्राप्ते 'दिवा च शिरसः प्रावरणं वर्जये'दित्युक्तम् । तस्य पर्युदासः कृतः-'मूत्रपुरीषयोः कर्म परिहाप्ये'ति । तत्र मूत्रपुरीषकाले स एव कामचारः स्थितः। अत आरभ्यते-शिरस्तु प्रावृत्येति । एवं तर्हीदमेवाऽस्तु । न पूर्वः पर्युदासः। सोऽप्यवश्यं कर्तव्यः । अन्यथा 'शिरस्तु प्रावृत्ये'त्यस्य रात्रौ चरितार्थत्वात् दिवा प्रतिषेध एव स्यात् । गौतमस्त रात्रौ सदैव प्रावरणमाह17 'न प्रावृत्त्य शिरोऽहनि पर्यटेत्, प्रावृत्य रात्री, मुत्रोच्चारे चे'ति ॥ १५ ॥

16 छायायाम्मूत्रपुरीषयोः कर्म वर्जयेत्

छायायाम् मूत्रपुरीषयोः कर्म वर्जयेत् १६

▼

⑤

>

▼ Bühler

16. He shall not void excrements in the shade (of a tree, where travellers rest).

▼ हरदत्त-टीका

सूत्रम्⑥

छायायां मूत्रपुरीषयोः कर्म वर्जयेत् ॥ १६ ॥

टिप्पनी⑥

'न चोपजीव्यच्छायास्वि'ति स्मृत्यन्तरे दर्शनात् यस्यां पथिकादयो विश्राम्यन्ति सा गृह्यते । तेन छत्रछायादेरप्रतिषेधः मेघच्छायाया अप्यप्रतिषेधः, अवर्जनीयत्वात् ॥ १६ ॥

17 स्वान् तु छायामवमेहेत्

स्वां तु छायाम् अव-मेहेत् १७

▼

⑤

>
▼ Bühler

17. But he may discharge urine on his own shadow.

▼ हरदत्त-टीका

सूत्रम्⑥

स्वां तु छायामवमेहेत् ॥ १७॥

टिप्पनी⑥

छान्दसस्तुगभावः । द्वितीयाश्रुतेः प्रतिशब्दाध्याहारः । अवमेहनं मूत्रकर्म । अनुपजीव्यत्वान्नायं पूर्वस्य प्रतिषेधस्य विषय इति प्रतिप्रसवोऽयं न भवति । तेन सति सम्भवे स्वामेव छायां प्रत्यवमेढव्यम् ॥१७॥

18 न सोपानह्मूत्रपुरीषे कुर्यात्कृष्टे

न सोपानह् मूत्र-पुरीषे कुर्यात्, कृष्टे, पथ्य्, अप्सु च १८

▼

⑤

>
▼ Bühler

18. He shall not void excrements with his shoes on, nor on a ploughed field, nor on a path, nor in water. 18

▼ हरदत्त-टीका

सूत्रम्⑥

19 न सोपानन्मूत्रपुरीषे कुर्यात् ॥ १८ ॥

टिप्पनी⑥

(अग्रिमे सूत्रे द्रष्टव्यम्)

सूत्रम्⑥

कृष्टे ॥ १९ ॥

सूत्रम्⑥

पथि ॥२०॥

सूत्रम्⑥

अप्सु च ॥२१॥

टिप्पनी⑥

स्पष्टानि चत्वारि ॥ १८-२१ ॥

19 तथा ष्ठेवनमैथुनयोः कर्माप्सु

तथा ष्ठेवन-मैथुनयोः कर्माप्सु वर्जयेत् १९

▼

⑤

>
▼ Bühler

19. He shall also avoid to spit into, or to have connection with a woman in water. 20

▼ हरदत्त-टीका

सूत्रम्⑥

तथा21ष्ठेवनमैथुनयोः कर्माऽप्सु वर्जयेत् ॥२२॥

टिप्पनी⑥

ष्ठेवनमास्यश्लेष्मादीनामुत्सर्गः ॥ २२ ॥

20 अग्निमादित्यमपो ब्राह्मणङ् गा

अग्निम् आदित्यम् अपो ब्राह्मणं गा देवताश् चाभिमुखो मूत्र-पुरीषयोः कर्म वर्जयेत् २०

▼

⑤

>
▼ Bühler

20. He shall not void excrements facing the fire, the sun, water, a Brāhmaṇa, cows, or (images of) the gods. 22

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निमादित्यमपो ब्राह्मणं गा देवताश्चाऽभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत् ॥ २३ ॥

टिप्पनी⑥

देवताः देवता प्रतिमाः ॥२३॥

21 अश्मानं लोष्ठमार्द्राअनोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः

अश्मानं, लोष्ठम्,
आर्द्रान् ओषधि-वनस्पतीन्*(←पुष्पैर् विना फलन्ति)* ऊर्ध्वान् *(→वातादिभिर् अभग्नान्)* आच्छिद्य,
मूत्र-पुरीषयोः शुन्धने वर्जयेत् २१

▼

⑤

>
▼ Bühler

21. He shall avoid to clean his body from excrements with a stone, a clod of earth, or with (boughs of) herbs or trees which he has broken off, whilst they were on the tree and full of sap.

▼ हरदत्त-टीका

सूत्रम्⑥

अश्मानं लोष्टमानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुन्धने वर्जयेत् ॥ २४ ॥

टिप्पनी⑥

फल-पाकावसाना **ओषधयः** ।
ये पुष्पैर् विना फलन्ति ते **वनस्पतयः** ।
आर्द्रान् इति वचनात् शुष्केषु न दोषः ।
ऊर्ध्वान् इति वचनाद् वातादि-निमित्तेन भग्नेषु न दोषः। 'एतैरश्मादिभिमूत्रपुरीषयोश्शोधनं न कुर्यात् ॥

22 अग्निमपो ब्राह्मणङ् गा

अग्निम्, अपो, ब्राह्मणं, गा, देवता, द्वारं, प्रतीवातं च
शक्ति-विषये नाभिप्रसारयीत *(पादौ)*२२

▼

⑤

>
▼ Bühler

22. If possible, he shall not stretch out his feet towards a fire, water, a Brāhmaṇa, a cow, (iniages of) the gods, a door, or against the wind. 23

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निमादित्यमपो ब्राह्मणं गा देवताद्वारं प्रति पादं च शक्तिविषये नाऽभिप्रसारयीत ॥ २५॥

टिप्पनी⑥

शक्तौ सत्यां अग्न्यादीन्प्रति पादौ न प्रसारयेत् ॥ २५ ॥

23 अथाप्युदाहरन्ति

अथाप्य् उदाहरन्ति *(ऽग्रे वक्ष्यमाणम्)* २३

▼

⑤

>

▼ Bühler

23. Now they quote also (the following verse):

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽप्युदाहरन्ति ॥ २६ ॥

टिप्पनी⑥

॥ इत्यापस्तम्बधर्मसूत्र प्रथमप्रश्ने त्रिंशी कण्डिका ॥ ३०॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
5. आप० ध० १.३०.८.↩
6. मनु० रमृ० २.६↩

7. गौ० ध० १. १, २↩

8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

9. गौ० २, ११, 'सज्योतिषि' इत्यादि 'गौतम' इत्यन्तं नास्ति छ. पु.↩

10. आप० ध० १. ३१. १.↩

11. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

13. आप० ध० १.३०.८.↩

14. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

15. Manu II, 35.↩

16. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

17. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

18. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

21. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

22. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

23. Manu II, 69; Yājñ. I, 15.↩

३१①

01 प्राङ्मुखोऽन्नानि भुञ्जीत उच्चरेद्दक्षिणामुखः④

> प्राङ्-मुखो ऽन्नानि भुञ्जीत
> उच्चरेद् दक्षिणा-मुखः ।
> उदङ्-मुखो मूत्रं कुर्यात्
> प्रत्यक्-पादावनेजनम्

इति १

▼

⑤

>

▼ Bühler

1. He shall eat facing the east, void fæces facing, the south, discharge urine facing the north, and wash his feet turned towards the west.

▼ हरदत्त-टीका

सूत्रम्⑥

प्राङ्मुखोऽन्नानि भुञ्जीत्तोच्चरेद्दक्षिणामुखः ।
उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनमिति ॥१॥

टिप्पनी⑥

उच्चारः पुरीषकर्म । पादावनेजनं पादप्रक्षालनम् । भोजनादिषु चतस्रो नियम्यन्ते । मनुस्तु—
1 'आयुष्यं प्राङ्मुखो भुक्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्त2 ऋतं भुङ्क्ते उदङ्मुखः' ॥ इति।
याज्ञल्क्यश्च —
3 'दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः।
कुर्यान्मूत्रपुरीषे तु रात्री चेद्दक्षिणामुखः ॥' इति ॥ १॥
02 आराच्चावसथान्मूत्रपुरीषे कुर्याद्दक्षिणान् दिशन्

आराच् चावसथान् मूत्रपुरीषे कुर्याद्, दक्षिणां दिशं दक्षिणापरां वा २

▼

⑤

>

▼ Bühler

2. He shall void excrements far from his house, having gone towards the south or south-west. 4

▼ हरदत्त-टीका

सूत्रम्⑥

आराच्चाऽऽवसथान्मूत्रपुरीषे कुर्याद्दक्षिणां दिशं दक्षिणापरां वा ॥ २॥

टिप्पनी⑥

आवसथो गृहम् । तस्य दूरतो मूत्रपुरीषे कुर्यात्, दक्षिणां दिशम् । द्वितीयानिर्देशादभिनिष्क्रम्येति गम्यते । दक्षिणापरा नैर्ऋती ॥२॥

03 अस्तमिते च बहिर्ग्रामादारादावसथाद्वा

अस्तम् इते च
बहिर् ग्रामाद्,
आराद् आवसथाद् वा मूत्रपुरीषयोः कर्म वर्जयेत् ३

▼

⑤

>
▼ Bühler

3. But after sunset he must not void excrements outside the village or far from his house.

▼ हरदत्त-टीका

सूत्रम्⑥

अस्तमिते च बहिर्ग्रामादारादावसथान्मूमूत्रपुरीषयोः कर्म वर्जयेत् ॥ ३ ॥

टिप्पनी⑥

अस्तमित आदित्ये बहिर्ग्रामान्मूत्रपुरीषे न कुर्यात् । तथा अन्तर्ग्रामेऽपि गृहस्य दूरतो न कुर्यात् । दृष्टार्थोऽयं प्रतिषेधश्चोरव्याघ्रादिशङ्कया । निर्भये देशे नाऽस्ति दोषः ॥ ३ ॥

04 देवताभिधानञ् चाप्रयतः

देवताभिधानं चाप्रयतः ४

▼

⑤

>
▼ Bühler

4. And as long as he is impure he (shall avoid) to pronounce the names of the gods.

▼ हरदत्त-टीका

सूत्रम्⑥

देवताभिधानं चाऽप्रयतः॥ ४ ॥

टिप्पनी⑥

देवतानामन्यादीनामभिधानं चाऽप्रयतस्मन् वर्जयेत् । 5अपिधानमित्यपि पाठे एष एवार्थः ॥ ४॥

05 परुषञ् चोभयोर् देवतानां

परुषं *(वचनं)* चोभयोर् देवतानां राज्ञश् च *(वर्जयेत्)* ५

▼

⑤

>
▼ Bühler

5. And he shall not speak evil of the gods or of the king. 6

▼ हरदत्त-टीका

सूत्रम्⑥

परुषं चोभयोर्देवतानां राज्ञश्च ॥५॥

टिप्पनी⑥

देवतानां राज्ञश्चेत्युभयोः । राश्यपेक्षया द्विवचनम् । परुष निन्दां वर्जयेत् ॥५॥

06 ब्राह्मणस्य गोरिति पदोपस्पर्शनं

ब्राह्मणस्य गोर् इति पदोपस्पर्शनं वर्जयेत् ६

▼

⑤

>
▼ Bühler

6. He shall not touch with his foot a Brāhmaṇa, a cow, nor any other (venerable beings).

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मणस्य गोरिति पदोपस्पर्शनं वर्जयेत् ॥ ६॥

टिप्पनी⑥

ब्राह्मणं गां च पादेन नोपस्पृशेत् । इतिशब्दः प्रकारे । तेन विद्यावयोवृद्धानामब्राह्मणानामपि वर्जनम् ॥ ॥६॥

07 हस्तेन चाकारणात्

हस्तेन चाकारणात् ७

▼

⑤

>

▼ Bühler

7. (Nor shall he touch them) with his hand, except for particular reasons.

▼ हरदत्त-टीका

सूत्रम्⑥

हस्तेन चाऽकारणात् ॥ ७॥

टिप्पनी⑥

कारणमभ्यङ्गकण्डूयनादि । तेन विना हस्तेनाऽप्युपस्पर्शनं वर्जयेत् पूर्वोक्तानाम् ॥ ७॥

08 गोर्दक्षिणानाङ् कुमार्याश्च परीवादान्

गोर्, दक्षिणानां, कुमार्याश् च परीवादान् वर्जयेत् ८

▼

⑤

>

▼ Bühler

8. He shall not mention the blemishes of a cow, of sacrificial presents, or of a girl. 7

▼ हरदत्त-टीका

सूत्रम्⑥

गोर्दक्षिणानां कुमार्याश्च परीवादान्वर्जयेत् ॥ ८ ॥

टिप्पनी⑥

गोरदक्षिणाया अपि दक्षिणानामगवामपि हिरण्यादीनां कुमार्याः कन्यायाश्च दोषान् सतोऽपि न कथयेत् । अध्यात्मप्रकरणे योगाङ्गतया परीवादः प्रतिषिद्धः । अनन्तरं च वक्ष्यति8 'क्रोधादींश्च भूतदाहीयान् वर्जयेदिति । इदं तु वचनं गवादिषु प्रायश्चित्तातिरेकार्थम् ॥ ८ ॥

09 स्पृहतीञ् च गान्

(सस्यधान्यादिकं भक्षयन्तीं←) स्पृहतीं च गां नाचक्षीत *(तत्स्वामिने)* ९

▼

⑤

>

▼ Bühler

9. And he shall not announce it (to the owner) if a cow does damage (by eating corn or grass in a field).

▼ हरदत्त-टीका

सूत्रम्⑥

स्पृहतीं च गां नाऽऽचक्षीत ॥ ९ ॥

टिप्पनी⑥

स्पृहतीं सस्यधान्यादिकं भक्षयन्तीं गां स्वामिने न ब्रूयात् ॥ ९ ॥

10 संसृष्टाञ् च वत्सेनानिमित्ते

संसृष्टां *(गां)* च वत्सेनानिमित्ते *(नाचक्षीत तत्स्वामिने)*१०

▼

⑤

>

▼ Bühler

10. (Nor shall he call attention to it) if a cow is together with her calf, except for a particular reason.

▼ हरदत्त-टीका

सूत्रम्⑥

संसृष्टां च वत्सेनाऽनिमित्ते ॥१०॥

टिप्पनी⑥

या च गौर्वत्सेन संसृजते तामपि न ब्रूयादनिमित्ते-इयं ते गौर्वत्सेन पीयत इति । 'अनिमित्ते' इति वचनात्9 'यस्य हविषे वत्सा अपाकृता धयेयुरि'त्यादिके निमित्ते सति वक्तुर्नास्ति दोषः ॥ १०॥

11 नाधेनुमधेनुरिति ब्रूयात् धेनुभव्येत्येव

नाधेनुम् अधेनुर् इति ब्रूयात् - "धेनुभव्ये"त्य् एव ब्रूयात् ११

▼

⑤

>
▼ Bühler

11. And of a cow which is not a milch-cow he shall not say, 'She is not a milch-cow.' He must say, 'This is a cow which will become a milch-cow.'

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽधेनुमधेनुरिति ब्रूयात् । धेनुभव्येत्येव ब्रयात् ॥ ११ ॥

टिप्पनी⑥

या च गौरधेनुः पयस्विनी भवति तामप्यधेनुरिति न ब्रूयात् ॥११॥

किं तर्हि धेनुभव्येत्येव ब्रूयात- भविष्यन्ती धेनुर्धेनुभव्या । 'धेनोर्भव्यायां (मुम् वक्तव्य) इति मुम् न भवति । च्व्यग्तत्वेनाऽव्ययत्वात् । वक्तव्यत्वे च सति शब्दनियमोऽयम् । न पुनरधेनुदर्शन एवं वक्तव्यम् ॥१२॥

12 न भद्रम्भद्रमिति ब्रूयात्

न भद्रम् "भद्रम्" इति ब्रूयात् । *(तत्-स्थाने)* "पुण्यं प्रशास्तम्" इत्येव ब्रूयात् १२

▼

⑤

>
▼ Bühler

12. He shall not call 'lucky' that which is lucky. He shall call it 'a mercy, a blessing.' 10

▼ हरदत्त-टीका

सूत्रम्⑥

11 न भद्रं भद्रमिति ब्रूयात् ॥ १३ ॥

टिप्पनी⑥

यत् भद्रं तत् भद्रमिति न ब्रूयात् ॥ १३ ॥

सूत्रम्⑥

पुण्यं प्रशास्तमित्येव ब्रूयात् ॥१४॥

प्रस्तावः⑥

किं तु?

टिप्पनी⑥

पुण्यं प्रशास्तमित्यनयोरन्यतरेण शब्देन ब्रूयात् । प्रशास्तं प्रशस्तम् । छान्दसो दीर्घः ॥ १४॥

13 वत्सतन्तीञ् च नोपरि

वत्स-तन्तीं च नोपरि गच्छेत् १३

▼

⑤

>
▼ Bühler

13. He shall not step over a rope to which a calf (or cow) is tied. 12

▼ हरदत्त-टीका

सूत्रम्⑥

13 वत्सतन्ती च नोपरि गच्छेत् ॥ १५ ॥

टिप्पनी⑥

वत्सानां बन्धरज्जुर्वत्सतन्ती । तस्या उपरि न गच्छेत् तां न लङ्घयेत् । वत्सग्रहणं गोजातेरुपलक्षणम् ॥ १५॥

14 प्रेङ्खावन्तरेण (डोलास्तम्भौ) च

प्रेङ्खाव्*(=डोलास्तम्भौ)* अन्तरेण च नातीयात् १४

▼

⑤

>
▼ Bühler

14. He shall not pass between the posts from which a swing is suspended. 14

▼ हरदत्त-टीका

सूत्रम्⑥

प्रेङ्खावन्तरेण च नाऽतीयात् ॥ १६॥

टिप्पनी⑥

प्रेङ्खौ डोलास्तम्भौ । तोरणस्तम्भावित्यन्ये । ताव् **अन्तरेण** नाऽतीयात्- तयोर्मध्ये न गच्छेत् ॥ १६ ॥

15 नासौ मे सपत्न

न "+असौ मे सपत्न" ब्रूयात् । यद्यसौ मे सपत्न इति ब्रूयाद्, द्विषन्तं भ्रातृव्यं जनयेत् १५

▼

⑤

>
▼ Bühler

15. (In company) he shall not say, 'This person is my enemy.' If he says, 'This person is my enemy,' he will raise for himself an enemy, who will show his hatred.

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽसौ मे सपत्न इति ब्रूयात् यद्यसौ में सपत्न इति ब्रूयात् द्विषन्तं भ्रातृव्यं जनयेत् ॥ १७ ॥

टिप्पनी⑥

असौ देवदत्तो मे सपत्न इति न ब्रूयात् सदसि । किं कारणम् ? यद्यसौ मे सपत्न इति ब्रूयात्, द्विषन्तं, क्रियाशब्दोऽयम्, विद्विषाणं भ्रातृव्यं सपत्नं जनयेत् 'व्यन् सपत्ने' इति भ्रातृशब्दे व्यन् प्रत्ययः । एवं युक्ते स मन्येत-नाऽकस्मादयं ब्रूते नूनमस्य मयि द्वेषो वर्तत इति । ततश्च तत्प्रतीकारार्थं यतमानस्सपत्न एव जायते इति ॥ १७ ॥

16 नेन्द्रधनुरिति परस्मै प्रब्रूयात्

नेन्द्र-धनुर् इति परस्मै प्रब्रूयात् १६

▼

⑤

>
▼ Bühler

16. If he sees a rainbow, he must not say to others, 'Here is Indra's bow.' 15

▼ हरदत्त-टीका

सूत्रम्⑥

नेन्द्रधनुरिति परस्मै प्रब्रूयात् ॥ १८ ॥

टिप्पनी⑥

इन्द्रधनुराकाशे पश्यन् परस्मै तेन शब्देन न ब्रूयात् । यद्यवश्यं वक्तव्यं मणिधनुरिति ब्रूयात् । गौतमीये 16 दर्शनात् ॥ १८ ॥

17 न पततः सञ्चक्षीतः

न पततः *(=पक्षिणः/ asteroids)* संचक्षीतः*(=गणयेत्)* १७

▼

⑤

>
▼ Bühler

17. He shall not count (a flock of) birds. 17

▼ हरदत्त-टीका

सूत्रम्⑥

न पततः सञ्चक्षीत ॥ १९ ॥

टिप्पनी⑥

पततः पक्षिणः सङ्घीभूय स्थितान्न सञ्चक्षीत न गणयेत्— इयन्त एत इति । अपर आह— 'पुण्यक्षयेण स्वर्गात्पततः सुकृतिनः परस्मै न सञ्चक्षीत-ज्योतींषि पतन्तीति न कथयेत् ॥ १९ ॥

18 उद्यन्तमस्तं यन्तञ् चादित्यन्

उद्यन्तम् अस्तं यन्तं चादित्यं दर्शने वर्जयेत् १८

▼

⑤

>
▼ Bühler

18. He shall avoid to look at the sun when he rises or sets. 18

▼ हरदत्त-टीका

सूत्रम्⑥

उद्यन्तमस्तं यन्तं चाऽऽदित्यं दर्शने वर्जयेत् ॥२०॥

टिप्पनी⑥

उदयसमये अस्तमयसमये वा आदित्यं न पश्येत् ।
19मनुस्तु —

> नेक्षेतोद्यन्तम् आदित्यं
> नाऽस्तं यन्तं कदाचन ।
> नोपरक्तं न वारिस्थं
> न मध्यं नभसो गतम् ॥

इति ॥ २० ॥

19 दिवादित्यः सत्त्वानि गोपायति

दिवादित्यः सत्त्वानि गोपायति,
नक्तं चन्द्रमास्,
तस्माद् अमावास्यायां निशायां स्वाधीय*(=साधीय)* आत्मनो गुप्तिम् इच्छेत्
प्रायत्य-ब्रह्मचर्य-काले चर्यया च १९

▼

⑤

>
▼ Bühler

19. During the day the sun protects the creatures, during the night the moon. Therefore let him eagerly strive to protect himself on the night of the new moon by purity, continence, and rites adapted for the season.

▼ हरदत्त-टीका

सूत्रम्⑥

दिवाऽऽदित्यः सत्वानि गोपायति नक्तं चन्द्रमाः । तस्मादमावास्यायां निशायां स्वाधीय आत्मनो गुप्तिमिच्छेत् प्रायत्यब्रह्मचर्यकाले चर्यया च ॥ २१ ॥

टिप्पनी⑥

दिवा अहनि । **आदित्यः** सत्वानि **गोपायति** प्राणिनो रक्षति, आलोकदानेन ।
नक्तं रात्रौ **चन्द्रमाः** ।
तस्माद् अमावास्यायां निशायां रात्रौ
स्वाधीयः । वकारश्छान्दसः । अन्तिकवाढयोर्नेदसाधौ ।
बाढतरं भृशतरं आत्मनो गुप्तिं रक्षणमिच्छेत् ।

केन प्रकारेण ?
प्रायत्य-ब्रह्मचर्याभ्यां काले चर्यया च । अयं तावदर्थानुरूपः पाठः। अधीयमानस्तु प्रमादश्छान्दसो वा । प्रयतस्य भावः प्रायत्यं नित्यप्रायत्यादधिकेन प्रायत्येन स्नानादिजेन । ब्रह्मचर्येण मैथुनत्यागेन । काले कृतया चर्यया देवार्चनजपादिकया च ॥ २१ ॥

20 सह ह्येतां रात्रिं

सह ह्य् एतां रात्रिं सूर्याचन्द्रमसौ वसतः २०

▼

⑤

>
▼ Bühler

20. For during that night the sun and the moon dwell together.

▼ हरदत्त-टीका

सूत्रम्⑥

सह ह्येतां रात्रिं सूर्याचन्द्रमसौ वसतः ॥ २२ ॥

प्रस्तावः⑥

कस्मात्पुनरस्यां रात्रौ चन्द्रमा न गोपायतीत्याह —

टिप्पनी⑥

एतां रात्रिम् । अत्यन्तसंयोगे द्वितीया । सर्वामेतां रात्रिं सूर्याचन्द्रमसौ सह वसतः । न च सूर्येण सह वसतश्चन्द्रमसः प्रकाशोऽस्ति ॥ २२ ॥

21 न कुसृत्या ग्रामम्

न कुसृत्या ग्रामं प्रविशेत् ।
यदि प्रविशेन् "नमो रुद्राय वास्तोष्पतय" इत्येताम् ऋचं जपेद् अन्यां वा रौद्रीम् २१

▼

⑤

>
▼ Bühler

21. He shall not enter the village by a by path. If he enters it thus, he shall mutter this Ṛk-verse, 'Praise be to Rudra, the lord of the dwelling,' or some other (verse) addressed to Rudra. 20

▼ हरदत्त-टीका

सूत्रम्⑥

न कुसृत्या ग्रामं प्रविशेत् ॥ २३ ॥

टिप्पनी⑥

कुसृतिः कुमार्गः । तया ग्रामं न प्रविशेत् ॥ २३॥

सूत्रम्⑥

यदि प्रविशे'न्नमो रुद्राय वास्तोष्पत्तय' इत्येतामृचं जपेदन्यां वा रौद्रीम् ॥ २४ ॥

टिप्पनी⑥

यदि गत्यन्तराभावात् प्रविशेत21 'नमो रुद्राये'त्यादिकामृचं जपेत् । अन्यां वा रौद्रीम्22 'इमां रुद्राय तवस'इत्यादिकाम् । अत्र वाजसनेयगृह्ये— 23 वनं प्रवेक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय वनसदे स्वस्ति मा सम्पारये'ति । पन्थानमारोक्ष्यन्ननुमन्त्रयते 'नमो रुद्राय पथिपदे स्वस्ति मा सम्पारये'ति । अपः प्रवेक्ष्यन्ननुमन्त्रयते— 'नमो रुद्रायाऽप्सुषदे स्वस्ति मा सम्पारयेति । तस्माद्यत्किञ्चन कर्म कुर्वन् स्यात् सर्वं 'नमो रुद्राये'त्येव कुर्यात् 'सर्वो ह्येष रुद्र' इति श्रुतेरिति । भारद्वाजगृह्येऽप्यस्मिन्विषये कियानेव भेदः ॥२४॥

22 नाब्राह्मणायोच्छिष्टम् प्रयच्छेत् यदि

नाब्राह्मणायोच्छिष्टं प्रयच्छेत् ।
यदि प्रयच्छेद् - दन्तान् स्कुप्त्वा, तस्मिन्न् अवधाय प्रयच्छेत् २२

▼

⑤

>
▼ Bühler

22. He shall not (ordinarily) give the residue of his food to a person who is not a Brāhmaṇa. When he gives it (to such a one), he shall clean his teeth and give (the food) after having placed in it (the dirt from his teeth). 24

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽब्राह्मणायोच्छिष्टं प्रयच्छेत् ॥ २५ ॥

टिप्पनी⑥

अब्राह्मणः शुद्रः । 25 'न शूद्रायोच्छिष्टमनुच्छिष्टं वा दद्या'दिति वासिष्ठे दर्शनात् । तस्मा उच्छिष्टं न प्रयच्छे'दित्यनाश्रितविषयम् ॥ २५ ॥

सूत्रम्⑥

यदि प्रयच्छेद्दन्तान् स्कुप्त्वा तस्मिन्नवधाय प्रयच्छेत् ॥२६॥

टिप्पनी⑥

इदमाश्रितविषयम् । दन्तान्नखेन स्कुपवा विलिख्य तन्मलं तस्मिन्नुच्छिष्टेऽवधाय प्रयच्छेत् । 'स्कुप्त्वे'ति स्कुभ्नातेः क्त्वाप्रत्यये छान्दसं भकारस्य चर्त्वम् । स्कुनोतेर्वा पकार उपजनः ॥ २६ ॥

23 क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत्

क्रोधादींश् च भूत-दाहीयान् दोषान् वर्जयेत् २३

▼

⑤

>
▼ Bühler

23. And let him avoid the faults that destroy the creatures, such as anger and the like. 26

▼ हरदत्त-टीका

सूत्रम्⑥

क्रोधादींश्च भूतदाहीयान्दोषान्वर्जयेत् ॥ २७ ॥

टिप्पनी⑥

क्रोधादयो भूतदाहीया अध्यात्मपटले(२२.५) व्याख्याताः । तद्वचनं योगिविषयमित्ययोगिनोऽपि स्नातकस्य क्रोधादिनिवृत्त्यर्थमिदं वचनम् । इदमेव तर्ह्युभयार्थमस्तु-योग्यर्थमयोग्यर्थं च । एवं सिद्धे तद्वचनं क्रोधादिवर्जनस्य योगाङ्गत्वप्रतिपादनार्थम् । तेन क्रोधाद्यनुष्ठाने योगसिद्धिर्न भवति । न पुनः स्नातकव्रतलोपप्रायश्चितमिति ॥२७॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने एकत्रिंशी कण्डिका ॥ ३१ ॥

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

4. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

7. Manu II, 35.↩

8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

13. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

14. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

15. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

16. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

17. Manu II, 69; Yājñ. I, 15.↩

18. Manu II, 144.↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. Manu II, 146-148.↩

21. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

22. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

23. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

24. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

25. आप० ध० १.३०.८.↩

26. Manu II, 147.↩

३२①

01 प्रवचनयुक्तो वर्षाशरदम् मैथुनं④

प्रवचन-युक्तो वर्षा-शरदं मैथुनं वर्जयेत् १

▼

⑤

>

▼ Bühler

1. Let him who teaches, avoid connubial intercourse during the rainy season and in autumn. 1

▼ हरदत्त-टीका

सूत्रम्⑥

प्रवचनयुक्तो वर्षाशरदं मैथुनं वर्जयेत् ॥ १॥

टिप्पनी⑥

प्रवचनमध्यापनम् । तेन युक्तो वर्षासु शरदि च मैथुनं वर्जयेत् ऋतावपि ॥१॥

02 मिथुनीभूय च न

मिथुनी-भूय च, न तया सह सर्वां रात्रिं शयीत २

▼

⑤

>
▼ Bühler

2. And if he has had connection (with his wife), he shall not lie with her during the whole night 2

▼ हरदत्त-टीका

सूत्रम्⑥

मिथुनीभूय च न तया सह सर्वां रात्रिं शयीत ॥ २॥

टिप्पनी⑥

मिथुनीभूय मैथुनं कृत्वा तया भार्यया सह तां रात्रिं सर्वां न शयीत ॥ २ ॥

03 शयानश्चाध्यापनं वर्जयेत्

शयानश् चाध्यापनं वर्जयेत् ३

▼

⑤

>
▼ Bühler

3. He shall not teach whilst he is lying on a bed.

▼ हरदत्त-टीका

सूत्रम्⑥

शयानश्चाऽध्यापनं वर्जयेत् ॥ ३॥

टिप्पनी⑥

दिवा नक्तं च शयानस्याऽध्यापनप्रतिषेधः। स्वयं तु धारणार्थमधीयानस्य न दोषः ॥ ३ ॥

04 न च तस्यां

न च तस्यां शय्यायाम् अध्यापयेद् यस्यां शयीत ४

▼

⑤

>

▼ Bühler

4. Nor shall he teach (sitting) on that couch on which he lies (at night with his wife).

▼ हरदत्त-टीका

सूत्रम्⑥

न च तस्यां शय्यायामध्यापयेद्यस्यां शयीत ॥४॥

टिप्पनी⑥

यस्या शय्यायां भार्यया सह शयीत रात्रौ तस्यां शय्यायामासीनोऽपि नाऽध्यापयेत् ॥ ४॥

05 अनाविःस्रगनुलेपणः स्यात्

अन्-आविः*(भूत)*-स्रग्-अनुलेपणः स्यात् ५

▼

⑤

>

▼ Bühler

5. He shall not show himself adorned with a garland, or anointed with ointments. 3

▼ हरदत्त-टीका

सूत्रम्⑥

अनाविःस्रगनुलेपणस्स्यात् ॥ ५ ॥

टिप्पनी⑥

आविर्-भूते प्रकाशिते स्रगनुलेपने यस्य एवंभूतो न स्यात् । णत्वं पूर्ववत् ॥ ५ ॥

06 सदा निशायान् दारम्

सदा निशायां दारं प्रत्य् अलंकुर्वीत ६

▼

⑤

>
▼ Bühler

6. At night he shall always adorn himself for his wife.

▼ हरदत्त-टीका

सूत्रम्⑥

सदा निशायां दारं प्रत्यलङ्कुर्वीत ॥ ६ ॥

टिप्पनी⑥

'दारं प्रतीति वचनादुपगमनार्थमलङ्करणम् । तेन भार्या अशक्त्यादिना उपगमनायोग्यत्वे नाऽयं नियमः ॥ ६ ॥

07 सशिरावमज्जनमप्सु वर्जयेत्

(नित्य-स्नाने स्नातकोचिते) सशिरा वमज्जनम् अप्सु वर्जयेत् ७

▼

⑤

>
▼ Bühler

7. Let him not submerge his head together with his body (in bathing),

▼ हरदत्त-टीका

सूत्रम्⑥

सशिरा वमज्जनमप्सु वर्जयेत ॥७॥

टिप्पनी⑥

वमज्जनम् अवमज्जनम् ।

'वष्टि वागुरिरल्लोपमवाप्योरुपसर्गयो'रित्य् अकारलोपः ।
तत् **सशिरा** वर्जयेत् ।
सह शिरसा स्नानं न कुर्यात् ।

अवगाहन-विधयः सर्वे स्नातक-व्यतिरिक्ते चरितार्थाः, नैमित्तिकाश् च ।
स्नातकस्य तु नित्य-स्नानम् अवगाहन-रूपं न भवतीत्य् आचार्यस्य पक्षः ॥ ७ ॥

08 अस्तमिते च स्नानम्

अस्तम् इते च स्नानम् *(वर्जयेत्)*८

▼

⑤

>
▼ Bühler

8. And (let him avoid) to bathe after sunset.

▼ हरदत्त-टीका

सूत्रम्⑥

अस्तमिते च स्नानम् ॥ ८ ॥

टिप्पनी⑥

अस्तमिते आदित्ये सर्वप्रकारं स्नानं वर्जयेत् ॥ ८॥

09 पालाशमासनम् पादुके दन्तप्रक्षालनमिति

पालाशम् {आसनं, पादुके, दन्त-प्रक्षालनम्} इति च वर्जयेत् ९

▼

⑤

>
▼ Bühler

9. Let him avoid to use a seat, clogs, sticks for cleaning the teeth, (and other utensils) made of Palāśa-wood.

▼ हरदत्त-टीका

सूत्रम्⑥

पालाशमासनं पादुके दन्तप्रक्षालनमिति च वर्जयेत् ॥ ९ ॥

टिप्पनी⑥

पालाशमासनादि वर्जयेत् । दन्तप्रक्षालनं दन्तकाष्ठम् । इतिशब्दः प्रकारे। तेनाऽन्यदपि गृहोपकरणं पालाशं वर्जयेत् ॥ ६ ॥

10 स्तुतिञ् च गुरोः

स्तुतिं च गुरोः समक्षं - यथा "सुस्नातम्" इति १०

▼

⑤

>

▼ Bühler

10. Let him avoid to praise (himself) before his teacher, saying, 'I have properly bathed or the like.'

▼ हरदत्त-टीका

सूत्रम्⑥

स्तुतिं च गुरोस्समक्षं यथा सुस्नातमिति ॥१०॥

टिप्पनी⑥

'सुस्नात'मित्यादिकां च स्तुतिं गुरोस्सन्निधौ वर्जयेत् ॥१०॥

11 आ निशाया जागरणम्

आ *(मध्य)*निशाया जागरणम् *(स्यात्)* ११

▼

⑤

>
▼ Bühler

11. Let him be awake from midnight.

▼ हरदत्त-टीका

सूत्रम्⑥

आ निशाया जागरणम् ॥ ११ ॥

टिप्पनी⑥

निशा रात्रेर्मध्यमो भागः । आ तस्मात् जागृयात् न स्वप्यात् ॥११॥

12 अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः

अनध्यायो निशायाम् *(=रात्रेर् मध्यभागः)* - अन्यत्र धर्मोपदेशाच् छिष्येभ्यः १२

▼

⑤

>
▼ Bühler

12. Let him not study (or teach) in the middle of the night; but (he may point out) their duties to his pupils.

▼ हरदत्त-टीका

सूत्रम्⑥

अनध्यायो निशायामन्यत्र धर्मोपदेशाच्छिष्येभ्यः ॥१२॥

टिप्पनी⑥

निशायामनध्यायः अध्ययनमध्यापनं च न कुर्यात् । शिष्येभ्यस्तु धर्मोपदेशोऽनुज्ञायते ॥ १२ ॥

13 मनसा वा स्वयम्

मनसा वा स्वयम् *(अधीयीत)*॥ १३ ॥

▼

⑤

>
▼ Bühler

13. Or (he may) by himself mentally (repeat the sacred texts).

▼ हरदत्त-टीका

सूत्रम्⑥

मनसा वा स्वयम् ॥ १३ ॥

टिप्पनी⑥

निशायामनध्यायस्य प्रतिप्रसवः-मनसा वा स्वयं चिन्तयेदिति ॥ १३ ॥

14 ऊर्ध्वम् अर्धरात्राद् अध्यापनम्

ऊर्ध्वम् अर्धरात्राद् अध्यापनम् १४

▼

⑤

>

▼ Bühler

14. After midnight he may teach.

▼ हरदत्त-टीका

सूत्रम्⑥

ऊर्ध्वमर्धरात्रादध्यापनम् ॥ १४ ॥

टिप्पनी⑥

अयमपि प्रतिप्रसवः । निशायामपि षोडश्या नाडिकाया आरभ्याध्यापनं भवतीति ॥१४॥

15 नापरराात्रमुत्थायानध्याय इति संविशेत्

नापरराात्रम् उत्थायानध्याय इति संविशेत् १५

▼

⑤

>

▼ Bühler

15. When he has risen (at midnight, and taught) during the third watch of the night, let him not lie down again (saying), 'Studying is forbidden.' 4

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽपररात्रमुत्थायाऽनध्याय इति संविशेत् ॥ १५ ॥

टिप्पनी⑥

रात्रेस्तृतीयो भागोऽपररात्रः । ऊर्ध्वमर्धरात्रादुत्थायाऽध्यापयन्नपररात्रे न संविशेत् न शयीत । यद्यपि तस्मिन्नष्टम्यादिरनध्यायः प्राप्तो भवति । किं पुनः स्वाध्याये । तथा च मनुः— 5'न निशान्ते परिश्रान्तो ब्रह्माऽधीत्य पुनः स्वपेत् ।' इति ॥१५॥

16 काममपश् शयीत

कामम् *(स्तम्बादिषु लीनः)* अपश्-शयीत १६

▼

⑤

>

▼ Bühler

16. At his pleasure he may (sleep) leaning (against a post or the like).

▼ हरदत्त-टीका

सूत्रम्⑥

6काममपशयीत ॥ १६ ॥

टिप्पनी⑥

अनेन स्तम्भाद्य्-उपाश्रयणेनाऽऽसीनस्य स्वापो ऽनुशायते । श्रिञ् सेवायाम् । तत्र रेफलोपश् छान्दसः। तथा शकारस्य द्विर्वचनम् ॥ १६ ॥

17 मनसा वाधीयीत

मनसा वाधीयीत १७

▼

⑤

>
▼ Bühler

17. Or he may mentally repeat (the sacred texts).

▼ हरदत्त-टीका

सूत्रम्⑥

मनसा वाऽधीयीत ॥ १७ ॥

टिप्पनी⑥

अयमप्यूर्ध्वमर्धरात्रादुत्थायाऽध्यापयतोऽनध्यायप्राप्तावेवोच्यते। म नसा प्राप्तं प्रदेशमधीयीत स्वयं चिन्तयेत् । उपाश्रित्य वा स्वप्यात् ॥१७॥

18 क्षुद्रान्क्षुद्राचरितांश्च देशान्न सेवेत

क्षुद्रान्, क्षुद्राचरितांश् च देशान् न सेवेत १८

▼

⑤

>
▼ Bühler

18. Let him not visit inferior men (such as Niṣādas), nor countries which are inhabited by them, 7

▼ हरदत्त-टीका

सूत्रम्⑥

क्षुद्रान् क्षुद्राचारितांश्च देशान्न सेवेत ॥ १८ ॥

टिप्पनी⑥

क्षुद्रानल्पकान् पुरुषान्न सेवेत । क्षुद्रैर्निषादादिभिरधिष्ठितांश्च देशान्न सेवेत ॥१८॥

19 सभाः समाजांश्च

सभाः समाजांश्*(=जनयूथं)* च १९

▼

⑤

>
▼ Bühler

19. Nor assemblies and crowds.

▼ हरदत्त-टीका

सूत्रम्⑥

सभास्समाजांश्च ॥ १९ ॥

टिप्पनी⑥

सभास्समाजाश्च व्याख्याताः। तान्न सेवेत ॥ १९ ॥

20 समाजञ् चेद्गच्छेत् प्रदक्षिणीकृत्यापेयात्

समाजं*(=जनयूथं)* चेद् गच्छेत्, *(निर्गच्छन्)* प्रदक्षिणी-कृत्यापेयात् २०

▼

⑤

>
▼ Bühler

20. If he has entered a crowd, he shall leave it, turning his right hand towards the crowd.

▼ हरदत्त-टीका

सूत्रम्⑥

समाजं चेद्गच्छेत्प्रदक्षिणीकृत्याऽपेयात् ॥ २०॥

टिप्पनी⑥

यद्यर्थात् समाजं गच्छेत् तं प्रदक्षिणीकृत्याऽपेयादपगच्छेत् ॥ २० ॥

21 नगरप्रवेशनानि च वर्जयेत्

नगर-प्रवेशनानि च वर्जयेत् २१

▼

⑤

>

▼ Bühler

21. Nor shall he enter towns frequently.

▼ हरदत्त-टीका

सूत्रम्⑥

नगरप्रवेशनानि च वर्जयेत् ॥ २१ ॥

टिप्पनी⑥

बहुवचननिर्देशात् बहुकृत्वो नगरं न प्रवेष्टव्यम् । यदाकदाचिद्यादृच्छिके प्रवेशे न प्रायश्चित्तम् ॥ २१ ॥

22 प्रश्नञ् च न

*(दुर्बोध्यार्थ-)*प्रश्नं*(→प्रश्नोत्तरं)* च न विब्रूयात् २२

▼

⑤

>

▼ Bühler

22. Let him not answer directly a question (that is difficult to decide).

▼ हरदत्त-टीका

सूत्रम्⑥

प्रश्नं च न विब्रूयात् ॥ २२ ॥

टिप्पनी⑥

विविच्य वचनं विवचनं निर्णयः । पृष्टम् अर्थं न विविच्य ब्रूयादिदमित्थमिति । दुर्निरूपार्थ-विषयम् इदम् ॥ २२ ॥

23 अथाप्युदाहरन्ति

अथाप्य् उदाहरन्ति *(वक्ष्यमाणं श्लोकम्)* २३

▼

⑤

>
▼ Bühler

23. Now they quote also (the following verse):

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽप्युदाहरान्ति ॥ २३ ॥

टिप्पनी⑥

अपि चाऽस्मिन्नर्थे श्लोकमुदाहरन्ति ॥ २३ ॥

24 मूलन् तूलं वृहति

> मूलं तूलं*(→आगामिनी सम्पत्)* वृहति*(=उत्पाटयति)*
> दुर्विवक्तुः प्रजां पशून् आयतनं हिनस्ति ।
> "धर्मप्रह्राद! न कुमालनाय *(इदं कुकर्म)*"
> रुदन् ह मृत्युर् व्य्-उवाच *(ऋषिकृतं)* प्रश्नम्
> *("केनानवधानेन पातितेन मच्छिशुर् मृत" इति)*

इति २४

▼

⑤

>
▼ Bühler

24. (The foolish decision) of a person who decides wrongly destroys his ancestors and his future happiness, it harms his children, cattle, and house. 'Oh Dharmaprahrāda, (this deed belongs) not to Kumālana!' thus decided Death, weeping, the question (addressed to him by the Ṛṣi). 8

▼ हरदत्त-टीका

सूत्रम्⑥

मूलं तूलं वृहति दुर्विवक्तुः प्रजां पशुनायतनं हिनस्ति । धर्मप्रह्राद न कुमालनाय रुदन् ह मृत्युर्व्युवाच प्रश्नम् । इति ॥ २४ ॥

टिप्पनी⑥

दुर्निरूपमर्थं सहसा निर्णीयं यो दुर्विवक्ति, अन्यथा वर्णयति स दुर्विवक्ता । तस्य **दुर्विवक्तुस्** तदेव दुर्वचनमेव मूलं तूलं च वृहति । **मूलं** पितृधनम् । **तूलम्** आगामिनी सम्पत् । तदुभयमपि **वृहति** उत्पाटयति । दन्तोष्ट्योः वकारः। किमेतावदेव ? न, **प्रजां** पुत्रादिकाम् । **पशून** गवादिकान् । **आयतनं** गृहं च **हिनस्ति** । अतो दुर्वचनसम्भवात् प्रश्नमात्रमेव न विब्रूयादिति।

अत्रेतिहासः —

कस्यचिद् ऋषेर् धर्मप्रह्रादः कुमालनश्चेति द्वौ शिष्यावास्ताम् ।
तौ कदाचिद् अरण्यान् महान्तौ समिद्-भाराव् आहृत्य श्रमाद्9 दृष्टिपूत एवाचार्यगृहे प्राक्षिपताम् ।
तयोरकेनाऽऽक्रान्त आचार्यस्य शिशुः पुत्रो मृतः ।
ततः शिष्यावाहूयाऽऽचार्यः पप्रच्छ- "केनायं मारित" इति ।

तावुभावपि न मयेत्य् ऊचतुः ।
तथा पतितस्य परित्यागम् अदुष्टस्य परिग्रहं कर्तुम् अशक्नुवन्न् ऋषिर् मुत्युम् आहूय पप्रच्छ- "केनायं व्यापादित" इति ।
ततो धर्मसङ्कटे पतितो मृत्यू रुदन्न् एव प्रश्नं **व्युवाच** विविच्य कथितवान् ।

कथम् ? **हे धर्मप्रह्लाद न कुमालनाय** । षष्ठपर्थे चतुर्थी । कुमानलस्य नेदं पतनीयम् इति । धर्मप्रह्लाद त्वयेदं कृतम् इति वक्तव्ये इतरस्य नाऽस्तीत्युक्तम् । तथापीतरस्यास्तीत्य् अर्थाद् गम्यते । इति रुदन् ह व्युवाचेति । ह-शब्द ऐतिह्यत्वद्योतनार्थः । प्रह्लादशब्दे हकारात्परो रेफश्छान्दसः ॥ २४ ॥

25 गार्दभं यानमारोहणे विषमारोहणावरोहणानि

गार्दभं यानम् आरोहणे,
विषमारोहणावरोहणानि च वर्जयेत् २५

▼

⑤

>
▼ Bühler

25. Let him not ascend a carriage yoked with asses; and let him avoid to ascend or to descend from vehicles in difficult places.

▼ हरदत्त-टीका

सूत्रम्⑥

गादर्भं यानमारोहणे विषमारोहणावरोहणानि च वर्जयेत् ॥ २५ ॥

टिप्पनी⑥

गर्दभयुक्तं यानं गार्दभं शकटादि । **आरोहणे** वर्जयेत् नाऽऽरोहेत् । तथा विषमेषु निम्नोन्नतेष्वारोहणमवरोहणं च वर्जयेत् । उन्नतेष्वारोहणं निम्नेष्ववरोहणम् ॥ २५॥

26 बाहुभ्याञ् च नदीतरम्

बाहुभ्यां च नदी-तरम् २६

▼

⑤

>

▼ Bühler

26. And (let him avoid) to cross a river swimming. 10

▼ हरदत्त-टीका

सूत्रम्⑥

बाहुभ्यां च नदीतरणम् ॥ २६ ॥

टिप्पनी⑥

तरण तरः । बाहुभ्यां च नद्यास्तरणं वर्जयेत् । 'बाहुभ्यां'मिति वचनात् प्लवादिना न दोषः ॥ २६ ॥

27 नावाञ् च सांशयिकीम्

नावां च सांशयिकीम् *(वर्जयेत्)*२७

▼

⑤

>
▼ Bühler

27. And (let him avoid) ships of doubtful (solidity).

▼ हरदत्त-टीका

सूत्रम्⑥

नावं च सांशयिकीम् ॥ २७ ॥

टिप्पनी⑥

भिद्यते न वेति संशयमापन्ना सांशयिकी नौः । जीर्णां नावं वर्जयेत् । 'नावा'मिति षष्ठयन्तपाठे नावां मध्ये सांशयिकीं नावं वर्जयेत् ॥ २७॥

28 तृणच्छेदनलोष्टविमर्दनाष्ठेवनानि चाकारणात्

तृण-च्छेदन-लोष्ट-विमर्दनाष्ठेवनानि चाकारणात् २८

▼

⑤

>
▼ Bühler

28. He shall avoid cutting grass, crushing clods of earth, and spitting, without a particular reason, 11

▼ हरदत्त-टीका

सूत्रम्⑥

तृणच्छेदनलोष्टविमर्दनष्ठेवनानि चाऽकारणात् ॥ २८॥

टिप्पनी⑥

तृणच्छेदनादि नाऽकारणाद्वर्जयेत् न कुर्यात् । तृणच्छेदनस्याऽग्निज्वलनादि कारणम् । ष्ठेवनस्य कारणं प्रतिश्यायादि । इतरच्च मृग्यम् ॥

29 यच्चान्यत्परिचक्षते यच्चान्यत्परिचक्षते

यच् चान्यत् परिचक्षते, यच् चान्यत् परिचक्षते २९

▼

⑤

>

▼ Bühler

29. And whatever else they forbid.

▼ हरदत्त-टीका

सूत्रम्⑥

यच्चाऽन्यत्परिचक्षते यच्चाऽन्यत्परिचक्षते ॥ २९ ॥

टिप्पनी⑥

यच्चाऽन्यदेवं युक्तमाचार्याः परिचक्षते वर्जयन्ति तदप्यक्षक्रीडादि वर्जयेत् । द्विरुक्तिः प्रश्नपरिसमाप्तिकृता ॥ २९ ॥

॥ इत्यापस्तम्बधर्मसूत्रवृत्तौ प्रथमप्रश्ने द्वात्रिंशी कण्डिका ॥ ३२ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायामेकादशः पटलः ॥

॥ समाप्तः प्रथमः पश्नः ॥
॥ श्रीः ॥

इत्येकादशः पटलः

इति प्रथमोऽध्यायः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. Manu II, 35.↩
4. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
7. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

8. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

11. Manu II, 69; Yājñ. I, 15.↩

२①

০২①

०१①

01 पाणिग्रहणादधि गृहमेधिनोर्व्रतम्④

पाणिग्रहणादधि गृहमेधिनोर्व्रतम् १

▼

⑤

>
▼ Bühler

1. After marriage the rites prescribed for a householder and his wife (must be performed). 1

▼ हरदत्त-टीका

सूत्रम्⑥

पाणिग्रहणादधि गृहमेधिनोव्रतम् ॥१॥

टिप्पनी⑥

पूर्वस्मिन् प्रश्न आद्ययो' पटलयोः प्रायेण ब्रह्मचारिणो धर्मा उक्ताः। इतरेष्वष्टसु सर्वाश्रमाणाम् । एकादशे समावृत्तस्य । इदानीं पाणिग्रहणादारभ्य कर्तव्यानि कर्माण्युच्यन्ते । पाणिर्यस्मि2न्नहनि गृह्यते तत्पाणिग्रहणम्3 । अधिशब्द ऊर्ध्वार्थे वर्तते । तस्मादूर्ध्वं गृहमेहधिनोर्गृहस्थाश्रमवतोः यद्व्रतं नियतं कर्तव्यम्, जातावेकवचनम्, तदुच्यते । 'पाणिग्रहणादधी'ति वचनं4 भार्यादिरग्निर्दायादिर्वे'ति शास्त्रान्तरोक्तो विकल्पो मा भूदिति । 'गृहमेधिनो'रिति द्विवचनमन्यतरमरणे मा भूदिति5 । वैश्वदेवं तु विधुरा अपि कुर्वन्ति ॥ १॥

02 कालयोर्भोजनम्

कालयोर्भोजनम् २

▼

⑤

>

▼ Bühler

2. He shall eat at the two (appointed) times, (morning and evening) 6

▼ हरदत्त-टीका

सूत्रम्⑥

कालयोर्भोजनम् ॥ २ ॥

टिप्पनी⑥

कालयोरुभयोरपि भोजनं कर्तव्यम्-सायं प्रातश्च, नाऽन्तरेति परिसङ्ख्येयम्, भोजनस्य रागप्राप्तत्वात् । मानवे च स्पष्टमुक्तम्—
7 सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।
नाऽन्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥' इति ।
अन्ये तु नियमं मन्यन्ते8 शक्तौ सत्यां गृहमेधिनोरुभयोरपि कालयोरवश्यं भोक्तव्यं प्राणाग्निहोत्रस्याऽलोपायेति ।

तथा च बौधायनः—
9 'गृहस्थो ब्रह्मचारी वा योऽनश्नंस्तु तपश्चरेत् ।

प्राणाग्निहोत्रलोपेन ह्यवकीर्णी भवेत्तु सः ॥ इति ।
10अन्यत्र प्रायश्चित्तात् । प्रायश्चित्ते तु तदेव विधानमिति ॥२॥

03 अतृप्तिश्चान्नस्य

अतृप्तिश्चान्नस्य ३

▼

⑤

>
▼ Bühler

3. And he shall not eat to repletion.

▼ हरदत्त-टीका

सूत्रम्⑥

अतृप्तिश्चाऽन्नस्य ॥ ३ ॥

टिप्पनी⑥

सुहितार्थयोगे करणे षष्ठी भवति । 11'पूरणगुणसुहितार्थे'ति ज्ञापनात् । अनेन तृप्तिं न गच्छताम् । यावत्तृप्ति न भोक्तव्यम् ॥३॥

04 पर्वसु चोभयोर् उपवासः

पर्वसु चोभयोर् उपवासः ४

▼

⑤

>
▼ Bühler

4. And both (the householder and his wife) shall fast on (the days of) the new, and full moon,

▼ हरदत्त-टीका

सूत्रम्⑥

पर्वसु चोभयोरुपवासः ॥ ४॥

टिप्पनी⑥

पक्षसन्धिः पर्व । इह तु तद्युक्तमहर्गृह्यते । तेषु पर्वसूभयोर्दम्पत्योरुपवासः कर्तव्यः । उपवासो भोजनलोपः ॥ ४॥

05 औपवस्तम् एव कालान्तरे

औपवस्तम् एव कालान्तरे भोजनम् ५

▼

⑤

>
▼ Bühler

5. To eat once (on those days in the morning) that also is called fasting. 12

▼ हरदत्त-टीका

सूत्रम्⑥

औपवस्तमेव कालान्तरे भोजनम् ॥ ५ ॥

प्रस्तावः⑥

जातिविशेषादुभयोरपि कालयोः प्राप्तावाह—

टिप्पनी⑥

यत्कालान्तरे एकस्मिन् काले भोजनं तदप्यौ13पवस्तमेव उपवास एव । 14 'औपवस्तं तूपवासः' इति निघण्टुः । तदपि दिवा, न रात्रौ; श्रोते तथा दर्शनात् 15 न तस्य सायमश्नीयादिति । तदिह 16 एवमत ऊर्ध्वमित्यादि गृह्ये यदुक्तं तत्रत्य उपवासो व्याख्यातः ॥ ५ ॥

06 तृप्तिश् चान्नस्य

तृप्तिश् चान्नस्य ६

▼

⑤

>

▼ Bühler

6. And they may eat (at that meal) until they are quite satisfied.

▼ हरदत्त-टीका

सूत्रम्⑥

तृप्तिश्चाऽन्नस्य ॥ ६॥

टिप्पनी⑥

पर्वसु सकृद्भुञ्जानौ यावत्तृप्ति भुजीयाताम् ॥ ६ ॥

07 यच्चैनयोः प्रियं स्यात्

यच्चैनयोः प्रियं स्यात् तद् एतस्मिन्न् अहनि भुञ्जीयाताम् ७

▼

⑤

>
▼ Bühler

7. And on (the anniversary of) that (wedding)-day they may eat that food of which they are fond. 17

▼ हरदत्त-टीका

सूत्रम्⑥

यच्चैनयोः प्रियं स्यात्तदेतस्मिन्नहानि भुञ्जीयाताम् ॥७॥

टिप्पनी⑥

'एतस्मिन्नहनी'ति न वक्तव्यम् । प्रकृतत्वात् । यथा 'तृप्तिश्चान्नस्ये'ति पर्वसु भवति, एवमिदमपि भविष्यति। किं च 'पर्वस्विति बहुवचनान्तस्य प्रकृतस्य 'एतस्मिन्नहनी'त्येकवचनान्तेन प्रत्यवमर्शो नाऽतीव समञ्जसः । तस्माद्व्यवहितमपि पाणिग्रहणमहः प्रत्यवमृश्यते । एतदर्थमेव च गृह्ये 18एतदहर्विजानीयाद्यदहर्भार्यामावहत' इत्युक्तम् । एतस्मिन् पाणिग्रहणेऽहनि यदेनयोर्दम्पत्योः प्रियं तत् भुञ्जीयाताम् । न तु 'नाऽऽत्मार्थमभिरूपमन्नं पाचये'(२.७-४)दिति निषेधस्याऽय विषय इति । प्रतिसंवत्सरं चैतत्कर्तव्यम् । यथा चैत्रे मासि स्वातौ कृतविवाहस्याऽपरस्मिन्नपि संवत्सरे तस्मिन्मासे स्वातावेव कार्यम् । एवं हि तदेवाऽहरिति भवति । प्रतिमासं तु नक्षत्रागमेऽपि चैत्रादिभेदान्न तदेवेति प्रतिपत्तिः । तस्मात् प्रतिसंवत्सरमिदं विवाहनक्षत्रे कर्तव्यम् । 19यथा राज्ञामभिषेकनक्षत्रमेवं हि गृहमेधिनोर्विवाहनक्षत्रमिति ॥ ७ ॥

08 अधश्च शयीयाताम्

अधश्च शयीयाताम् ८

▼

⑤

>
▼ Bühler

8. And (on the night of that day) they shall sleep on the ground (on a raised heap of earth). 20

▼ हरदत्त-टीका

सूत्रम्⑥

अधश्च शयीयाताम् ॥ ८ ॥

टिप्पनी⑥

एतस्मिन्नहनि स्थण्डिलशायिनौ स्याताम् ॥ ८॥

09 मैथुनवर्जनञ् च

मैथुनवर्जनं च ९

▼

⑤

>
▼ Bühler

9. And they shall avoid connubial intercourse.

▼ हरदत्त-टीका

सूत्रम्⑥

मैथुनवर्जनं च ॥९॥

टिप्पनी⑥

21मैथुनवर्जनं चैतस्मिन्नहनि कर्तव्यम् ॥ ९ ॥

10 श्वोभूते स्थालीपाकः

श्वोभूते स्थालीपाकः १०

▼

⑤

>

▼ Bühler

10. And on the day after (that day) a Sthālīpāka must be offered. 22

▼ हरदत्त-टीका

सूत्रम्⑥

श्वो भूते स्थालीपाकः ॥ १० ॥

टिप्पनी⑥

स्थालीपाकश्च कर्तव्योऽपरेद्युः ॥ १० ॥

11 तस्योपचारः पार्वणेन व्याख्यातः

तस्योपचारः पार्वणेन व्याख्यातः ११

▼

⑤

>

▼ Bühler

11. The manner in which that offering must be 23 performed has been declared by (the description of the Sthālīpāka) to be performed on the days of the new and full moon (the Pārvaṇa).

▼ हरदत्त-टीका

सूत्रम्⑥

तस्योपचारः पार्वणेन व्याख्यातः ॥११॥

टिप्पनी⑥

तस्य स्थालीपाकस्योपचारः प्रयोगप्रकारः पार्वणेन व्याख्यातः । एतदेव ज्ञापयति-न सामयाचारिकेषु पार्वणातिदेश प्रवर्तत इति । केचित्तु सर्वमेवैतत्पर्वविषयं मन्यन्ते । तेषामुक्तो दोषः । 'पार्वणेन व्याख्यात' इति चाऽनुपपन्नम् । न हि स एव तेन व्याख्यातो भवति । 'श्वो भूते स्थालीपाक' इति च व्यर्थम् । 24 उपोषिताभ्यां पर्वसु कार्य' इति पूर्वमेवोक्तत्वात् । 'एतदहर्विजानीया'दिति चास्य प्रयोजनं तत्पक्षे चिन्त्यम्25 ॥ ११॥

12 नित्यं लोक उपदिशन्ति

नित्यं लोक उपदिशन्ति १२

▼

⑤

>

▼ Bühler

12. And they declare (that this rite which is known) amongst the people (must be performed) every (year). 26

▼ हरदत्त-टीका

सूत्रम्⑥

नित्यं लोक उपदिशन्ति ॥ १२ ॥

टिप्पनी⑥

लोके शिष्टाचारसिद्धमेतत्कर्म नित्यं प्रतिसंवत्सरं कर्तव्यमिति शिष्टा उपदिशन्ति । अपर आह- वक्ष्यमाणं कर्म शिष्टाचारसिद्धं नित्यं सार्वत्रिकं इति शिष्टा उपदिशन्ति ॥ १२ ॥

13 यत्र क्व चाग्निमुपसमाधास्यन्स्यात्तत्र

यत्र क्व चाग्निमुपसमाधास्यन्स्यात्तत्र प्राचीरुदीचीश्च तिस्रस्तिस्रो लेखा लिखित्वाद्भिरवोक्ष्याग्निमुपसमिन्ध्यात् १३

▼

⑤

>

▼ Bühler

13. At every (burnt-offering), when he wishes to place the fire on the altar (called Sthaṇḍila), let him draw on that (altar) three lines from west to east and three lines from south to north, and sprinkle (the altar) with water, turning the palm of the hand downwards, and let him then make the fire burn brightly by adding (fuel). 27

▼ हरदत्त-टीका

सूत्रम्⑥

यत्र क्व चाऽग्निमुपसमाधास्यन् स्यात्तत्र प्राचीरुदीचीश्च तिस्रस्तिस्रो रेखा लिखित्वाऽद्भिरवोक्ष्याऽग्निमुपसमिन्ध्यात् ॥ १३ ॥

टिप्पनी⑥

होमप्रसङ्गादिदमुच्यते- यत्र क्व च गार्ह्ये सामयाचारिके वा कर्मणि गृहेऽरण्ये वाऽग्निमुपसमाधास्यन् प्रतिष्ठापयिष्यन् स्यात्तत्र पूर्वं प्राचीः प्रागग्रास्तिस्रो रेखा विलिखेत् । तत उदीची उदगग्रास्तिस्रः। एवं तिस्रो लेखा लिखित्वाऽद्भिरवोक्षेत् । अवोक्ष्याऽग्निं श्रोत्रियागारादाहृत्य प्रतिष्ठाप्योपसमिन्ध्यादुपसमिन्धीत काष्ठैरभिज्वलयेत् । तत्र28 'पुरस्तादुदग्वोपक्रमः, तथापवर्ग' इति परिभाषितम् । उपदेशक्रमाच्च प्राच्या पूर्वं लेखा लेखनीयाः ततश्चोदीच्यः29।

30प्राची पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत् ।
अथोदीचीः पुरस्संस्थं पश्चिमारम्भमालिखेत् ॥
31अन्ये तु प्राचीरुदगारम्भं दक्षिणान्तमालिखन्ति ॥ १३ ॥

14 उत्सिच्यैतदुदकमुत्तरेण पूर्वेण वान्यदुपदध्यात्

(शिष्टम् उदकम्) उत्सिच्यैतदुदकमुत्तरेण पूर्वेण वान्यदुपदध्यात् १४

▼

⑤

>

▼ Bühler

14. He shall pour out (the remainder of) this water used for sprinkling, to the north or to the east (of the altar), and take other (water into the vessel).

▼ हरदत्त-टीका

सूत्रम्⑥

उत्सिच्यैतदुदकमुत्तरेण पूर्वेण वाऽन्यदुपदध्यात् ॥१४॥

टिप्पनी⑥

एतदवोक्षणशेषोदकमग्नेरुत्तरतः पूर्वतो वा उत्सिञ्चेत् । उसिच्याऽन्यदुदकं पात्रस्थमुपदध्यात्तत्रैव ॥ १४ ॥

15 नित्यमुदधानान्यद्भिररिक्तानि स्युर्गृहमेधिनोर्व्रतम्

नित्यमुदधानान्यद्भिररिक्तानि स्युर्गृहमेधिनोर्व्रतम् १५

▼

⑤

>
▼ Bühler

15. The water-vessels in the house shall never be empty; that is the duty to be observed by the householder and his wife. 32

▼ हरदत्त-टीका

सूत्रम्⑥

नित्यमुदधानान्यद्भिररिक्तानि स्युर्गृहमेधिनोर्व्रतम् ॥१५॥

टिप्पनी⑥

गृहे यावन्त्युदधानान्युदपात्राणि घटकरकादीनि तानि सदाऽद्भिररिक्तानि स्युः । एतदपि गृहमेधिनोर्व्रतम् । पुनः 'गृहमेधिनोरिति वचनमस्मिन् कर्मणि स्वयं कर्तृत्वमेव यथा स्यात् प्रयोजककर्तृत्वं मा भूदिति।
अन्य आह— पुन'र्गृहमेधिनो'रिति वचनात् पूर्वसूत्रं ब्रह्मचारिविषयेऽपि 'सावित्र्या समित्सहरमाध्या' (१.२६.१.)दित्यादौ भवति । पाके तु स्त्रिया न भवति । 'उपसमाधास्य'न्निति लिङ्गस्य विवक्षितत्वात् । आर्याः प्रयता' (२.३.१.) इत्यादौ भवतीति ॥१५॥

16 अहन्यसंवेशनम्

अहन्यसंवेशनम् १६

▼

⑤

>

▼ Bühler

16. Let him not have connubial intercourse (with his wife) in the day-time.

▼ हरदत्त-टीका

सूत्रम्⑥

अहन्यसंवेशनम् ॥ १६ ॥

टिप्पनी⑥

संवेशन मैथुनं तदहनि न कर्तव्यम् ॥ १६ ॥

17 ऋतौ च सन्निपातो

ऋतौ च संनिपातो दारेणानुव्रतम् १७

▼

⑤

>

▼ Bühler

17. But let him have connection with his wife at the proper time, according to the rules (of the law). 33

▼ हरदत्त-टीका

सूत्रम्⑥

ऋतौ च सन्निपातो दारेणाऽनुव्रतम् ॥ १७ ॥

टिप्पनी⑥

रजोदर्शनादारभ्य षोडशाऽहोरात्रा ऋतुः । तत्र च सन्निपातः संयागो दारेण सह कर्तव्यः । छान्दसमेकवचनम् । 34 नित्यं बहुवचनान्तो हि दारशब्दः । अनुव्रतं शास्त्रतो नियमो व्रतं, तदनुरोधेन । तत्र मनुः—

35 ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
चतुर्भिरितरैस्सार्धमहोभिस्सद्विगर्हितैः ॥
तासामाद्याश्चतस्त्रस्तु निन्द्या एकादशी च या ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः'॥
36 अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् ॥
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ।' इति ।
याज्ञवल्क्यस्तु —
37एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् । इति ।
आचार्यस्तु चतुर्थींप्रभृति गमनमाह-38चतुर्थिप्रभृत्याषोडषीमुत्तरामुत्तरां युग्मां प्रजानिश्रेयसमृतुगमनमित्युपदिशन्ति' इति । तदिह षोडशसु रात्रिष्वादितस्तिस्रस्सर्वथा वर्ज्याः । चतुर्थ्येकादशी त्रयोदशी चाऽऽचार्येणाऽनुज्ञाताः मनुना निषिद्धाः । इतरासु दशसु युग्मासु पुत्राः जायन्ते, स्त्रियोऽयुग्मासु । तत्र चो'त्तरामुत्तरा'मिति वचनात् षोडश्यां रात्रौ मघादियोगाभावे गच्छतस्सर्वत उत्कृष्टः पुत्रो भवति । चतुर्थ्यामवमः । मध्ये कल्प्यम् । एवं पञ्चदश्यामुत्कृष्टा दुहिता । पञ्चम्यामवमा । मध्ये कल्प्यम् । षोडशस्वेव गमनं गर्भहेतुः । तत्रापि प्रथमम् । एवं स्थिते नियमविधिरयं-योग्यत्वे सत्यृताववश्यं सन्निपतेत्, असन्निपतन् पुत्रोत्पत्तिं निरुन्धानः प्रत्यवेयादिति । तथा च दोषस्मृतिः—

39 ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति ।
तस्या रजसि तं मासं पितरस्तस्य शेरते ॥' इति ।

पुत्रगुणार्थितया पूर्वां पूर्वां वर्जयतो न दोषः । अन्ये तु परिसङ्ख्यां मन्यन्ते-ऋतावेव सन्निपतेन्नाऽन्यत्रेति । तेषामृतावनियमादगमनेऽपि दोषाभावाद्दोषस्मरणमनुपपन्नं स्यात् । सर्वथा विधिर्न भवति । रागप्राप्तत्वात्सन्निपातस्य ॥ १७॥

18 अन्तरालेऽपि दार एव

अन्तरालेऽपि दार एव १८

▼

⑤

>
▼ Bühler

18. Let him have connubial intercourse in the interval also, if his wife (desires it, observing the restrictions imposed by the law). 40

▼ हरदत्त-टीका

सूत्रम्⑥

अन्तरालेऽपि दार एव ॥ १८ ॥

टिप्पनी⑥

अन्तरालं मध्यम् । ऋत्वोरन्तराले मध्येऽपि सन्निपातः स्यात् दार एवं सकामे सति । यद्यात्मनो जितेन्द्रियतया न तादृशं पारवश्यम् , तथाऽपि भार्यायामिच्छन्त्यां तद्रक्षणार्थमवश्यं सन्निपतेदिति

। वक्ष्यति च 41'अप्रमत्ता रक्षथ तन्तुमेत'(२.१३.६.)मित्यादि । अनुव्रतमित्यनुवृत्तेः प्रतिषिद्धेषु दिनेषु न भवति ॥ १८॥

19 ब्राह्मणवचनाच्च संवेशनम्

ब्राह्मणवचनाच्च संवेशनम् १९

▼

⑤

>
▼ Bühler

19. (The duty of) connubial intercourse (follows from) the passage of a Brāhmaṇa, ('Let us dwell together until a son be born.') 42

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मणवचनाच्च संवेशनम् ॥ १९ ॥

टिप्पनी⑥

यदिदमनन्तरोक्तं संवेशनं तत्र ब्राह्मणवचनं प्रमाणं 43'काममाविजनितोस्सम्भवामे'ति ॥ १९ ॥

20 स्त्रीवाससैव सन्निपातः स्यात्

स्त्रीवाससैव संनिपातः स्यात् २०

▼

⑤

>
▼ Bühler

20. But during intercourse he shall be dressed in a particular dress kept for this purpose.

▼ हरदत्त-टीका

सूत्रम्⑥

स्त्रीवाससैव सन्निपातस्स्यात् ॥ २० ॥

टिप्पनी⑥

एवकारो भिन्नक्रमः । स्त्र्युपभोगार्थं वासः स्त्रीवासः । तेन सन्निपात एव स्यात् । न तेन सुप्रक्षालितेनाऽपि ब्रह्मयज्ञादि कर्तव्यमिति यावत् ॥२०॥

21 यावत्सन्निपातञ् चैव सहशय्या

यावत्संनिपातं चैव सहशय्या २१

▼

⑤

>
▼ Bühler

21. And during intercourse only they shall lie together,

▼ हरदत्त-टीका

सूत्रम्⑥

यावत्सन्निपातं चैव सह शय्या ॥ २१ ॥

टिप्पनी⑥

यावत्सन्निपातमेव दम्पत्योस्सह शयनम् ॥ २१ ॥

22 ततो नाना

ततो नाना २२

▼

⑤

>
▼ Bühler

22. Afterwards separate.

▼ हरदत्त-टीका

सूत्रम्⑥

ततो नाना ॥ २२ ॥

टिप्पनी⑥

ततः पृथक्शयीयाताम् ॥ २२ ॥

23 उदकोपस्पर्शनम्

उदकोपस्पर्शनम् २३

▼

⑤

>
▼ Bühler

23. Then they both shall bathe;

▼ हरदत्त-टीका

सूत्रम्⑥

उदकोपस्पर्शनम् ॥२३ ॥

टिप्पनी⑥

ततो द्वयोरप्युदकोपस्पर्शन स्नानं कर्तव्यम् । इदमृतुकाले ॥ २३ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायां श्रीहरदत्तविरचितायां द्वितीयप्रश्ने प्रथमा कण्डिका ॥१॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

5. आप० ध० १.३०.८.↩

6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

7. मनु० स्मृ० २.६↩

8. गौ० ध० १. १, २↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

12. Manu II, 35.↩

13. आप० ध० १.३०.८.↩

14. मनु० स्मृ० २.६↩

15. गौ० ध० १. १, २↩

16. 'मन्वादिभिरुपलभ्यते इत्यनुमीयते' इति ख. पु.↩

17. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

18. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

19. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

20. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

21. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

22. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

23. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

24. आप० ध० १.३०.८.↩

25. मनु० रमृ० २.६↩

26. Manu II, 69; Yājñ. I, 15.↩

27. Manu II, 144.↩

28. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

29. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

30. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

31. आप० ध० १.३०.८.↩

32. Manu II, 146-148.↩

33. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

34. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

35. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

36. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

37. आप० ध० १.३०.८.↩

38. मनु० रमृ० २.६↩

39. गौ० ध० १. १, २↩

40. Manu II, 147.↩

41. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

42. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

43. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

०२①

01 अपि वा लेपान्प्रक्षाल्याचम्य④

अपि वा लेपान्प्रक्षाल्याचम्य प्रोक्षणमङ्गानाम् १

▼

⑤

>

▼ Bühler

1. Or they shall remove the stains with earth or water, sip water, and sprinkle the body with water.

▼ हरदत्त-टीका

सूत्रम्⑥

अपि वा लेपान्प्रक्षाल्याऽऽचम्य प्रोक्षणमङ्गानाम् ॥ १ ॥

टिप्पनी⑥

अपि वा रेतसो रजसश्च ये लेपास्तानद्भिर्मृदा च प्रक्षाल्याऽऽचम्य अङ्गानां प्रोक्षणं शिरःप्रभृतीनां कर्तव्यम्1 । रुचितो व्यवस्था । यावता प्रयतो मन्यते ॥ १॥

02 सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं

सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् २

▼

⑤

>
▼ Bühler

2. Men of all castes, if they fulfil their (assigned) duties, enjoy (in heaven) the highest, imperishable bliss.

▼ हरदत्त-टीका

सूत्रम्⑥

सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् ॥२॥

टिप्पनी⑥

सर्वेषामेव वर्णानां ब्राह्मणादीनां चतुर्णां ये स्वधर्मा वर्णप्रयुक्ता आश्रमप्रयुक्ता उभयप्रयुक्ता वा तेषामवैगुण्येनाऽऽन्तादनुष्ठाने सति परमुत्कृष्टं अपरिमितमक्षयं सुखं स्वर्गाख्यं भवति ॥२॥

03 ततः परिवृत्तौ कर्मफलशेषेण

ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते । तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तते ३

▼

⑤

>

▼ Bühler

3. Afterwards when (a man who has fulfilled his duties) returns to this world, he obtains, by virtue of a remainder of merit, birth in a distinguished family, beauty of form, beauty of complexion, strength, aptitude for learning, wisdom, wealth, and the gift of fulfilling the laws of his (caste and order). Therefore in both worlds he dwells in happiness, (rolling) like a wheel (from the one to the other).

▼ हरदत्त-टीका

सूत्रम्⑥

ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते तच्चक्रवदुभयोर्लोकयोः सुख एव वर्तते ॥ ३ ॥

प्रस्तावः⑥

न केवलमेतावत् । किं तर्हि ?

टिप्पनी⑥

ततः सुखानुभवानन्तरं परिवृत्तिरिह लोके जन्म भवति । तस्यां च कर्मणां यः फलशेषोऽभुक्तोऽशः, तेन जातिं ब्राह्मणादिकां विशिष्टे वा कुले जन्म । रूपं कान्तिम् । वर्णं हेमादितुल्यम् । बलं प्रतिपक्षनिग्रहक्षमम् । मेधां 2 ग्रन्थधारणशक्तिम् । प्रज्ञा अर्थधारणशक्तिम् । द्रव्याणि स्वर्णादीनि । धर्मानुष्ठानम् इतिकरणाद्यच्चान्यदेवं युक्तं तत्सर्वं प्रतिपद्यते । सर्वत्र धर्मशेषो हेतुः । कर्माणि भुज्यमानानि सावशेषाणि भुज्यन्ते । ऐहिकस्य शरीरग्रहणादेरपि कर्मफलत्वात् । धर्मानुष्ठानं प्रतिपद्यत इत्युक्तम् । यदा चैवं तदा सर्ववर्णानां स्वधर्मानुष्ठान इत्यादि

प्रतिपद्यत इत्यन्तं पुनर्भवतीत्यनुक्तसिद्धम् । तत् तस्माच्चक्रवदुभयोर्लोकयोरिह चाऽमुस्मिंश्च सुख एव वर्तते न जातु चित् दुःखे वर्तते । सुखानुबन्धेनैवाऽऽवृत्तिर्भवतीत्यर्थः ॥ ३ ॥

04 यथौषधिवनस्पतीनाम् बीजस्य क्षेत्रकर्मविशेषे

यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फलपरिवृद्धिरेवम् ४

▼

⑤

>

▼ Bühler

4. As the seed of herbs (and) trees, (sown) in good and well-cultivated soil, gives manifold returns of fruit (even so it is with men who have received the various sacraments).

▼ हरदत्त-टीका

सूत्रम्⑥

यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषे फलपरिवृद्धिरेवम् ॥ ४ ॥

प्रस्तावः⑥

शरीरोत्पत्तिसंस्कारा3अप्यावश्यका इति दर्शयितुं दृष्टान्तमाह—

टिप्पनी⑥

चलोपोऽत्र द्रष्टव्यः । यथा चौषधीना ब्रीह्यादीनां वनस्पतीनां चाम्रादीनां बीजस्य क्षेत्रविशेषे कर्मविशेषे संस्कारविशेषे च क्षेत्रस्य वा कृम्यादौ कर्मविशेषे फलपरिवद्धिर्भवति । त एव ब्रीह्यादय ऊषर उप्ता न रोहन्ति । कृष्यादिपरिकर्मिते तु क्षेत्रे उप्ताः स्तम्बकरयो भवन्ति । एवं पुरुषेऽपि गर्भाधानादिसंस्कारसम्पन्ने द्रष्टव्यम् ॥ ४॥

05 एतेन दोषफलपरिवृद्धिरुक्ता

एतेन दोषफलपरिवृद्धिरुक्ता ५

▼

⑤

>
▼ Bühler

> 5. The increase of the results of sins has been explained hereby.

▼ हरदत्त-टीका

सूत्रम्⑥

एतेन दोषफलपरिवृद्धिरुक्ता ॥ ५ ॥

टिप्पनी⑥

एतेनैव न्यायेन दुष्कर्मफलपरिवद्धिरप्युक्ता वेदितव्या । 4तत्रोहेन पठनीयम्— सर्ववर्णानां स्वधर्माननुष्ठाने परमपरिमितदुःखम् । ततः परिवृत्तौ कर्मफलशेषेण दुष्टां जात्यादिकामद्रव्यान्तामधर्मानुष्ठानमिति प्रतिपद्यते । तच्चक्रवदुभयोर्दुःख एच वर्तते। यथौषधिवनस्पतीनां बीजस्य क्षेत्रकर्मविशेषाभावे फलहानिरेवमिति ॥५॥

06 स्तेनोऽभिशस्तो ब्राह्मणो राजन्यो

स्तेनोऽभिशस्तो ब्राह्मणो राजन्यो वैश्यो वा परस्मिंल् लोके परिमिते निरये वृत्ते जायते चाण्डालो ब्राह्मणः पौल्कसो राजन्यो वैणो वैश्यः ६

▼

⑤

>
▼ Bühler

6. Thus after having undergone a long punishment in the next world, a person who has stolen (the gold of a Brāhmaṇa) or killed a (Brāhmaṇa) is born again, in case he was a Brāhmaṇa as a Cāṇḍāla, in case he was a Kṣatriya as a Paulkasa, in case he was a Vaiśya as a Vaiṇa. 5

▼ हरदत्त-टीका

सूत्रम्⑥

स्तेनोऽभिशस्तो ब्राह्मणो राजन्यो वैश्यो वा परस्मिल्लोँकेऽपरिमिते निरये वृत्ते जायते चण्डालो ब्राह्मणः पौल्कसो राजन्यो वैणो वैश्यः ॥ ६ ॥

टिप्पनी⑥

दोषफलपरिवृद्धावुदाहरणमाह—

टिप्पनी⑥

स्तेनः सुवर्णचोरः । अभिशस्तो ब्रह्महा स्तेनोऽभिशस्तो वा ब्राह्मणादिरमुष्मिँल्लोकेऽपरिमिते निरये दोषफलमनुभूय तस्मिन् वृत्ते परिक्षीणे ब्राह्मणश्चण्डालो जायते । शूद्रात् ब्राह्मण्यां जातश्चण्डालः, राजन्यः, पौल्कसः । शूद्राक्षत्रियायां जातः पुल्कसः । स एव पौलकसः । प्रज्ञादित्वादण् । वैश्यो, वैणो जायते6 वेणुना नर्तको वैणः ॥ ६॥

07 एतेनान्ये दोषफलैः कर्मभिः

एतेनान्ये दोषफलैः कर्मभिः परिध्वंसा दोषफलासु योनिषु जायन्ते वर्णपरिध्वंसायाम् ७

▼

⑤

>

▼ Bühler

7. In the same manner other (sinners) who have become outcasts in consequence of their sinful actions are born again, on account of (these) sins, losing their caste, in the wombs (of various animals). 7

▼ हरदत्त-टीका

सूत्रम्⑥

एतेनाऽन्ये दोषफलैः कर्मभिः परिध्वंसा दोषफलासु योनिषु जायन्ते वर्णपरिध्वंसायाम् ॥ ७ ॥

टिप्पनी⑥

वर्णपरिध्वंसा वर्णेभ्यः प्रच्यवनं तस्यां वर्णपरिध्वंसायाम् । यथा ब्राह्मणादयश्चण्डालाद्या जायन्ते । एतेन प्रकारेण स्तेनाभिशस्ताभ्यां अन्येऽपि दोषफलैः कर्मभिर्दोषफलासु सूकरादिषु, योनिषु जायन्ते । परिध्वंसाः स्वजातिपरिभ्रष्टा इत्यर्थः । ते तथाऽवगन्तव्या इति ॥ ७ ॥

08 यथा चाण्डालोपस्पर्शने सम्भाषायान्

यथा चाण्डालोपस्पर्शने संभाषायां दर्शने च दोषस्तत्र प्रायश्चित्तम् ८

▼

⑤

>

▼ Bühler

8. As it is sinful to touch a Cāṇḍāla, (so it is also sinful) to speak to him or to look at him. The penance for these (offences will be declared).

▼ हरदत्त-टीका

सूत्रम्⑥

यथा चण्डालोपस्पर्शने सम्भाषायां दर्शने च दोषस्तत्र प्रायश्चित्तम् ॥ ८॥

टिप्पनी⑥

चण्डालोपोस्पर्शने दोषो भवति । तथा सम्भाषायां दर्शने च । उपसमस्तमपि चण्डालग्रहणमभिसम्बध्यते । तत्र सर्वत्र प्रायश्चित्तं वक्ष्यते ॥८॥

09 अवगाहनमपामुपस्पर्शने सम्भाषायाम् ब्राह्मणसम्भाषा

अवगाहनमपामुपस्पर्शने संभाषायां ब्राह्मणसंभाषा दर्शने ज्योतिषां दर्शनम् ९

▼

⑤

>

▼ Bühler

9. (The penance) for touching him is to bathe, submerging the whole body; for speaking to him to speak to a Brāhmaṇa; for looking at him to look at the lights (of heaven).

▼ हरदत्त-टीका

सूत्रम्⑥

अवगाहनमपामुपस्पर्शने ॥९॥
सम्भाषायां ब्राह्मणसम्भाषा ॥ १० ॥
दर्शने ज्योतिषां दर्शनम् ॥ ११ ॥

टिप्पनी⑥

उपस्पर्शने सत्यवगाहनमपां प्रायश्चित्तम्। ऋजुनी उत्तरे द्वे सत्रे । अस्मिन् कर्मप्रशंसाप्रकरणे प्रायश्चित्ताभिधानं स्वकर्मव्युतानां निन्दार्थम् । एवंनाम निन्दितश्चण्डालः यस्य दर्शनेऽपि प्रायश्चित्तं स एव जायते स्वकर्मच्युतो ब्राह्मण इति ॥ ९-११ ॥

इत्यास्तम्बधर्मसूत्रवृत्तावुज्वलायां द्वितीयप्रश्ने द्वितीया कण्डिका ॥२॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां द्वितीयप्रश्ने प्रथमः पटलः ॥ १॥

इति प्रथमः पटलः

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

2. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

3. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

5. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩

6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

7. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

०२①

०३①

01 आर्याः प्रयता वैश्वदेवेऽन्नसंस्कर्तारः④

आर्याः प्रयता वैश्वदेवेऽन्नसंस्कर्तारः स्युः १

▼

⑤

>

▼ Bühler

1. Pure men of the first three castes shall prepare the food (of a householder which is used) at the Vaiśvadeva ceremony. 1

▼ हरदत्त-टीका

सूत्रम्⑥

आर्याः प्रयता वैश्वदेवेऽन्नसंस्कर्तारः स्युः ॥१॥

टिप्पनी⑥

आर्यास्त्रैवर्णिकाः। 'आर्याधिष्ठिता वा शूद्रा' (२.३,४) इत्युत्तरत्र दर्शनात् । प्रयताः स्नानादिना शुद्धाः। वैश्वदेवे गृहमेधिनोर्भोजनार्थे पाके। 'गृहमेधिनो यदशनीयस्ये'(३-१२)ति दर्शनात् । अन्नसंस्कर्तारः स्युः । अन्नं भक्ष्यभोज्यपेयादिकं तत् संस्कुर्युः । न स्वयं, नाऽपि स्त्रियः ॥ १ ॥

02 भाषाङ् कासङ् क्षवयुमित्यभिमुखो

भाषां कासं क्षवयुमित्यभिमुखो ऽन्नं वर्जयेत् २

▼

⑤

>

▼ Bühler

2. The (cook) shall not speak, nor cough, nor sneeze, while his face is turned towards the food.

▼ हरदत्त-टीका

सूत्रम्⑥

भाषां कासं क्षवधुमित्यभिमुखोऽन्नं वर्जयेत् ॥ २॥

टिप्पनी⑥

भाषा शब्दोच्चारणम् । कासः कण्ठे घुरुघुराशब्दः । क्षवधुः क्षुतम् । एतत्त्रितयमन्नाभिमुखो न कुर्यात् । 'संस्कर्तारः स्यु'रिति बहुवचने प्रकृते 'वर्जये'दित्येकवचनं प्रत्येकमुपदेशार्थम् ॥ २ ॥

03 केशानङ्गं वासश्चालभ्याप उपस्पृशेत्

केशानङ्गं वासश्चालभ्याप उपस्पृशेत् ३

▼

⑤

>

▼ Bühler

3. He shall purify himself by touching water if he has touched his hair, his limbs, or his garment.

▼ हरदत्त-टीका

सूत्रम्⑥

केशानङ्गं वासश्चाऽऽलभ्याऽप उपस्पृशेत् ॥३॥

टिप्पनी⑥

केशादीनात्मीयानन्यदीयान्वा । आलभ्य स्पृष्ट्वा । अप उपस्पृशेत् । नेदं स्नानम् । किं तर्हि ? स्पर्शमात्रम् । केशालम्भे पूर्वमप्युपस्पर्शनं विहितम् । इदं तु तत्रोक्तं वैकल्पिकं शकृदाद्युपस्पर्शनं मा भूदिति ॥ ३ ॥

04 आर्याधिष्ठिता वा शूद्राः

आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युः ४

▼

⑤

>

▼ Bühler

4. Or Śūdras may prepare the food, under the superintendence of men of the first three castes.

▼ हरदत्त-टीका

सूत्रम्⑥

आर्याधिष्ठिता वा शुद्रास्संकर्तारः स्युः ॥ ४ ॥

टिप्पनी⑥

वर्णिकैर् अधिष्ठिता वा शूद्रास् संस्कर्तारः स्युः । प्रकरणादन्नस्येति गम्यते ॥४॥

05 तेषां स एवाचमनकल्पः

तेषां स एवाचमनकल्पः ५

▼

⑤

>

▼ Bühler

5. For them is prescribed the same rule of sipping water (as for their masters). 2

▼ हरदत्त-टीका

सूत्रम्⑥

तेषां स एवाऽऽचमनकल्पः ॥५॥

टिप्पनी⑥

तेषां शूद्राणामन्नसंस्कारेऽधिकृतानां स एवाऽऽचमनकल्पो वेदितव्यः, यस्याऽन्नं पचन्ति । यदि ब्राह्मणस्य, हृदयङ्गमाभिरद्भिः। यदि क्षत्रियस्य, कण्ठगाभिः । यदि वैश्यस्य, तालुगाभिः । इन्द्रियोपस्पर्शन च भवति ॥५॥

06 अधिकमहरहः केशश्मश्रुलोमनखवापनम्

अधिकमहरहः केशश्मश्रुलोमनखवापनम् ६

▼

⑤

>
▼ Bühler

6. Besides, the (Śūdra cooks) daily shall cause to be cut the hair of their heads, their beards, the hair on their bodies, and their nails.

▼ हरदत्त-टीका

सूत्रम्⑥

अधिकमहरहः केशश्मश्रुलोमनखवापनम् ॥ ६ ॥

टिप्पनी⑥

शूद्राः पचन्तः प्रत्यहं केशादि वापयेयुः । इदमेषामधिकमार्येभ्यः ॥६॥

07 उदकोपस्पर्शनञ् च सह

उदकोपस्पर्शनं च सह वाससा ७

▼

⑤

>
▼ Bühler

7. And they shall bathe, keeping their clothes on. 3

▼ हरदत्त-टीका

सूत्रम्⑥

उदकोपस्पर्शनं च सह वाससा ॥ ७ ॥

टिप्पनी⑥

सहैव वाससा स्नानं कुर्युः। आर्याणां तु परिहितं वासो निधाय कौ पीनाच्छादनमात्रेणाऽपि स्नानं भवति । शुद्राणामपि पाकादन्यत्र । तथा च मनुः —
4 न वासोभिस्सहाऽजस्रं नाऽविज्ञाते जलाशये।' इति ॥ ७॥

08 अपि वाष्टमीष्वेव पर्वसु

अपि वाष्टमीष्वेव पर्वसु वा वपेरन् ८

▼

⑤

>
▼ Bühler

8. Or they may trim (their hair and nails) on the eighth day (of each half-month), or on the days of the full and. new moon.

▼ हरदत्त-टीका

सूत्रम्⑥

अपि वाऽष्टमीष्वेव पर्वसु वा वपरेन् ॥ ८ ॥

टिप्पनी⑥

यदि वाऽष्टमीष्वेव वपरेन् केशादीन् पर्वस्वेव वा । न प्रत्यहम् । 'वपरे'न्निति अन्तर्भावितण्यर्थः । वापयेरन्नित्यर्थः । तथा च 'लोमनखवापन'मिति पूर्वत्र णिच्प्रयुक्तः ॥ ८ ॥

09 परोक्षमन्नं संस्कृतमग्नावधिश्रित्याद्भिः प्रोक्षेत्

परोक्षमन्नं संस्कृतमग्नावधिश्रित्याद्भिः प्रोक्षेत् । तद्देवपवित्रमित्याचक्षते ९

▼

⑤

>

▼ Bühler

9. He (the householder himself) shall place on the fire that food which has been prepared (by Śūdras) without supervision, and shall sprinkle it with water. Such food also they state to be fit for the gods.

▼ हरदत्त-टीका

सूत्रम्⑥

परोक्षमन्नं संस्कृतमग्नावधिश्रित्याऽद्भिः प्रोक्षेत्तदेवपवित्रमित्याचक्षते ॥९॥

टिप्पनी⑥

यदि शुद्राः परोक्षमन्नं संस्कुर्युः आर्यैरनधिष्ठिताः । तदा तत्परोक्षमन्न संस्कृतं स्वयमग्नावधिश्रयेत् । अधिश्रित्याऽद्भिः प्रोक्षेत् । तदेवंभूतमन्नं देवपवित्रमित्याचक्षते । देवानामपि तत्पवित्रं किं पुनर्मनुष्याणामिति ॥९॥

10 सिद्धेऽन्ने तिष्ठन्भूतमिति स्वामिने

सिद्धेऽन्ने तिष्ठन्भूतमिति स्वामिने प्रब्रूयात् १०

▼

⑤

>
▼ Bühler

10. When the food is ready, (the cook) shall place himself before his master and announce it to him (saying), 'It is ready.'

▼ हरदत्त-टीका

सूत्रम्⑥

सिद्धेऽन्ने तिष्ठन् भूतमिति स्वामिने प्रब्रूयात् ॥१०॥

टिप्पनी⑥

सिद्धे पक्वेऽन्ने तिष्ठन् पाचकोऽधिष्ठाता वा भूतमिति प्रब्रूयात् । कस्मै ? यस्य तदन्न तस्मै स्वामिने । भूतं निष्पन्नमित्यर्थः ॥ १०॥

11 तत्सुभूतं विराड् अन्नन्

तत्सुभूतं विराड् अन्नं तन्मा क्षायीति प्रतिवचनः ११

▼

⑤

>
▼ Bühler

11. The answer (of the master) shall be, 'That well-prepared food is the means to obtain splendour; may it never fail!' 5

▼ हरदत्त-टीका

सूत्रम्⑥

तत्सुभूतं विराडन्नं तन्मा क्षायीति प्रतिवचनः ॥ ११ ॥

टिप्पनी⑥

तत्सुभूतमित्यादि प्रतिवचनो मन्त्रः। तदन्नं सुभूतं सुनिष्पन्नम् । विराट् विराजः साधनम् । अन्नमशनम् । तच्च मा क्षायि क्षीणं मा भूदित्यर्थः ॥ ११ ॥

12 गृहमेधिनोर्यदशनीयस्य होमा बलयश्च

गृहमेधिनोर्यदशनीयस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः १२

▼

⑤

>
▼ Bühler

12. The burnt-oblations and Bali-offerings made with the food which the husband and his wife are to eat, bring (as their reward) prosperity, (and the enjoyment of) heaven. 6

▼ हरदत्त-टीका

गृहमेधिनोर्यद## सूत्रम् गृहमेधिनो यदशनीयं तस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः ॥ १२ ॥

टिप्पनी⑥

गृहमेधिनो यदशनीयं पक्वमपक्वं वा उपस्थितं तस्यैकदेशेन होमा बलयश्च वक्ष्यमाणाः कर्तव्याः । स्वर्गः पुष्टिश्च तेषां फलमिति ॥ १२ ॥

शनीयस्य होमा बलयश्च स्वर्गपुष्टिसंयुक्ताः १२

13 तेषाम् मन्त्राणामुपयोगे द्वादशाहमधःशय्या

तेषां मन्त्राणामुपयोगे द्वादशाहमधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनं च १३

▼

⑤

>
▼ Bühler

13. Whilst learning the sacred formulas (to be recited during the performance) of those (burnt oblations and Bali-offerings, a householder) shall sleep on the ground, abstain from connubial intercourse and from eating pungent condiments and salt, during twelve days. 7

▼ हरदत्त-टीका

सूत्रम्⑥

तेषां मन्त्राणामुपयोगे द्वादशाहमधश्शय्या ब्रह्मचर्यं क्षारलवणवर्जनं च ॥ १३ ॥

टिप्पनी⑥

तेषां होमानां बलीनां च ये मन्त्रास् **तेषाम् उपयोगे** ।
उपयोगो नियमपूर्वकं विद्याग्रहणम्8 ।

तत्र **द्वादशाहम् अधश्शय्या** स्थण्डिलशायित्वम् । **ब्रह्मचर्यं** मैथुनवर्जनम् ।
9क्षारलवणवर्जनं च भवति ।

उपयोक्तुर् एव व्रतम्, अध्ययनाङ्गत्वात् ।
अन्ये तु पत्न्या अपीच्छन्ति - **उपयोगः** प्रथम-योगः तत्र च पत्न्या अपि सहाऽधिकार इति वदन्तः ॥ १३ ॥

14 उत्तमस्यैकरात्रमुपवासः

उत्तमस्यैकरात्रमुपवासः १४

▼

⑤

>

▼ Bühler

14. (When he studies the Mantras) for the last (Bali offered to the goblins), he shall fast for one (day and) night. 10

▼ हरदत्त-टीका

सूत्रम्⑥

उत्तमस्यैकरात्रमुपवासः ॥ १४ ॥

टिप्पनी⑥

उत्तमस्य 'उत्तमेन वैहायसम्'(२.४.८.) इति वक्ष्यमाणस्य11 'ये भूताः प्रचरन्ती'त्यस्य **एकरात्रमुपवासः** कर्तव्यः ॥ १४ ॥

15 बलीनान् तस्य तस्य

बलीनां तस्य तस्य देशे संस्कारो हस्तेन परिमृज्यावोक्ष्य न्युप्य पश्चात्परिषेचनम् १५

▼

⑤

>
▼ Bühler

15. For each Bali-offering the ground must be prepared separately. (The performer) sweeps (the ground) with his (right) hand, sprinkles it with water, turning, the palm downwards, throws down (the offering), and afterwards sprinkles water around it. 12

सूत्रम्⑥

बलीनां तस्य तस्य देशे संस्कारो हस्तेन परिमृज्याऽऽवोक्ष्य न्युप्य पश्चात्परिषेचनम् ॥ १५ ॥

टिप्पनी⑥

बलीनां मध्ये तस्यतस्य बलेर्देशे संस्कारः कर्तव्यः। कः पुनरसौ? हस्तेन परिमार्जनमवोक्षणं च । तं कृत्वा बलिं निवपति । न्युप्य पश्चात् परिषेचनं कर्तव्यम् । उपदेशक्रमादेव सिद्धे पश्चाद्ग्रहणं मध्ये गन्धमाल्यादिदानार्थमित्याहुः। 'तस्यतस्ये'ति वचनं सत्यपि सम्भवे सकृदेव परिमार्जनमवोक्षणं च मा भूत् । एकस्मिन्देशे समवेतानामपि पृथक्पृथग्यथा स्यादिति ॥ १५ ॥

16 औपासने पचने वा

औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रं हस्तेन जुहुयात् १६

- ओम्*(इत्यनुज्ञाक्षरं)* अ॒ग्नये॒ स्वाहा॑*(हविःप्रदानार्थः)*।
- सोमा॑य॒ स्वाहा॑।*(कैश्चिन्नोच्यते मन्त्रः।)*
- विश्वे॑भ्यो दे॒वेभ्य॒स् स्वाहा॑।
- *(खे)* ध्रु॒वाय॑ भू॒माय॑*(=भूम्ने)* स्वाहा॑।

ध्रु॒व॒-क्षित॑ये॒*(←स्वरः??) (खे)* स्वाहा॑।

(विवाहे ध्रुव-दर्शन-मन्त्रेऽप्य् अयम् प्रयोगः)

अ॒च्यु॒त॒-क्षित॑ये॒*(←स्वरः??)* स्वाहा॑।

- अ॒ग्नये॑ स्विष्ट॒कृते॑ स्वाहा॑।*(=रुद्रोऽग्निस्स्विष्टकृत्)*

▼

⑤

>

▼ Bühler

16. (At the Vaiśvadeva sacrifice) he shall offer the oblations with his hand, (throwing them) into the kitchen-fire or into the sacred (Gṛhya)-fire, and reciting (each time one of) the first six Mantras (prescribed in the Nārāyaṇī Upaniṣad). 13

▼ हरदत्त-टीका

सूत्रम्⑥

औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रं हस्तेन जुहुयात् ॥ १६ ॥

टिप्पनी⑥

यत्र पच्यते स पचनोऽग्निः । औपासनवतामोपासने, धिधुरस्य पचन इति व्यवस्थितो विकल्पः । अन्ये तु— तुल्यविकल्पं मन्यन्ते । षड्भिराद्यैः 14'अग्नये स्वाहा, सोमाय स्वाहा, विश्वेभ्यो देवेभ्यस्स्वाहा, ध्रुवाय भौमाय स्वाहा, ध्रवक्षितये स्वाहा, अच्युतक्षिनये स्वाहेत्येतैः। एते हि मन्त्रपाठे पठिताः प्राग्विवाहमन्त्रेभ्यः विशिष्टनियमसापेक्षग्रहणत्वात्तैस्सह न गृह्यन्ते । केचित् सौविष्टकृतमपि सप्तमं जुह्वति 'अग्नये स्विष्टकृते स्वाहे'ति औषधहविष्केषु तस्य सर्वत्र प्रवृत्तिरिति वदन्तः । अन्ये तु सोमाय स्वाहेति न पठन्ति । सौविष्टकृतं षष्ठं पठन्ति । हस्तग्रहणं दर्व्यादिनिवृत्त्यर्थम् ॥ १६ ॥

17 उभयतः परिषेचनं यथा

उभयतः परिषेचनं यथा पुरस्तात् १७

अदि॒तेऽन्वंमँस्थाः। *(इति दक्षिणतः, प्राचीनम्)*

अनु॑म॒तेऽन्वंमँस्थाः। *(इति पश्चिमाद् उदीचीनम्)*

सरस्व॒ते ऽन्वंमँस्थाः। *(इति उत्तरतः प्राचीनम्)*

देवं सवित॒ः प्रासांवीः। *(इति प्रागारम्भं प्रदक्षिणं)*

▼

⑤

>

▼ Bühler

17. He shall sprinkle water all around both times (before and after the oblations), as (has been declared) above. 15

▼ हरदत्त-टीका

सूत्रम्⑥

उभयतः परिषेचनं यथा पुरस्तात् ॥ १७ ॥

टिप्पनी⑥

उभयतः । पुरस्तादुपरिष्टाच्च परिषेचनं कर्तव्यम् । कथम् ? यथा पुरस्तात् उक्तं गृह्ये16 'अदितेऽनुमन्यस्वे'त्यादि, 'अन्वमँ स्थाः प्रासावीरिति मन्त्रसन्नाम' इति च । सामयाचारिकेषु पार्वणेनातिदेशो न प्रवर्तत इति ज्ञापितत्वादप्राप्तविधिरयम् । अन्ये तु परिसङ्ख्यां मन्यन्ते- परिषेचनमेव वैश्वदेवे, नाऽन्यत्तन्त्रमिति ॥ १८ ॥

18 एवम् बलीनान् देशे

एवं बलीनां देशे देशे समवेतानां सकृत्सकृदन्ते परिषेचनम् १८

▼

⑤

>
▼ Bühler

18. In like manner water is sprinkled around once only after the performance of those Bali-offerings that are performed in one place. 17

▼ हरदत्त-टीका

सूत्रम्⑥

एवं बलीनां देशे देशे समवेतानां सकृत्सकृदन्ते परिषेचनम् ॥ १८ ॥

टिप्पनी⑥

यथा षण्णामाहुतीनां परिषेचनं तन्त्रम्, विभवात् । एवं बलयोऽपि ये एकस्मिन् देशे समवेता 'उत्तरैर्ब्रह्मसदन' (४.२.४) इत्यादयस्तेषां यदन्ते परिषेचनं प्राप्तं 'पश्चात्परिषेचन'मित्यनेन विहितं तत्सर्वान्ते सकृत्कर्तव्यम्, न प्रत्येकं पृथगिति । असत्यस्मिन् सूत्रे पूर्वत्र 'तस्य तस्ये'ति वचनाद्यथा परिमार्जनमवोक्षणं च प्रत्येकं पृथक्पृथग्भवति तथा परिषेचनमपि स्यात् । अत्र चोपदेशादेव य एकदेशस्था बलयस्तेषामेव सकृदन्ते परिषेचनं, न यादृच्छिकसमवेतानाम् । तेन यद्यप्यगारस्योत्तरपूर्वदेशश्शय्यादेशः, तथापि कामलिङ्गस्य पृथकपरिषेचनं भवति ॥१९॥

19 सति सूपसंसृष्टेन कार्याः

सति सूपसंसृष्टेन कार्याः १९

▼

⑤

>
▼ Bühler

19. (If a seasoning) has been prepared, (the Bali-offering should consist of rice) mixed with that seasoning.

▼ हरदत्त-टीका

सूत्रम्⑥

सति सूपसंसृष्टेन कार्याः ॥ १९ ॥

टिप्पनी⑥

सति सूपे तत्संसृष्टा बलयः कार्याः । अन्ये त्वन्यैरपि व्यजनैस्संसर्गमिच्छन्ति । तथा च बौधायनः — 18 'काममितरेष्वायतने'ष्विति । एष एव व्यञ्जनानां संस्कारः। 19सूत्रस्यापि— व्यञ्जनैस्सुष्ठूपसंसृष्टेनाऽन्नेन बलयः कार्यास्सति सम्भव इत्यर्थः इति ॥ १९ ॥

20 अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम्

अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् २०

▼

⑤

>
▼ Bühler

20. With the seventh and eighth Mantras (Balis 20 must be offered to Dharma and Adharma) behind the fire, and must be placed the one to the north of the other.

▼ हरदत्त-टीका

सूत्रम्⑥

अपरेणाऽग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् ॥२०॥

टिप्पनी⑥

अपरेणाऽग्निमग्नेः पश्चात् । सप्तमाष्टमाभ्यां 'धर्माय स्वाहा, अधर्माय स्वाहे'त्येताभ्यां बलिहरणx कर्तव्यम् । उदगपवर्गम् । न प्रागपवर्गम् ॥ २० ॥

21 उदधानसन्निधौ नवमेन

उदधानसंनिधौ नवमेन २१

- धर्मा॑य स्वाहा॑ । अध॑र्माय स्वाहा॑। *(अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गम् २०)*
- अ॒द्भ्यस् स्वाहा॑ । *(उदधानसंनिधौ नवमेन २१)*

▼

⑤

>
▼ Bühler

21. With the ninth (Mantra a Bali offered to the waters must be placed) near the water-vessel (in which the water for domestic purposes is kept). 21

▼ हरदत्त-टीका

सूत्रम्⑥

उधानसन्निधौ नवमेन ॥ २१ ॥

टिप्पनी⑥

उदकं यत्र धीयते तदुदधानं22 मणिकाख्यम् । तस्य सन्निधौ नवमेन 'अद्भ्यः स्वाहेत्यनेन ॥ २१ ॥

22 मध्येऽगारस्य दशमैकादशाभ्याम् प्रागपवर्गम्

मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् २२

- ओ॒ष॒धि॒व॒न॒स्प॒तिभ्य॒स् स्वाहा॑। र॒क्षो॒दे॒व॒ज॒नेभ्य॒स् स्वाहा॑ । *(मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् २२)*

▼

⑤

>
▼ Bühler

22. With the tenth and eleventh (Mantras, Balis, offered to the herbs and trees and to Rakṣodevajana, must be placed) in the centre of the house, and the one to the east of the other. 23

▼ हरदत्त-टीका

सूत्रम्⑥

मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् ॥२२ ॥

टिप्पनी⑥

दशमैकादशाभ्यां 'औषधिवनस्पतिभ्यः स्वाहा, रक्षोदेवजनेभ्यः स्वा'हेत्येताभ्यां अगारस्य मध्ये प्रागपवर्गं कर्तव्यम् ॥ २२ ॥

23 उत्तरपूर्वदेशेऽगारस्योत्तरैश्चतुर्भिः

उत्तरपूर्वदेशेऽगारस्योत्तरैश्चतुर्भिः २३

- *(वास्तुविद्याप्रसिद्धेभ्यः)* गृह्या॑भ्य॒स् स्वाहा॑। अ॒व॒साने॑भ्यस्*(=सीमाभ्यः)* स्वाहा॑ । अ॒व॒साना॑पतिभ्य॒स् स्वाहा॑ । स॒र्व॒भू॒तेभ्य॒स् स्वाहा॑ । *(उत्तरपूर्वदेशेऽगारस्योत्तरैश्चतुर्भिः २३)*

▼

⑤

>

▼ Bühler

23. With the following four (Mantras, Balis must be placed) in the north-eastern part of the house (and the one to the east of the other). 24

▼ हरदत्त-टीका

सूत्रम्⑥

उत्तरपूर्वे देशेऽगारस्योत्तरैश्चतुर्भिः ॥ २३ ॥

टिप्पनी⑥

अगारस्य य उत्तरपूर्वो देशस्तरोत्तरैश्चतुर्भिः 'गृह्याभ्यः स्वाहा, अवसानेभ्यः स्वाहा, अवसानपतिभ्यः स्वाहा, सर्वभूतेभ्यः स्वाहेत्येतैः प्रागपवर्गमित्येव ॥२३॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने तृतीया कण्डिका ॥३॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

3. Manu II, 35.↩

4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

6. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

7. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. Manu II, 69; Yājñ. I, 15.↩

13. Manu II, 144.↩

14. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

15. Manu II, 146-148.↩

16. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

17. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

18. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

19. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

20. Manu II, 147.↩

21. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

22. आप० ध० १.३०.८.↩

23. Manu II, 37.↩

24. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

०४①

01 शय्यादेशे कामलिङ्गेन④

शय्यादेशे कामलिङ्गेन १

▼

⑤

>
▼ Bühler

1. Near the bed (a Bali must be offered) with (a Mantra) addressed to Kāma (Cupid).

▼ हरदत्त-टीका

सूत्रम्⑥

शय्यादेशे कामलिङ्गेन ॥ १ ॥

टिप्पनी⑥

शय्यादेशे 'कामाय स्वाहे'त्यनेन ॥ १ ॥

02 देहल्यामन्तरिक्षलिङ्गेन

देहल्यामन्तरिक्षलिङ्गेन २

- कामा॑य॒ स्वाहा॑ । *(शय्यादेशे कामलिङ्गेन)*

- अ॒न्तरि॑क्षाय॒ स्वाहा॑ । *(देहल्यामन्तरिक्षलिङ्गेन २)*

▼

⑤

>
▼ Bühler

2. On the door-sill (a Bali must be placed) with (a Mantra) addressed to Antarikṣa (the air). 1

▼ हरदत्त-टीका

सूत्रम्⑥

2देहल्यामन्तरिक्षलिङ्गेन ॥२॥

टिप्पनी⑥

देहली द्वारस्थाऽधस्ताद्दारु । तस्याऽधोवेदिकेत्यन्ये । अन्तर्द्वारस्य च ग्रहणम् । तत्राऽन्तरिक्षलिङ्गेन 'अन्तरिक्षाय स्वाहे'त्यनेन ॥२॥

03 उत्तरेणापिधान्याम्

उत्तरेणापिधान्याम् ३

- यद् एज॑ति*(=कम्पते)* जग॑ति यच् च॒ चेष्ट॑ति, नाम्नो॑ भा॒गो ऽयं, नाम्ने॒ स्वाहा॑।
  (उत्तरेणापिधान्याम् (अर्गले)३)

▼

⑤

>
▼ Bühler

3. With (the Mantra) that follows (in the Upaniṣad, he offers a Bali) near the door. 3

▼ हरदत्त-टीका

सूत्रम्⑥

उत्तरेणाऽपिधान्याम् ॥ ३॥

टिप्पनी⑥

येनाऽपिधीयते द्वारं साऽपिधानी कवाटम् । तदर्गलमित्यन्ये । तत्रोत्तरेण मन्त्रेण 'यदेजति जगति यच्च चेष्टति नाम्नो भागो यन्नाम्ने स्वाहे'त्यनेन ॥ ३॥

04 उत्तरैर्ब्रह्मसदने

उत्तरैर्ब्रह्मसदने ४

(उत्तरैर्ब्रह्मसदने)

- पृ॒थि॒व्यै स्वाहा॑। अ॒न्तरि॑क्षाय॒ स्वाहा॑। दि॒वे स्वाहा॑ ।
- सूर्या॑य॒ स्वाहा॑ । च॒न्द्रम॑से॒ स्वाहा॑ । नक्ष॑त्रेभ्य॒स् स्वाहा॑ ।
- इन्द्रा॑य॒ स्वाहा॑ । बृह॒स्पत॑ये॒ स्वाहा॑ । प्र॒जाप॑तये॒ स्वाहा॑ । ब्रह्म॑णे॒ स्वाहा॑।

▼

⑤

>

▼ Bühler

4. With the following (ten Mantras, addressed to Earth, Air, Heaven, Sun, Moon, the Constellations, Indra, Bṛhaspati, Prajāpati, and Brahman, he offers ten Balis, each following one to the east of the preceding one), in (the part of the house called) the seat of Brahma. 4

▼ हरदत्त-टीका

सूत्रम्⑥

उत्तरैर्ब्रह्मसदने ॥४॥

टिप्पनी⑥

अगारस्येत्यनुवृत्तेः । तत्र यो ब्रह्मसदनाख्यो देशः वास्तुविद्याप्रसिद्धो 5मध्येऽगारस्य ।
तत्रोत्तरैर्दशभिः 'पृथिव्यै स्वाहा, अन्तरिक्षाय स्वाहा, दिवे स्वाहा, सूर्याय स्वाहा, चन्द्रमसे स्वाहा, नक्षत्रेभ्यः स्वाहा, इन्द्राय स्वाहा, बृहस्पतये स्वाहा, प्रजापतये स्वाहा, ब्रह्मणे स्वाहेत्येतैः प्रागपवर्गमित्येव ।
अपर आाह- ब्रह्मा यत्र सीदति गार्ह्येषु कर्मसु अग्नेर्दक्षिणतो ब्रह्मसदनं तत्रेति ॥४॥

05 दक्षिणतः पितृलिङ्गेन प्राचीनावीत्यवाचीनपाणिः

दक्षिणतः पितृलिङ्गेन प्राचीनावीत्यवाचीनपाणिः कुर्यात् ५

- स्व॒धा पि॒तृभ्य॒स् स्वाहा॑। *(दक्षिणतः पितृलिङ्गेन प्राचीनावीत्् अवाचीन-पाणिः कुर्यात् ५)*

▼

⑤

>
▼ Bühler

5. He shall offer to the south (of the Balis offered before, a Bali) with a Mantra addressed to the Manes; his sacrificial cord shall be suspended over the right shoulder, and the (palm of his right hand shall be turned upwards and) inclined to the right. 6

▼ हरदत्त-टीका

सूत्रम्⑥

दक्षिणतः पितृलिङ्गेन प्राचीनावीत्यवाचीनपाणिः कुर्यात् ॥ ५ ॥

टिप्पनी⑥

अनन्तराणां बलीनां दक्षिणतः पितृलिङ्गेन 'स्वधा पितृभ्य' इत्यनेन बलिं कुर्यात्, प्राचीनावीत्यवाचीनपाणिश्च भूत्वा दक्षिणं पाणिमुत्तानं कृत्वा अङ्गुष्ठतर्जन्योरन्तरालेन ॥५॥

06 रौद्र उत्तरो यथा

रौद्र उत्तरो यथा देवताभ्यः ६

- नमों रु॒द्राय॑ पशु॒पत॑ये॒ स्वाहा॑। *(रौद्र उत्तरो यथा देवताभ्यः ६ तयोर् नाना परिषेचनं धर्म-भेदात् ७)*

▼

⑤

>
▼ Bühler

6. To the north (of the Bali given to the Manes, a Bali shall be offered) to Rudra, in the same manner as to the (other) gods. 7

▼ हरदत्त-टीका

सूत्रम्⑥

रौद्र उत्तरो यथा देवताभ्यः ॥ ६॥

टिप्पनी⑥

पितृबलेरुत्तरतो रौद्रबलिः कर्तव्यः । यथा देवताभ्यः तथा, प्राचीनावीत्यवाचीनपाणिरिति नाऽनुवर्तत इत्यर्थः । 'नमो रुद्राय पशुपतये स्वाहे'ति मन्त्रः । अत्र यद्यपि पशुपतिलिङ्गमप्यस्ति, तथापि तद्रुद्रस्यैव विशेषणमिति रौद्र इति व्यपदेशो नाऽनुपपन्नः । देवतास्मरणमपि रुद्रायत्येव कुर्वन्ति । रुद्राय पशुपतय इत्यन्ये । केचित्तु- उत्तरो मन्त्रो रौद्रः न पशुपतिदैवत्य इत्याचक्षते । तेषां देशः प्राग्वोदग्वा पित्र्यात् ॥ ६॥

07 तयोर्नाना परिषेचनन् धर्मभेदात्

तयोर्नाना परिषेचनं धर्मभेदात् ७

▼

⑤

>
▼ Bühler

7. The sprinkling with water (which precedes and follows the oblation) of these two (Balis, takes place) separately, on account of the difference of the rule (for each case). 8

▼ हरदत्त-टीका

सूत्रम्⑥

तयोर्नाना परिषेचनं धर्मभेदात् ॥ ७॥

टिप्पनी⑥

तयोरनन्तरोक्तयोर्बल्योरेकस्मिन् देशे समवेतयोरपि नाना पृथक् परिषेचनं कर्त्तव्यम् । कुतः ? धर्मभेदात्। पित्र्यस्याऽप्रदक्षिणं परिषेचनं कर्तव्यम् । इतरस्य दैवत्वात्प्रदक्षिणमिति ॥ ७॥

08 नक्तमेवोत्तमेन वैहायसम्

नक्तमेवोत्तमेन वैहायसम् ८

- ये भू॒ताः प्र॒चर॑न्ति दिवा॒ /नक्तं॒
  बलि॑म् इ॒च्छन्तो॑ वि॒तुद॑स्य॒ प्रेष्याः॑ ।
  तेभ्यो॑ ब॒लिं पु॑ष्टि॒कामो॑ हरामि॒
  मयि॒ पुष्टिं॒ पुष्टि॑पतिर् दधातु॒ स्वाहा॑॥ *(नक्तमेवोत्तमेन वैहायसम् ८)*

▼

⑤

>
▼ Bühler

8. At night only he shall offer (the Bali to the Goblins), throwing it in he air and reciting the last (Mantra). 9

▼ हरदत्त-टीका

सूत्रम्⑥

नक्तमेवोत्तमेन वैहायसम् ॥ ८॥

टिप्पनी⑥

उत्तमेन 'ये भूताः प्रचरन्ति नक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहे'10त्यनेन वैहायसं बलिं दद्यात् । तच्च नक्तमेव । 'वैहायसमि'ति वचनादाकाश एव बलिरुत्क्षेप्यः, न छदिकृते देशे । तथाच बौधायनः— 11 'अथाऽऽकाश उत्क्षिपति ये भूताःप्रचरन्ती'ति ।

अपर आह- एवकारो भिन्नक्रमः । नक्तमुत्तमेनैव बलिरिति तत्र बल्यन्तराणां रात्रौ निवृत्तिः । अन्ये तु- ऊहेन दिवा बलिं हरन्ति 'दिवा बलमिच्छन्त' इति ।

आश्वलायनके तथा दर्शनात्12 दिवाचारिभ्य ने दिवा । नक्तंचारिभ्य इति (बलिमाकाशे उत्क्षिपे)न्नक्तमिति । तथा मनुः—
13 दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ।' इति ॥ ८॥

09 य एतानव्यग्रो यथोपदेशङ्

य एतानव्यग्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च ९

▼

⑤

>
▼ Bühler

9. He who devoutly offers those (above-described), to the rules, (obtains) Balis and Homas), according eternal bliss in heaven and prosperity.

▼ हरदत्त-टीका

सूत्रम्⑥

य एतानव्यग्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च ॥९॥

टिप्पनी⑥

य एताननन्तरोक्तान् होमान् बलींश्च । अव्यग्रः समाहितमना भूत्वा यथोपदेशमुपदेशानतिक्रमेण कुरुते । य इति वचनात्तस्यति पूर्वं गम्यते । तस्य नित्यः स्वर्गः पुष्टिश्च 'स्वर्गपुष्टिसंयुक्ता' इति यत् पूर्वमुक्तं तस्याऽर्थवादताशङ्का मा भूदिति पुनर्वचनम् । पुष्टिस्वर्गौ नित्यावेव भवत, न प्रबलैरपि कर्मान्तरैर्बाधनमिति ॥९॥

10 अग्रञ् च देयम्

अग्रं च देयम् १०

▼

⑤

>

▼ Bühler

10. And (after the Balis have been performed, a portion of the food) must first be given as alms. 14

▼ हरदत्त-टीका

सूत्रम्⑥

अग्रं च देयम् ॥१०॥

टिप्पनी⑥

बलिहरणानन्तरं अग्रं च देयं भिक्षवे ॥१०॥

11 अतिथीनेवाग्रे भोजयेत्

अतिथीनेवाग्रे भोजयेत् ११

▼

⑤

>
▼ Bühler

11. He shall give food to his guests first, 15

▼ हरदत्त-टीका

सूत्रम्⑥

अतिथीनेवाऽग्रे भोजयेत् ॥११॥

टिप्पनी⑥

अतिथीन्वक्ष्यति । तानेवाग्रे भोजयेत् न स्वयं सह भुञ्जीत पूर्वं वा । एवमतिथिव्यतिरिक्तानन्यानपि भोजयितव्यान् पश्चादेव भोजयेत् ॥ ११ ॥

12 बलान् वृद्धान् रोगसम्बन्धान्

बालान् वृद्धान् रोग-संबन्धान् स्त्रीश् चान्तर्वत्नीः १२

▼

⑤

>
▼ Bühler

12. And to infants, old or sick people, female (relations, and) pregnant women. 16

▼ हरदत्त-टीका

सूत्रम्⑥

बालान्वृद्धान्रोगसम्बन्धास्त्रीश्चान्तर्वत्नीः ॥१२॥

टिप्पनी⑥

ये च गृहवर्तिनो बालादयः तानप्यग्र एव भोजयेत् । अन्तर्वत्नीरित्येव सिद्धे स्त्रीग्रहणं स्वस्रादीनामपि ग्रहणार्थम् । अन्तर्वत्नीग्रहणं 17सर्वत्र पूजार्थम् ॥ १२॥

13 काले स्वामिनावन्नार्थिनन् न

काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयाताम् १३

▼

⑤

>
▼ Bühler

13. The master (of the house) and his wife shall not refuse a man who asks for food at the time (when the Vaiśvadeva offering has been performed).

▼ हरदत्त-टीका

सूत्रम्⑥

काले स्वामिनावन्नार्थिनं न प्रत्याचक्षीयाताम् ॥१३॥

टिप्पनी⑥

काले वैश्वदेवान्ते अनार्थमुपस्थितं स्वामिनौ गृहपती न प्रत्याचक्षीयाताम् अवश्यं तस्मै किञ्चिद्देयमति ॥१३॥

14 अभावे भूमिरुदकन् तृणानि

अभावे भूमिरुदकं तृणानि कल्याणी वाग् इति । एतानि वै सतोऽगारे न क्षीयन्ते कदाचनेति १४

▼

⑤

>

▼ Bühler

14. If there is no food, earth, water, grass, and a kind word, indeed, never fall in the house of a good man. Thus (say those who know the law). 18

▼ हरदत्त-टीका

सूत्रम्⑥

19अभावे भूमिरुदकं तृणानि कल्याणी वागित्येतानि वै सतोऽगारे न क्षीयन्ते कदाचनेति ॥१४॥

प्रस्तावः⑥

अभावे किं कर्तव्यम् ? तत्राह —

टिप्पनी⑥

भूमिरुपवेशनयोग्या । उदकं पादप्रक्षालनादियोग्यम् । तृणानि शयनासनयोग्यानि । कल्याणी वाक् स्वागतमायुष्मते, इहाऽऽस्यतामित्यादिका । एतानि भूम्यादीनि । सतोऽगारे सतस्सत्पुरुषस्य निर्धनस्याऽपि गृहे कदाचिदपि न क्षीयन्ते । वैशब्दः प्रसिद्धौ । अत एव तैरुपचारः कर्तव्यः । इतिशब्दप्रयोगादेवं धर्मज्ञा उपदिशन्तीति ॥ १४॥

15 एवंवृत्तावनन्तलोकौ भवतः

एवंवृत्तावनन्तलोकौ भवतः १५

▼

⑤

>
▼ Bühler

15. Endless worlds are the portion (of those householders and wives) who act thus.

▼ हरदत्त-टीका

सूत्रम्⑥

एवं वृत्तावनन्तलोकौ भवतः ॥ १५ ॥

टिप्पनी⑥

यौ गृहमेधिनौ विवाहादारभ्य आन्तादेवंवृत्तौ भवतः तयोरनन्ता लोका भवन्ति । ज्योतिष्टोमादिभ्योऽपि कतिपयदिनसाध्येभ्यो दुष्करमेतदान्ताद्व्रतम् ॥ १५ ॥

16 ब्राह्मणायानधीयानायासनमुदकमन्नमिति देयम् न

ब्राह्मणायानधीयानायासनमुदकमन्नमिति देयम् । न प्रत्युत्तिष्ठेत् १६

▼

⑤

>
▼ Bühler

16. To a Brāhmaṇa who has not studied the Veda, a seat, water, and food must be given. But (the giver) shall not rise (to do him honour). 20

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मणायाऽनधीयानायाऽऽमनमुदकमन्नमिति देयं न प्रत्युत्तिष्ठेत् ॥१६॥

टिप्पनी⑥

यद्यनधीयानो ब्राह्मणोऽतिथिधर्मेणाऽऽगच्छेत् तदा तस्मै आसनादिकं देयम् । प्रत्युत्थानं तु न कर्तव्यम् । अस्मादेव ज्ञायते-अधीयाने प्रत्युत्थेयमिति ॥ १६ ॥

17 अभिवादनायैवोत्तिष्ठेदभिवाद्यश्चेत्

अभिवादनायैवोत्तिष्ठेदभिवाद्यश्चेत् १७

▼

⑤

>

▼ Bühler

17. But if (such a man) is worthy of a salutation (for other reasons), he shall rise to salute him.

▼ हरदत्त-टीका

सूत्रम्⑥

अभिवादनायैवोत्तिष्ठेदभिवाद्यश्चेत् ॥ १७ ॥

टिप्पनी⑥

यदि पुनरसौ अनधीयानोऽपि 'दशवर्षं पौरसख्य'(१.१४.१२.) मित्यादिना ऽभिवाद्यो भवति तदा अभिवादनायौवात्तष्ठेत्॥ १७ ॥

18 राजन्यवैश्यौ च

राजन्यवैश्यौ च १८

▼

⑤

>

▼ Bühler

18. Nor (shall a Brāhmaṇa rise to receive) a Kṣatriya or Vaiśya (though they may be learned). 21

▼ हरदत्त-टीका

सूत्रम्⑥

राजन्यवैश्यौ च ॥ १८ ॥

टिप्पनी⑥

अधीयानावपि राजन्यवैश्यौ न प्रत्युत्तिष्ठेत् ब्राह्मणः । आसनादिकं तु देयमिति ॥ १८॥

19 शूद्रमभ्यागतङ् कर्मणि नियुञ्ज्यात्

शूद्रमभ्यागतं कर्मणि नियुञ्ज्यात् । अथास्मै दद्यात् १९

▼

⑤

>

▼ Bühler

19. If a Śūdra comes as a guest (to a Brāhmaṇa), he shall give him some work to do. He may feed him, after (that has been performed). 22

▼ हरदत्त-टीका

सूत्रम्⑥

23शद्रमभ्यागतं कर्मणि नियुज्यात् ॥१९॥

टिप्पनी⑥

यदि शद्रो द्विजाति प्रत्यतिथिरागच्छति तदा तमुदकाहरणादौ कर्मणि नियुञ्ज्यात् नियुञ्जीत ॥ १९ ॥

सूत्रम्⑥

अथाऽस्मै दद्यात् ॥ २०॥

टिप्पनी⑥

अथ तस्मिन् कृते भोजनं दद्यात् ॥ २०॥

20 दासा वा राजकुलादाहृत्यातिथिवच्

दासा वा राजकुलादाहृत्यातिथिवच् छूद्रम् पूजयेयुः २०

▼

⑤

>
▼ Bühler

20. Or the slaves (of the Brāhmaṇa householder) shall fetch (rice) from the royal stores, and honour the Śūdra as a guest. 24

▼ हरदत्त-टीका

सूत्रम्⑥

दासा वा राजकुलादाहृत्याऽतिथिवच्छूद्रं पूजयेयुः ॥२१॥

टिप्पनी⑥

अथवा येऽस्य गृहमधिनो दासाः ते राजकुलादाहृत्य तं शूद्रमतिथिवत्पूजयेयुः । अत एव ज्ञायते- शूद्राणामतिथीनां पूजार्थं ब्रीह्याादिकं राज्ञा ग्रामे ग्रामे स्थापयितव्यमिति ॥ २१ ॥

21 नित्यमुत्तरं वासः कार्यम्

(गृहस्थेन) नित्यमुत्तरं वासः कार्यम् २१

▼

⑤

>
▼ Bühler

21. (A householder) must always wear his garment over (his left shoulder and under his right arm).

▼ हरदत्त-टीका

सूत्रम्⑥

नित्यमुत्तरं वासः कार्यम् ॥ २२॥

टिप्पनी⑥

'उपासने गुरुणा' (१.१५.१)मित्यादिना केषुचित्कालेषु यज्ञोपवीतं विहितम् । इह तु प्रकरणात् गृहस्थस्य नित्यमुत्तरं वासो धार्यमित्युच्यते ॥

22 अपि वा सूत्रमेवोपवीतार्थे

अपि वा सूत्रमेवोपवीतार्थे २२

▼

⑤

>

▼ Bühler

22. Or he may use a cord only, slung over his left shoulder and passed under his right arm, instead of the garment.

▼ हरदत्त-टीका

सूत्रम्⑥

अपि वा सूत्रमेवोपवीतार्थे ॥ २३ ॥

टिप्पनी⑥

अपि वा सूत्रमेव सर्वेषामुपवीतकृत्ये भवति, न वास एवेति नियमः। तथा च मनुः—
25 कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृ'दिति26 ॥ २३ ॥

23 यत्र भुज्यते तत्समूह्य

यत्र भुज्यते तत्समूह्य निर्हृत्यावोक्ष्य तं देशम्, अमत्रेभ्यो *(=पात्रेभ्यो)* लेपान्संकृष्याद्भिः संसृज्योत्तरतः शुचौ देशे रुद्राय निनयेत् । एवं वास्तु शिवं भवति २३

▼

⑤

>

▼ Bühler

23. He shall sweep together (the crumbs) on the place where he has eaten, and take them away. He shall sprinkle water on that place, turning the palm downwards, and remove the stains (of food from the cooking-vessels with a stick), wash them with water, and take their contents to a clean place to the north (of the house, offering them) to Rudra. In this manner his house will become prosperous.

▼ हरदत्त-टीका

सूत्रम्⑥

यत्र भुज्यते तत्समूह्य निर्हृत्याऽवोक्ष्य तं देशममत्रेभ्यो लेपान् सङ्कृष्याद्भिः संमृज्योत्तरतः शुचौ देशे रुद्राय निनयेदेवं वास्तु शिवं भवति ॥ २४ ॥

टिप्पनी⑥

यत्र स्थाने भुज्यते तत् समूह्य समूहन्या सत्यमुच्छिष्टादिकं राशीकृत्य निहरेदन्यतः। निर्हृत्य तं देशमवोक्षत् । अवोक्ष्य ततोऽमत्रेभ्यः येषु पाकः कृतः तान्यमत्राणि तेभ्योऽन्नलेपान् व्यञ्जनलेपांश्च संकृष्य काष्ठादिनाऽवकृष्य अद्भिसंसृजेत् । संसृज्य गृहस्योत्तरतः शुचौ देशे रुद्रायेदमस्त्'विति निनयेत् । एवं कृते वास्तु शिवं समृद्धं भवतीति ॥ २४॥

24 ब्राह्मण आचार्यः स्मर्यते

ब्राह्मण आचार्यः स्मर्यते तु २४

▼

⑤

>
▼ Bühler

24. It is declared in the Smṛtis that a Brāhmaṇa alone should be chosen as teacher (or spiritual guide). 27

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मण आचार्यः स्मर्यते तु ॥ २५ ॥

टिप्पनी⑥

तुशब्दोऽवधारणार्थो भिन्नक्रमश्च । ब्राह्मण एव सर्वेषामाचार्यः स्मर्यते धर्मशास्त्रेषु । इहाऽपि वक्ष्यति 'स्वकर्म ब्राह्मणस्ये'(२.१०.४.)त्यादि। अनुवादोऽयमापदि कल्पान्तरं वक्तुम् ॥ २५॥

25 आपदि ब्राह्मणेन राजन्ये

आपदि ब्राह्मणेन राजन्ये वैश्ये वाध्ययनम् २५

▼

⑤

>
▼ Bühler

25. In times of distress a Brāhmaṇa may study under a Kṣatriya or Vaiśya.

▼ हरदत्त-टीका

सूत्रम्⑥

आपदि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनम् ॥ २६ ॥

प्रस्तावः⑥

तदाह—

टिप्पनी⑥

कर्तव्यमित्यध्याहार्थम् । ब्राह्मणस्याऽध्यापयितुरलाभ आपत् । तत्राऽऽपदि ब्राह्मणेन राजन्ये वैश्ये वाऽध्ययनं कर्तव्यम् । न त्वनधीयानेन स्थातव्यम्। 'ब्राह्मणेने'ति वचनाद्राजन्यवैश्ययोर्नाऽयमनुकल्पः ॥ २६ ॥

26 अनुगमनञ् च पश्चात्

अनुगमनं च पश्चात् २६

▼

⑤

>

▼ Bühler

26. And (during his pupilship) he must walk behind (such a teacher).

▼ हरदत्त-टीका

सूत्रम्⑥

अनुगमनं च पश्चात् ॥ २७ ॥

टिप्पनी⑥

अनुगमनं च पृष्ठतः कर्तव्यं यावदध्ययनम् । पश्चाद्ग्रहणं लज्जादिना कियत्यपि पार्श्वे गतिर्मा भूदिति । सर्वशुश्रूषाप्रसङ्गे नियमः — ब्राह्मणस्याऽनुगमनमेव शुश्रूषेति । तथा च गौतमः-28 'अनुगमनं शुश्रूषे'ति ॥ २७॥

27 तत ऊर्ध्वम् ब्राह्मण

तत ऊर्ध्वं ब्राह्मण एवाग्रे गतौ स्यात् २७

▼

⑤

>

▼ Bühler

27. Afterwards the Brāhmaṇa shall take precedence before (his Kṣatriya or Vaiśya teacher).

▼ हरदत्त-टीका

सूत्रम्⑥

तत ऊर्ध्वं ब्राह्मण एवाऽग्रे गतौ स्यात् ॥ २८ ॥

टिप्पनी⑥

ततोऽध्ययनादूर्ध्वं समाप्तेऽध्ययने ब्राह्मण एवाग्रतो गच्छेत् ॥ २८ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तावुज्वलायां द्वितीयप्रश्ने चतुर्थी कण्डिका ॥४॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. Manu II, 35.↩

5. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

6. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

7. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

8. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

9. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

13. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

14. Manu II, 69; Yājñ. I, 15.↩

15. Manu II, 144.↩

16. Manu II, 146-148.↩

17. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

18. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

19. आप० ध० १.३०.८.↩

20. Manu II, 147.↩

21. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

22. Manu II, 37.↩

23. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

24. -26. Āśv. Gṛ. Sū. I, 19, 5, 7; Weber, Ind. Stud. X, 21.↩

25. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

26. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

27. The meaning of the Sūtra is, that the initiation shall be performed as soon as the child is able to begin the study of the Veda. If it is so far developed at eight years, the ceremony must then be performed; and if it be then neglected, or, if it be neglected at any time when the capacity for learning exists, expiation prescribed in the following Sūtras must be performed. The age of sixteen in the case of Brāhmaṇas is the latest term up to which the ceremony may be deferred, in case of incapacity for study only. After the lapse of the sixteenth year, the expiation becomes also necessary. Manu II, 38; Yājñ. I, 37.↩

28. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

०५①

01 सर्वविद्यानाम् अप्य् उपनिषदाम्④

सर्व-विद्यानाम् अप्य् उपनिषदाम् उपाकृत्या ऽनध्ययनं तद्-अहः १

▼

⑤

>

▼ Bühler

1. On the day on which, beginning the study of the whole sacred science, the Upaniṣads (and the rest, he performs the Upākarma in the morning) he shall not study (at night). 1

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वविद्यानामप्युपनिषदामुपाकृत्याऽनध्ययनं तदहः ॥१॥

टिप्पनी⑥

कर्मणि षष्ठी । सर्वविद्या अङ्गविद्या अप्युपनिषद उपाकृत्याध्येतुमारभ्य वदहरनध्ययनं तस्मिन्नहन्यध्ययनं न कर्तव्यम् । उपनिषद्ग्रहणं प्राधान्यख्यापनार्थम । ब्राह्मणा आयाता, वसिष्ठोऽध्यायात इतिवत् ॥१॥

02 अधीत्य चाविक्रमणं सद्यः

अधीत्य चाविक्रमणं सद्यः २

▼

⑤

>

▼ Bühler

2. And he shall not leave his teacher at once after having studied (the Veda and having returned home) 2

▼ हरदत्त-टीका

सूत्रम्⑥

अधीत्य चाऽविप्रक्रमणं सद्यः ॥२॥

टिप्पनी⑥

अधीत्य3 'वेदमधीत्य स्नास्य'न्नित्यवसरे आचार्यसकाशात् सद्यो विप्रक्रमणं न कर्तव्यं नाऽपगन्तव्यम् । प्रायेण मकारात्परमिकारमधीयते । तत्राप्येष एवार्थः । इकारस्तु छान्दसोऽपपाठो वा4 ॥२॥

03 यदि त्वरेत गुरोः

यदि त्वरेत - गुरोः समीक्षायां स्वाध्यायम् अधीत्य कामं गच्छेत् । एवम् उभयोः शिवं भवति ३

▼

⑤

>

▼ Bühler

3. If he is in a hurry to go, he shall perform the daily recitation of the Veda in the presence of his teacher, and then go at his pleasure. In this manner good fortune will attend both of them.

▼ हरदत्त-टीका

सूत्रम्⑥

यदि त्वरेत गुरोः समीक्षायां स्वाध्यायमधीत्य कामं गच्छेदेवमुभयोः शिवं भवति ॥ ३ ॥

टिप्पनी⑥

यदि कार्यवशात् गन्तुं त्वरेत तदा गुरोराचार्यस्य समीक्षायां सन्दर्शने संश्रये स्वाध्यायं प्रश्नावरमधीत्य यथाकामं गच्छेत् । एवं कृते उभयोः शिष्याचार्ययोः शिवं भवतीति ॥ ३॥

04 समावृत्तञ् चेदाचार्योऽभ्यागच्छेत्तमभिमुखो ऽभ्यागम्य

समावृत्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखो ऽभ्यागम्य तस्योपसंगृह्य न बीभत्समान उदकमुपस्पृशेत्पुरस्कृत्योपस्थाप्य यथोपदेशं पूजयेत् ४

▼

⑤

>

▼ Bühler

4. If the (former) teacher visits him after he has returned home, he shall go out to meet him, embrace his (feet), and he shall not wash himself (after that act), showing disgust. He then shall let him pass first into the house, fetch (the materials necessary for a hospitable reception), and honour him according to the rule. 5

▼ हरदत्त-टीका

सूत्रम्⑥

समावृत्तं चेदाचार्योऽभ्यागच्छेत्तमभिमुखोऽभ्यागम्य तस्योपसङ्गृह्य न बीभत्समान उदकमुपस्पृशेत् पुरस्कृत्योपस्थाप्य यथोपदेशं पूजयेत् ॥ ४ ॥

टिप्पनी⑥

समावृत्तं चेत् शिष्यं कृतदारमाचार्योऽभ्यागच्छेत् अतिथिधर्मेण । तमभिमुखोऽभ्यागम्य । तस्योपसंगृह्य । कर्मणि षष्ठी। तमुपसंगृह्य । यद्यपि तस्य चाण्डालादिस्पर्शः सम्भाव्यते, तथापि न बीभत्समान उदकमुपस्पृशेत् न स्नायात् । उपसंग्रहणे वा धूलिधूसरौ पादौ स्पृष्ट्वा न बीभत्समान उदकमुपस्पृशेत् । ततस्तं पुरस्कृत्य गृहप्रवेशे अग्रे कृत्वा । पूजासाधनान्युपस्थाप्य यथोपदेशं गृह्योक्तेन मार्गेण मधुपर्केण पूजयेत् । पूजाविधानं गृह्योक्तस्याऽयमनुवाद आसनादिषु विशेषं वक्तुम् ॥ ४ ॥

05 आसने शयने भक्ष्ये

आसने शयने भक्ष्ये भोज्ये वासिसि वा संनिहिते निहीनतरवृत्तिः स्यात् ५

▼

⑤

>

▼ Bühler

5. If his former teacher is) present, he himself shall use a seat, a bed, food, and garments inferior to, and lower (than those offered to the teacher.

▼ हरदत्त-टीका

सूत्रम्⑥

आसने शयने भक्ष्ये वाससि वा सन्निहिते निहीनतरवृत्तिः स्यात् ॥ ५ ॥

प्रस्तावः⑥

तमाह-

टिप्पनी⑥

सन्निहित आचार्य तस्मिन्नेव गृहे अपवरकादिकं प्रविष्टे आसनादिषु निहीनतरवृत्तिः स्यात् । तरप् निर्देशात् नीच आसने गुणतोऽपि निकृष्ट आसीत । एवं शयनादिश्वपि द्रष्टव्यम् ॥ ५ ॥

06 तिष्ठन्सव्येन पाणिनानुगृह्याचार्यमाचमयेत्

तिष्ठन्सव्येन पाणिनानुगृह्याचार्यमाचमयेत् ६

▼

⑤

>

▼ Bühler

6. Standing (with his body bent), he shall place his left hand (under the water-vessel, and bending with his other hand its mouth downwards), he shall offer to his teacher water for sipping. 6

▼ हरदत्त-टीका

सूत्रम्⑥

तिष्ठन् सव्येन पाणिनाऽनुगृह्याऽऽचार्य7माचमयेत् ॥६॥

टिप्पनी⑥

तिष्ठन्निति प्रह्व उच्यते, स्थानयोगात् । न हि साक्षात्तिष्ठन्नाचमयितुं प्रभवति । सव्येन पाणिना करकादिकमनुगृह्याऽधस्ताद्गृहीत्वा इतरेण द्वारमवमृश्येत्यर्थसिद्धत्वादनुक्तम् । एवं कृत्वाऽऽचार्यमाचमयेत् स्वयमेव शिष्यः। एवं हि स8 सम्मतो भवति । आचार्ये प्रकृते पुनराचार्य ग्रहणमातिथ्यादन्यत्राप्याचार्यमाचमयन्नेवमेवाऽऽचमयेदिति ॥ ६॥

07 अन्यं वा समुदेतम्

अन्यं वा समुदेतम् ७

▼

⑤

>

▼ Bühler

7. And (he shall offer water for sipping in this manner) to other guests also who possess all (good qualities) together. 9

▼ हरदत्त-टीका

सूत्रम्⑥

अन्यं वा समुदेतम् ॥ ७॥

टिप्पनी⑥

वाशब्दः समुच्चये । अन्यमप्येवमेवाचमयेत् । स चेत् समुदेतः कुलशीलवृत्तविद्यावयोभिरुपेतो भवति ॥७॥

08 स्थानासनचङ्क्रमणस्मितेष्वनुचिकीर्षन्

स्थानासनचङ्क्रमणस्मितेष्वनुचिकीर्षन् ८

▼

⑤

>

▼ Bühler

8. He shall imitate (his teacher) in rising, sitting, walking, about, and smiling. 10

▼ हरदत्त-टीका

सूत्रम्⑥

स्थानासनचंक्रमणस्मितेष्वनुचिकीर्षन् ॥ ८ ॥

टिप्पनी⑥

व्यवहितमपि स्यादित्यपेक्ष्यते। चिकीर्षया करणं लक्ष्यते। स्थानादिष्वाचार्यस्य पश्चाद्भावी स्यात्। न पूर्वभावी। न युगपद्भावी ॥ ८॥

09 सन्निहिते मूत्रापुरीषवातकर्मोच्चैर्भाषाहासष्ठेवनदन्तस्कवननिःशृङ्खणभ्रुक्षेपणतालननिष्ठ्यानीति

संनिहिते मूत्रापुरीषवातकर्मोच्चैर्भाषाहासष्ठेवनदन्तस्कवननिःशृङ्खणभ्रुक्षेपणतालननिष्ठ्यानीति ९

▼

⑤

>

▼ Bühler

9. In the presence (of his teacher) he shall not void excrements, discharge wind, speak aloud, laugh, spit, clean his teeth, blow his nose, frown, clap his hands, nor snap his fingers.

▼ हरदत्त-टीका

सूत्रम्⑥

सन्निहिते मूत्रपुरीषवातकर्मोच्चैर्भाषाहास11ष्ठीवनदन्तस्कवननिःशृङ्खणभ्रुक्षेपणतालननिष्ठयानीति ॥ ९ ॥

टिप्पनी⑥

वातकर्म अपानवायोरुत्सर्गः। उच्चैर्भाषा महता स्वनेन सम्भाषणं केनाऽपि। ह्वासो हसनम्। ष्ठीवनं श्लेष्मादिनिरसनम्। दन्तस्खलनं दन्तमलापकर्षणम्। परस्परघट्टनमित्यन्ये। निःशृङ्खणं नालिकामलनिस्सारणम्। भ्रुक्षेपणं भ्रूविक्षेपः। छान्दसो ह्रस्वः। तालनं हस्तयोरास्फालनम्।

निष्ठ्यमङ्गुलिस्फोटनम् । इतिशब्दादन्यदपि स्वैरासनादिकम् । वर्जयेदित्यपेक्ष्यते । एतानि मूत्रकर्मादीन्याचार्यस्य सन्निधौ न कुर्यादिति ॥९॥

10 दारे प्रजायाञ् चोपस्पर्शनभाषा

दारे प्रजायां चोपस्पर्शनभाषा विस्रम्भपूर्वाः परिवर्जयेत् १०

▼

⑤

>
▼ Bühler

10. Nor shall he tenderly embrace or address caressing words to his wife or children.

▼ हरदत्त-टीका

सूत्रम्⑥

दारे प्रजायां चोपस्पर्शनभाषा विस्रम्भपूर्वाः परिवर्जयेत् ॥ १० ॥

टिप्पनी⑥

उपस्पर्शनमालिङ्गनाघ्राणादि । भाषाः सम्भाषाश्चाटुप्रभृतयः । एता अध्याचार्ये सन्निहिते12 दारप्रजाविषये विस्रब्धं न कुर्यात् । ज्वरादिपरीक्षायां न दोषः ॥ १०॥

11 वाक्येन वाक्यस्य प्रतीघातमाचार्यस्य

वाक्येन वाक्यस्य प्रतीघातमाचार्यस्य वर्जयेत् ११

▼

⑤

>
▼ Bühler

11. He shall not contradict his teacher,

▼ हरदत्त-टीका

सूत्रम्⑥

वाक्येन वाक्यस्य प्रतिघातमाचार्यस्य वर्जयेच्छ्रेयसां च ॥ ११ ॥

टिप्पनी⑥

आचार्यवाक्यस्य समीचीनस्येतरस्य वा आत्मीयेन वाक्येन तादृशेन प्रतिघातं न कुर्यात् । श्रेयसा च अन्येषामपि प्रशस्ततराणां वाक्यं वाक्येन न प्रतिहन्यात् ॥ ११ ॥

12 श्रेयसाञ् च

श्रेयसां च १२

▼

⑤

>
▼ Bühler

12. Nor any of his betters.

▼ हरदत्त-टीका

सूत्रम्⑥

श्रेयसां च ॥ ११ ॥

टिप्पनी⑥

(पूर्वसूत्रे द्रष्टव्यम्।)

13 सर्वभूतपरीवादाक्रोशांश्च

सर्वभूतपरीवादाक्रोशांश्च १३

▼

⑤

>
▼ Bühler

13. (He shall not) blame or revile any creature. 13

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वभूतपरीवादाक्रोशांश्च ॥ १२ ॥

टिप्पनी⑥

सर्वेषां भूतानां तिरश्चामपि । परीवादान् दोषवादान् । आक्रोशान् अश्लीलवादांश्च वर्जयेत् । परीवादस्य पुनःपुनर्वचनमतिशयेन वर्जनार्थम् ॥ १२ ॥

14 विद्यया च विद्यानाम्

विद्यया च विद्यानाम् १४

▼

⑤

>

▼ Bühler

14. (He shall not revile one branch of) sacred learning by (invidiously comparing it with) another. 14

▼ हरदत्त-टीका

सूत्रम्⑥

विद्यया च विद्यानाम् ॥ १३ ॥

टिप्पनी⑥

विद्यया च विद्यानां परीवादाक्रोशान् वर्जयेत् । ऋग्वेद एव श्रोत्रसुखः, अन्ये श्रवणकटुका इति परीवादाः । तैत्तिरीयकमुच्छिष्टशाखा, 15याज्ञवल्क्यादीनि ब्राह्मणानीदानींतनानि इत्याद्याक्रोश ॥ १३ ॥

15 यया विद्यया न

यया विद्यया न विरोचेत पुनराचार्यमुपेत्य नियमेन साधयेत् १५

▼

⑤

>
▼ Bühler

15. If he is not well versed in a (branch of) sacred learning (which he studied formerly), he shall again go to the (same) teacher and master it, observing the (same) rules as (during his first studentship).

▼ हरदत्त-टीका

सूत्रम्⑥

यया विद्यया न विरोचेत् पुनराचार्यमुपेत्य नियमेन साधयेत् ॥ १४ ॥

टिप्पनी⑥

यया विद्ययाऽधीतया श्रुतया वा न विरोचेत न यशस्वी स्यात् , तामित्यर्थाद्गम्यते । तां विद्यां पुनस्साधयेत् । यथा सम्यक् सिद्धा भवति तथा कुर्यात् । कथम् ? आचार्य तमेवा16न्यं वा उपेत्य उपसद्य । नियमेनाऽपूर्वाधिगमे विद्यार्थस्य यो नियम उक्तः तेन शुश्रूषादिना ॥१४॥

16 उपाकरणादोत्सर्जनादध्यापयितुर्नियमः लोमसंहरणम् मांसं

उपाकरणादोत्सर्जनादध्यापयितुर्नियमः। लोमसंहरणं मांसं श्राद्धं मैथुनमिति च वर्जयेत् १६

▼

⑤

>

▼ Bühler

16. The restrictions (to be kept) by the teacher from the beginning of the course of teaching to its end are, to avoid cutting the hair on the body, partaking of meat or of oblations to the Manes, and connection (with a woman). 17

▼ हरदत्त-टीका

सूत्रम्⑥

उपाकरणाद्योत्सर्जनाध्यापयितुर्नियमो लोमसंहरणं मांसं श्राद्धं मैथुनमिति वर्जयेत् ॥ १५ ॥

प्रस्तावः⑥

अस्मिन्विषयेऽध्यापयितुर्नियमः —

टिप्पनी⑥

लोमसहरणं लोमवापनम् । इदमनाहिताग्निविषयम् । आहिताग्नेस्तु "18अप्यल्पशो लोमानि वापयत इति वाजसनेयकम्" इति ॥ १५ ॥

17 ऋत्वे वा जायाम्

ऋत्वे वा जायाम् १७

▼

⑤

>

▼ Bühler

17. Or (he may have conjugal intercourse) with his wife at the proper season.

▼ हरदत्त-टीका

सूत्रम्⑥

ऋत्वे वा जायाम् ॥ १६ ॥

टिप्पनी⑥

ऋतुकाले वा जायामुपेयात् । स्त्रीणामृतुदिनानि षोडश । तत्रभवः काल ऋत्व्यः। 19भवे छन्दसीति यत्प्रत्यये20 'ऋत्व्यवास्त्व्ये'ति सूत्रेण यणादेशो निपातितः । ऋत्व्य इति रूपसिद्धिः । अत्र यलोपश्छान्दसः। चातुर्मास्येषु प्रयुक्तम्-21 ऋत्वे वा जायाम्, नोपर्यास्ते' इति यथा ॥१६॥

18 यथागमं शिष्येभ्यो विद्यासम्प्रदाने

यथागमं शिष्येभ्यो विद्यासंप्रदाने नियमेषु च युक्तः स्यात् । एवं वर्तमानः पूर्वापरान्संबन्धानात्मानं च क्षेमे युनक्ति १८

▼

⑤

>

▼ Bühler

18. He shall be attentive in instructing his pupils in the sacred learning, in such a manner that they master it, and in

observing the restrictions (imposed upon householders during their teaching . He who acts thus, gains heavenly bliss for himself, his descendants and ancestors.

▼ हरदत्त-टीका

सूत्रम्⑥

यथागमं शिष्येभ्यो विद्यासम्प्रदाने नियमेषु च युक्तः स्यादेवं वर्तमानः पूर्वापरान् सम्बन्धानात्मानं च क्षेमे युनक्ति ॥ १७ ॥

टिप्पनी⑥

येन प्रकारेणाऽऽगमः पाठार्थयोः तथैव शिष्येभ्यो निर्मत्सरेण विद्या सम्प्रदेया। एवंभूते विद्यासम्प्रदाने युक्तो22वहितः स्यात् । ये च गृहस्थस्य नियमोऽध्यापने ऽन्यत्र च, तेष्वपि युक्तः स्यात् । एवं युको वर्तमानः पूर्वान् पितृपितामहप्रपितामहान् । अपरांश्च पुत्रपौत्रनप्तॄन् । सम्बन्धान् । कर्मणि घञ् । सम्बन्धिनः पुरुषान् । आत्मानं च क्षेमे अभये स्थाने नाकस्य पृष्ठे । युनक्ति स्थापयति ॥ १७ ॥

19 मनसा वाचा प्राणेन

मनसा वाचा प्राणेन चक्षुषा श्रोत्रेण त्वक्शिश्नोदरारम्भनणानास्रावान्परिवृञ्जानो ऽमृतत्वाय कल्पते १९

▼

⑤

>

▼ Bühler

19. He who entirely avoids with mind, word, nose, eye, and ear the sensual objects (such as are) enjoyed by the touch, the

organ, or the stomach, gains immortality.

▼ हरदत्त-टीका

सूत्रम्⑥

मनसा वाचा प्राणेन चक्षुषा श्रोत्रेण त्वक्छिश्नोदरारम्भणानास्रावान् परीवृञ्जानोऽमृतत्वाय कल्पते ॥१८॥

टिप्पनी⑥

यैः पुरुष आस्राव्यते बहिराकृष्यते । ते आस्रावाः शब्दादयो विषयाः। ते विशेष्यन्ते त्वक्छिश्नोदरारम्भणान् आरभ्यन्ते23 आलम्ब्यन्त इत्यारम्भणाः । तत्र त्वगालम्बना स्रकचन्दनादयः शिश्नालम्बनाः स्त्र्युपभोगादयः । उदरालम्बना 24भक्ष्यभोज्यादयः। उपलक्षणं त्वगादिग्रहणम् । एवंभूतानास्रावान् मनआदिभिः पञ्चभिरिन्द्रियैः परिवृञ्जानस्सर्वतो वर्जयन् अमृतत्वाय मोक्षाय कल्पते। तत्र वागिति रसनेन्द्रियमाह । प्राण इति घ्राणम् ॥ १८॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने पञ्चमी कण्डिका ॥५॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां द्वितीयप्रश्ने द्वितीयः पटलः ॥२॥

इति द्वितीयः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
5. Manu II, 35.↩

6. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
9. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
10. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
12. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
13. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our

times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

14. Manu II, 69; Yājñ. I, 15.↩
15. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
16. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
17. Manu II, 144.↩
18. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
19. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
20. आप० ध० १.३०.८.↩
21. मनु० रमृ० २.६↩
22. गौ० ध० १. १, २↩
23. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
24. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

०३①

०६①

01 जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारञ्④

जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारं च पृच्छेत् १

▼

⑤

>

▼ Bühler

1. If he has any doubts regarding the caste and conduct of a person who has come to him in order to fulfil his duty (of learning the Veda), he shall kindle a fire (with the ceremonies prescribed for kindling the sacrificial fire) and ask him about his caste and conduct. 1

▼ हरदत्त-टीका

सूत्रम्⑥

जात्याचारसंशये धर्मार्थमागतमग्निमुपसमाधाय जातिमाचारं च पृच्छेत् ॥ १॥

टिप्पनी⑥

अविज्ञातपूर्वो यो **धर्मार्थम्** अध्ययनार्थम् **आगच्छेत्** उपसीदेत्

> 'उपसन्नोऽस्मि भगवन्,
> मैत्रेण चक्षुषा पश्य,
> शिवेन मनसाऽनुगृहाण,
> प्रसीद मामध्यापय

इति ।
तस्य **जात्याचार-संशये** सति,
अग्निम् उपसमाधाय

'यत्र क्वचाग्निमित्याद्यन्यदुपदध्याद्'(२.२.१३,१४.) इत्य्-अन्तं कृत्वा
तत्-सन्निधौ जातिम् आचारं च पृच्छेत्-
'किंगोत्रोऽसि सौम्य, किमाचारश् चासी'ति ॥१॥
02 साधुताञ् चेत्प्रतिजानीतेऽग्निरुपद्र ष्टा

साधुतां चेत्प्रतिजानीतेऽग्निरुपद्र ष्टा वायुरुपश्रोतादित्योऽनुख्याता साधुतां प्रतिजानीते साध्वस्मा अस्तु वितथ एष एनस इत्युक्त्वा शास्तुं प्रतिपद्येत २

▼

⑤

>
▼ Bühler

2. If he declares himself to be (of) good (family and conduct, the teacher elect) shall say,

> 'Agni who sees, Vāyu who hears, Āditya who brings to light, vouch for his goodness; may it be well with this person! He is free from sin.'

Then he shall begin to teach him.

▼ हरदत्त-टीका

सूत्रम्⑥

साधुतां चेत्प्रतिजानीतेऽग्निरुपद्रष्टा वायुरुपश्रोताऽऽदित्योऽऽनुख्याता साधुतां चेत्प्रतिजानीते साध्वस्मा अस्तु वितथ एष एनस इत्युक्त्या शास्तुं प्रतिपद्यते ॥३॥

टिप्पनी⑥

स चेत्साधुतां प्रतिजानीते-

> साधुजन्माऽस्मि,
> अमुष्य पुत्रो
> ऽमुष्य पौत्रो
> ऽमुष्य नप्ता
> साध्वाचारश् चास्मि,
> पित्रैवोपानेषि2, शिक्षिताचारश् चास्मि,
> सम्यक् चावर्तिषि,

विधिबलेन तु बाल्य एव3 स दिष्टां गतिं गतः,
एतस्मात् केवलम् अनधीत-वेद इति, ततो ऽ'ग्निरुपद्रष्टे'त्य्-आदिकं मन्त्रम् उक्त्वा **शास्तुं** शालितुम् अध्यापयितुं धर्मांश् चोपदेष्टुं **प्रतिपद्येत** उपक्रमेत ॥२॥

03 अग्निरिव ज्वलन्न् अतिथिरभ्यागच्छति

अग्निरिव ज्वलन्न् अतिथिरभ्यागच्छति ३

▼

⑤

>
▼ Bühler

3. A guest comes to the house resembling a burning fire. 4

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निरिव ज्वलन्नतिथिरभ्यागच्छति ॥३॥

प्रस्तावः⑥

पञ्चयज्ञान्ते 'अतिथीनेवाग्रे भोजये'दित्युक्तम् । तत्प्रकारं वक्तुं तस्याऽवश्यकर्तव्यतामनेनाऽऽह—

टिप्पनी⑥

अतिथिर्गृहानभ्यागच्छन्नग्निरिव ज्वन्नभ्यागच्छति। तस्मादसौ भोजनादिभिरवश्यं तर्पयितव्यः । निराशस्तु गतो गृहान् दहेदिति ॥ ३॥

04 धर्मेण वेदानामेकैकां शाखामधीत्य

धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति ४

▼

⑤

>
▼ Bühler

4. He is called a Śrotriya who, observing the law (of studentship), has learned one recension of the Veda (which may be current in his family). 5

▼ हरदत्त-टीका

सूत्रम्⑥

धर्मेण वेदानामेकैकां शाखामधीत्य श्रोत्रियो भवति ॥४॥

प्रस्तावः⑥

इदानीमतिथिलक्षणं वक्तुं तदुपयोगिश्रोत्रियलक्षणमाह —

टिप्पनी⑥

विद्यार्थस्य यो नियमः स धर्मः । तेन वेदानां यां काञ्चन शाखामधीत्य श्रोत्रियो भवति। पुरुषस्य हि प्रतिवेदमकैका शाखा भवति। या पूर्वैः परिगृहीताध्ययनानुष्ठानाभ्यां सा प्रतिवेदं स्वशाखा । तामधीत्य श्रोत्रियो भवति, न तु प्रतिवेदमैकेकामधीत्य श्रोत्रियो भवतीति। लोकविरोधात् । लोके हि यां कांचनैकां शाखामधीयानः श्रोत्रिय इति प्रसिद्धः।

05 स्वधर्मयुक्तङ् कुटुम्बिनमभ्यागच्छति धर्मपुरस्कारो

स्वधर्मयुक्तं कुटुम्बिनमभ्यागच्छति धर्मपुरस्कारो नान्यप्रयोजनः सोऽतिथिर्भवति ५

▼

⑤

>
▼ Bühler

5. He is called a guest (who, being a Śrotriya), approaches solely for the fulfilment of his religious duties, and with no other object, a householder who lives intent on the fulfilment of his duties. 6

▼ हरदत्त-टीका

सूत्रम्⑥

7स्वधर्मयुक्तं कुटुम्बिनमभ्यागच्छति धर्मपुरस्कारो 8नाऽन्यप्रयोजनः सोऽतिथिर्भवति ॥५॥

प्रस्तावः⑥

अतिथिलक्षणमाह —

टिप्पनी⑥

आदितो यच्छब्दो द्रष्टव्यः । अन्ते स इति दर्शनात् । मध्ये च श्रोत्रियलक्षणोपदेशात् । तदुपजीवनेन सूत्रं योज्यम् । यः श्रोत्रियः स्वधर्मयुक्तं स्वधर्मनिरतं कुटुम्बिनं भार्यया सह वसन्तं गृहस्थम् । आश्रमान्तरनिरासार्थमिदमुक्तम् । न हि ते पचमाना भवन्ति । भिक्षवो हि ते । अभ्यागच्छति उद्दिश्याऽऽगच्छति । धर्मपुरस्कारः 9आचार्याद्यर्थं भिक्षणं धर्मः तं पुरस्करोतीति धर्मपुरस्कारः । कर्मण्यण् । धर्मप्रयोजनः नान्यप्रयोजनः । य एवंभूत एवंभूतमुद्दिष्याऽगच्छति नाऽन्येच्छया सोऽतिथिरिति । 10बौधायनस्तु श्रान्तोऽदृष्टपूर्वः केवलमन्नार्थी नाऽन्यप्रयोजनस्सोतिथिर्भवति । अथ वा सर्ववर्णानामन्यतमः काले यथोपपन्नः सर्वेषामतिथीनां श्रेष्ठोऽतिथिर्भवती"ति ॥ ५॥

06 तस्य पूजायां शान्तिः

तस्य पूजायां शान्तिः स्वर्गश्च ६

▼

⑤

>

▼ Bühler

6. The reward for honouring (such a guest) is immunity from misfortunes, and heavenly bliss. 11

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य पूजायां शान्तिः स्वर्गश्च ॥ ६॥

टिप्पनी⑥

तस्यातिथेः पूजायां कृतायां शान्तिरुपद्रवाणामिह भवति । प्रेत्य च स्वर्गलाभः ॥ ६॥

07 तमभिमुखोऽभ्यागम्य यथावयः समेत्य

तमभिमुखोऽभ्यागम्य यथावयः समेत्य तस्यासनमाहारयेत् ७

▼

⑤

>
▼ Bühler

7. He shall go to meet such (a guest), honour him according to his age (by the formulas of salutation prescribed), and cause a seat to be given to him.

▼ हरदत्त-टीका

सूत्रम्⑥

तमभिमुखोऽभ्यागम्य यथावयस्समेत्य तस्यासनमाहारयेत्॥ ७ ॥

टिप्पनी⑥

तमतिथिमभिमुखोऽभ्यागच्छेत् । अभ्यागम्य यथावयः वयसोऽनुरूपं प्रत्युत्थानाभिवादनादिना समेयात सङ्गच्छेत् । समेत्य च तस्यासनमाहारयेत् शिष्यादिभिः । अभावे स्वयमाहरेत् ॥ ७॥

08 शक्तिविषये नाबहुपादमासनम् भवतीत्येके

शक्तिविषये नाबहुपादमासनं भवतीत्येके ८

▼

⑤

>
▼ Bühler

8. Some declare that, if possible, the seat should have many feet. 12

▼ हरदत्त-टीका

सूत्रम्⑥

शक्तिविषये नाऽबहुपादमासनं भवतीत्येक ॥ ८॥

टिप्पनी⑥

शक्तौ सत्यां अबहुपादमासनं न देयम् । किं तु बहुपादमेव पीठादिकमित्येके मन्यन्ते । 13स्वमतं त्वबहुपादमपीति ॥ ८ ॥

09 तस्य पादौ प्रक्षालयेत्

तस्य पादौ प्रक्षालयेत् । शूद्र मिथुनावित्येके ९

▼

⑤

>

▼ Bühler

9. The (householder himself) shall wash the feet of that (guest); according to some, two Śūdras shall do it.

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य पादौ प्रक्षालयेच्छूद्रमिथुनावित्येके ॥९॥

टिप्पनी⑥

द्वौ शूद्रौ तस्य पादौ प्रक्षालयेतामित्येके मन्यन्ते । दासवत इदम् ॥९॥

10 अन्यतरोऽभिषेचने स्यात्

अन्यतरोऽभिषेचने स्यात् १०

▼

⑤

>
▼ Bühler

10. One of them shall be employed in pouring water (over the guest, the other in washing his feet).

▼ हरदत्त-टीका

सूत्रम्⑥

अन्यतरोऽभिषेचने स्यात् ॥ १० ॥

प्रस्तावः⑥

अत्र विशेषः—

टिप्पनी⑥

अभिषेचनं करकादिना जलावसेकः । तमेकः कुर्यात् । इतरः प्रक्षालनम् ॥ १०॥

11 तस्योदकमाहारयेन्मृन्मयेनेत्येके

तस्योदकमाहारयेन्मृन्मयेनेत्येके ११

▼

⑤

>
▼ Bühler

11. Some declare that the water for the (guest) shall be brought in an earthen vessel. 14

▼ हरदत्त-टीका

सूत्रम्⑥

तस्योदकमाहारयेन्मृण्मयेनेत्येके ॥ ११ ॥

टिप्पनी⑥

मृण्मयेन पात्रेण तस्योदकमाहर्तव्यमित्येके मन्यन्ते । 15स्वमतं तु तैजसेन ॥ ११ ॥

12 नोदकमाचारयेद् असमावृत्तः

नोदकमाचारयेद् असमावृत्तः १२

▼

⑤

>
▼ Bühler

12. But (a guest) who has not yet returned home from his teacher shall not be a cause for fetching water. 16

▼ हरदत्त-टीका

सूत्रम्⑥

नोदकमाहारयेदसमावृत्तः ॥ १२ ॥

टिप्पनी⑥

यदा असमावृत्तो ब्रह्मचारी आचार्यप्रेषितः स्वयमेव वाऽतिथिरभ्यागच्छति तदा नासावुदकमाहारयेत् नासावुदकाहरणस्य प्रयोजकः । नास्मा उदकमाहर्तव्यमिति ॥ १२ ॥

13 अध्ययनसांवृत्तिश्चात्राधिका

अध्ययनसांवृत्तिश्चात्राधिका १३

▼

⑤

>
▼ Bühler

13. In case a (student comes, the host) shall repeat the Veda (together with him) for a longer time (than with other guests).

▼ हरदत्त-टीका

सूत्रम्⑥

अध्ययनसांवृत्तिश्चात्राधिका ॥ १३ ॥

टिप्पनी⑥

अत्र असमावृत्तेऽतिथौ अध्ययनसंवृत्तिश्चाधिका इतरस्मादतिथेः । अध्ययनस्य सह निष्पादनमध्ययनसंवृत्तिः। यः प्रदेशस्तस्याऽऽगच्छति स तेन सह कियन्तञ्चित्कालं वक्तव्य इति । प्रसिद्धे तु पाठे पूर्वपदान्तस्य समोऽकारस्य छान्दसो दीर्घः ॥ १३॥

14 सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवरार्ध्येनेति

सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवरार्ध्येनेति १४

▼

⑤

>
▼ Bühler

14. He shall converse kindly (with his guest), and gladden him with milk or other (drinks), with eatables, or at least with water.

▼ हरदत्त-टीका

सूत्रम्⑥

सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवरार्ध्येनेति ॥१४॥

टिप्पनी⑥

ततः पादप्रक्षालनस्य समध्ययनस्य वाऽनन्तरमतिथिं प्रियवचनेन सान्त्वयेत् । सान्त्वयित्वा गव्यादिभीरसैः फलादिभिश्च भक्ष्यैरन्ततोऽद्भिरपि तावत्तर्पयेत् तृप्तिं कुर्यात् । 'अवरार्थेने'ति जघन्यकल्पतां सूचयति । अप्यन्तत इत्यर्थः । इतिशब्दादेवमादिभिरन्यैरपि ॥ १४॥

15 आवसथन् दद्यादुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनञ्

आवसथं दद्यादुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनं चेति १५

▼

⑤

>

▼ Bühler

15. He shall offer to his guest a room, a bed, a mattress, a pillow with a cover, and ointment, and what else (may be necessary). 17

▼ हरदत्त-टीका

सूत्रम्⑥

आवसथं दद्यादुपरिशय्यामुपस्तरणमुपधानं सावस्तरणमभ्यञ्जनं चेति ॥ १५ ॥

टिप्पनी⑥

आवसथो विश्रामस्थानम् । उपरिशय्या खट्वा । उपस्तरणं तूलिका। उपधानमुपबर्हणम् । अवस्तरणमुपरिपटः । तत्सहितमुपधानमुपस्तरणं च । अभ्यञ्जनं पादयोः तैलं घृतं वा। एतत्सर्वं दद्यात् । भोजनात्प्रागूर्ध्वं वा अपेक्षिते काले । इतिशब्दादन्यदप्यपेक्षितम् ॥ १५ ॥

16 अन्नसंस्कर्तारमाहूय व्रीहीन्यवान्वा तदर्थान्निर्वपेत्

अन्नसंस्कर्तारमाहूय व्रीहीन्यवान्वा तदर्थान्निर्वपेत् १६

▼

⑤

>

▼ Bühler

16. (If the dinner has been finished before the arrival of the guest), he shall call his cook and give him rice or yava for (preparing a fresh meal for) the guest. 18

▼ हरदत्त-टीका

सूत्रम्⑥

अन्नसंस्कर्तारमाहूय ब्रीहीन् यवान्वा तदर्थान्निर्वपेत् ॥ १६ ॥

टिप्पनी⑥

यः पचति तमन्नसंस्कर्तारमाहूय तदर्थानतिथ्यर्थान् ब्रीहीन्यवान्वा निर्वपेत् पृथक्कृत्य दद्यात्-अमुष्मै पचेति । ब्रीहियवग्रहणमुपलक्षणम् । इदं भुक्तवत्सु सर्वेष्वतिथावुपस्थिते द्रष्टव्यम् ॥ १६ ॥

17 उद्धृतान्यन्नान्यवेक्षेतेदम् भूया

उद्धृतान्यन्नान्यवेक्षेतेदं भूया १७

▼

⑤

>

▼ Bühler

17. (If dinner is ready at the arrival of the guest), he himself shall portion out the food and look at it, saying (to himself), 'Is this

(portion) greater, or this?'

▼ हरदत्त-टीका

सूत्रम्⑥

उद्धृतान्यन्नान्यवेक्षेतेदं भूया३इद३मिति ॥ १७ ॥

प्रस्तावः⑥

भोजनकाले त्वाह —

टिप्पनी⑥

यावन्तो भोक्तारस्तावद्वा अन्नान्युद्धृत्य पृथक्पात्रेषु कृत्वा स्वयं संविभागं कृत्वा तान्यन्नान्यवेक्षेत-किमिदं भूयः प्रभूतमिदं वेति । विचारे प्लुतः । 19पूर्वं तु भाषायामित्येतदुपेक्षितं छान्दसोऽयं 20प्रयोग इति ॥ १७॥

18 इदा३मिति भूय उद्धरेत्येव

इदा३मिति भूय उद्धरेत्येव ब्रूयात् १८

▼

⑤

>

▼ Bühler

18. He shall say, 'Take out a larger (portion for the guest).'

▼ हरदत्त-टीका

सूत्रम्⑥

भूय उद्धरेत्येव ब्रूयात् ॥ १८॥

टिप्पनी⑥

एवमवेक्ष्याऽतिथ्यर्थं भूय उद्धरेत्येव ब्रूयात् ॥ १८ ॥

19 द्विषन्द्विषतो वा नान्नमश्नीयाद्दोषेण

द्विषन्द्विषतो वा नान्नमश्नीयाद्दोषेण वा मीमांसमानस्य मीमांसितस्य वा १९

▼

⑤

>

▼ Bühler

19. A guest who is at enmity (with his host) shall not eat his food, nor (shall he eat the food of a host) who hates him or accuses him of a crime, or of one who is suspected of a crime. 21

▼ हरदत्त-टीका

सूत्रम्⑥

द्विषन्द्विषतो वा नान्नमश्नीयाद्दोषेण वा मीमांसमानस्य मीमांसितस्य वा ॥ १९ ॥

टिप्पनी⑥

यं स्वयमतिथिं द्विषन्भवति यो वाऽऽत्मानं द्वेष्टि यो वाऽऽत्मानं दोषेण मीमांसते आत्मनि स्तेयादिदोषं सम्भावयति । यो वा दोषेण मीमांसितः यत्र लौकिका दोषं सम्भावयन्ति, तस्यास्य सर्वस्यान्नं नाश्नीयात् ॥१९॥

20 पाप्मानं हि स

पाप्मानं हि स तस्य भक्षयतीति विज्ञायते २०

▼

⑤

>

▼ Bühler

20. For it is declared in the Veda that he (who eats the food of such a person) eats his guilt.

▼ हरदत्त-टीका

सूत्रम्⑥

पाप्मानं हि स तस्य भक्षयतीति विज्ञायते ॥ २० ॥

टिप्पनी⑥

यः एवंविधस्याऽन्नमश्नाति, स तस्य पाप्मानमेव भक्षयतीति विज्ञायते ॥ २० ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने षष्ठी कण्डिका ॥ ६ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition. ↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

5. Manu II, 35.↩

6. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

9. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

10. आप० ध० १.३०.८.↩

11. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

12. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

15. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

16. Manu II, 69; Yājñ. I, 15.↩

17. Manu II, 144.↩

18. Manu II, 146-148.↩

19. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

20. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

21. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

०७①

01 स एष प्राजापत्यः④

स एष प्राजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः १

▼

⑤

>

▼ Bühler

1. This reception of guests is an everlasting (Śrauta)-sacrifice offered by the householder to Prajāpati. 1

▼ हरदत्त-टीका

सूत्रम्⑥

स एष प्रजापत्यः कुटुम्बिनो यज्ञो नित्यप्रततः ॥१॥

टिप्पनी⑥

स एषोऽभिहितो मनुष्ययज्ञः प्राजापत्यः प्रजापतिना दृष्टः, तद्दैवत्यो वा । कुटुम्बिनो नित्यप्रततो, यज्ञः नाऽग्निष्टोमादिवत् कादाचित्कः ॥१॥

02 योऽतिथीनामग्निः स आहवनीयो

योऽतिथीनामग्निः स आहवनीयो यः कुटुम्बे स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः २

▼

⑤

>

▼ Bühler

2. The fire in the stomach of the guest (represents) the Āhavanīya, (the sacred fire) in the house of the host represents the Gārhapatya, the fire at which the food for the guest is cooked (represents) the fire used for cooking the sacrificial viands (the Dakṣiṇāgni). 2

▼ हरदत्त-टीका

सूत्रम्⑥

योऽतिथीनामग्निः स आहवनीयो यः कुटुम्बे स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्यपचनः ॥२॥

टिप्पनी⑥

तस्याऽग्नीन् सम्पादयति —

टिप्पनी⑥

योऽतिथीनां जाठरोऽग्निः स आवाहनीयः, तत्र हि हूयते । यः कुटुम्बे गृहे अग्निरोपासनः स गार्हपत्यः, नित्यधार्यत्वात् । यस्मिन् पच्यते3 लौकिकाग्नौ सोऽन्वाहार्यपचनः दक्षिणाग्निः, तत्र 4ह्यन्वाहार्यं पच्यते ॥२॥

03 ऊर्जम् पुष्टिम् प्रजाम्

ऊर्जं पुष्टिं प्रजां पशूनिष्टापूर्तमिति गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ३

▼

⑤

>

▼ Bühler

3. He who eats before his guest consumes the food, the prosperity, the issue, the cattle, the merit which his family acquired by sacrifices and charitable works.

▼ हरदत्त-टीका

सूत्रम्⑥

ऊर्जं पुष्टिं प्रजां पशुनिष्टापूर्तमिति गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति ॥ ३॥

टिप्पनी⑥

योऽतिथेः पूर्वमश्नाति स गृहाणां कुलस्य सम्बन्धि ऊर्गादिकमश्नाति भक्षयति विनाशयति । ऊर्गन्नम् । इष्टमग्निहोत्रादि । पूर्तं स्मार्तं कर्म5 कूपखातादि । अन्ये प्रसिद्धाः ॥३॥

04 पयोपसेचनमन्नमग्निष्टोमसम्मितं सर्पिषोक्थ्यसम्मितम् मधुनातिरात्रसम्मितम्

पयोपसेचनमन्नमग्निष्टोमसंमितं सर्पिषोक्थ्यसंमितं मधुनातिरात्रसंमितं मांसेन द्वादशाहसंमितमुदकेन प्रजावृद्धिरायुषश्च ४

▼

⑤

>
▼ Bühler

4. Food (offered to guests) which is mixed with milk procures the reward of an Agniṣṭoma-sacrifice. Food mixed with clarified butter procures the reward of an Ukthya, food mixed with honey the reward of an Atirātra, food accompanied by meat the reward of a Dvādaśāha, (food and) water numerous offspring and long life. 6

▼ हरदत्त-टीका

सूत्रम्⑥

पय उपसेचनमन्नमग्निष्टोमसम्मितं सर्पिषोक्थ्यसम्मितं, मधुनाऽतिरात्रसम्मितं, मांसेन द्वादशाहसम्मित, मुदकेन प्रजावृद्धिरायुषश्च ॥४॥

टिप्पनी⑥

पय उपसेचनं यस्य तदन्नम7ग्निष्टोमतुल्यम् । सर्पिषा, उपसिक्तमिति प्रकरणाद्गम्यते तदुक्थ्यतुल्यम् । मधुनोपसिक्तमन्नमतिरात्रतुल्यम् । मांसेन सह दत्तमन्नं द्वादशाहतुल्यम् । उदकेन सह दत्तेन प्रजावृद्धिर्भवति। आयुषश्च । उपसमस्तमपि वृद्धिरिति सम्बध्यते ॥४॥

05 प्रिया अप्रियाश्चातिथयः स्वर्गं

प्रिया अप्रियाश्चातिथयः स्वर्गं लोकं गमयन्तीति विज्ञायते ५

▼

⑤

>
▼ Bühler

5. It is declared in the Veda, 'Both welcome and indifferent guests procure heaven (for their host).'

▼ हरदत्त-टीका

सूत्रम्⑥

प्रिया अप्रियाश्चाऽतिथियः स्वर्गं लोकं गमयन्तीति विज्ञायते ॥ ५ ॥

टिप्पनी⑥

प्रियाः प्रसिद्धाः अप्रिया उदासीनाः, द्विषतो निषिद्धत्वात् ॥ ५ ॥

06 स यत्प्रातर्मध्यन्दिने सायमिति

स यत्प्रातर्मध्यंदिने सायमिति ददाति सवनान्येव तानि भवन्ति ६

▼

⑤

>
▼ Bühler

6. When he gives food in the morning, at noon, and in the evening, (these gifts) are the Savanas (of that sacrifice offered to Prajāpati). 8

▼ हरदत्त-टीका

सूत्रम्⑥

स यत्प्रातर्मध्यन्दिने सायमिति ददाति सवनान्येव तानि भवन्ति ॥ ६ ॥

टिप्पनी⑥

त्रिषु कालेषु दीयमानान्यन्नानि अस्य यज्ञस्य 9प्रातस्सवनादीनि त्रीणि भवन्ति । तस्मात्सर्वेषु कालेषु दातव्यमिति ॥ ६ ॥

07 यदनुतिष्ठत्युदवस्यत्येव तत्

यदनुतिष्ठत्युदवस्यत्येव तत् ७

▼

⑤

>
▼ Bühler

7. When he rises after his guest has risen (to depart), that act represents the Udavasānīyā iṣṭi (of a Vedic sacrifice). 10

▼ हरदत्त-टीका

सूत्रम्⑥

यदनुतिष्ठत्युदवस्यत्येव तत ॥ ७ ॥

टिप्पनी⑥

यत् गन्तुमुत्तिष्ठन्तमतिथिमनूत्तिष्टति तदुदवस्यत्येव11 उदवसानीया साऽस्य यज्ञस्येति । प्रायेणोच्छब्दं न पठन्ति । केवलमनुशब्दमेव पठन्ति । तत्राप्यर्थः स एव ॥ ७ ॥

08 यत्सान्त्वयतति सा दक्षिणा

यत्सान्त्वयतति सा दक्षिणा प्रशंसा ८

▼

⑤

>

▼ Bühler

8. When he addresses (the guest) kindly, that kind address (represents) the Dakṣiṇā. 12

▼ हरदत्त-टीका

सूत्रम्⑥

यत्सान्त्वयति सा दक्षिणा प्रशंसा ॥८॥

टिप्पनी⑥

यत् सान्त्वयति प्रशंसति सा प्रशंसा दक्षिणा ॥ ८॥

09 यत्संसाधयति ते विष्णुक्रमाः

यत्संसाधयति ते विष्णुक्रमाः ९

▼

⑤

>
▼ Bühler

9. When he follows (his departing guest, his steps represent) the steps of Viṣṇu. 13

▼ हरदत्त-टीका

सूत्रम्⑥

यत्संसाधयति ते 14विष्णुक्रमाः ॥ ९ ॥

टिप्पनी⑥

संसाधनमनुव्रजनम् ॥ ९॥

10 यदुपावर्तते सोऽवभृथः

यदुपावर्तते सोऽवभृथः १०

▼

⑤

>
▼ Bühler

10. When he returns (after having accompanied his guest), that (act represents) the Avabhṛtha, (the final bath performed after the completion of a sacrifice.)

▼ हरदत्त-टीका

सूत्रम्⑥

यदुपावर्तते 15सोऽवभृथः ॥ १० ॥

टिप्पनी⑥

उपावर्तनं अनुव्रज्य प्रत्यावर्ननम् ॥ १० ॥

11 इति हि ब्राह्मणम्

इति हि ब्राह्मणम् ११

▼

⑤

>
▼ Bühler

11. Thus (a Brāhmaṇa shall treat) a Brāhmaṇa, (and a Kṣatriya and a Vaiśya their caste-fellows.)

▼ हरदत्त-टीका

सूत्रम्⑥

इति ब्राह्मणम् ॥ ११ ॥

टिप्पनी⑥

इति ब्राह्मणमित्यस्य सर्वेण सम्बन्धः ॥ ११ ॥

12 राजानञ् चेदतिथिरभ्यागच्छेच्छ्रेयसीमस्मै पूजामात्मनः

राजानं चेदतिथिरभ्यागच्छेच्छ्रेयसीमस्मै पूजामात्मनः कारयेत् १२

▼

⑤

>

▼ Bühler

12. If a guest comes to a king, he shall make (his Purohita) honour him more than himself. 16

▼ हरदत्त-टीका

सूत्रम्⑥

राजानं चेदतिथिरभ्यागच्छेच्छ्रेयसीमस्मै पूजामात्मनः कारयेत् ॥ १२ ॥

टिप्पनी⑥

17राजा अभिषिक्तः क्षत्रियः । सोऽतिथयेऽभ्यागताय आत्मनोऽपि सकाशात् श्रेयसी पूजां कारयेत् पुरोहितेन ॥ १२ ॥

13 आहिताग्निञ् चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्

आहिताग्निं चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात् । व्रात्य क्वावात्सीरिति । व्रात्य उदकमिति । व्रात्य तर्पयंस्त्विति १३

▼

⑤

>

▼ Bühler

13. If a guest comes to an Agnihotrin, he himself 18 shall go to meet him and say to him: 'O faithful fulfiller of thy vows, where didst thou stay (last night)?' (Then he offers water, saying): 'O faithful fulfiller of thy vows, here is water.' (Next he offers milk or the like, saying): 'O faithful fulfiller of thy vows, may (these fluids) refresh (thee).'

▼ हरदत्त-टीका

सूत्रम्⑥

आहिताग्निं चेदतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयाद्-व्रात्य क्वाऽवात्सीरिति, व्रात्योदकमिति, व्रात्य तर्पयंस्त्विति ॥ १३ ॥

टिप्पनी⑥

यद्याहिताग्निमुद्दिश्यातिथिरागच्छेत्, तत एनमतिथिं स्वयमेवाभिमुख उपसर्पेत् । अत्र स्वयमिति वचनादनाहिताग्निरन्येन शिष्यादिना कारयन्नपि न दुष्यति । तमभ्युदेत्य ब्रूयात्-व्रात्य क्वावासीरिति कुशलप्रश्नः । व्रते साधुर्व्रत्यः स एव व्रात्य इति पूजनाभिधानम् । क्व पूर्वस्यां रात्र्यामुषितवानसीति । 'व्रात्योदक'मित्युदकदानम् । 'व्रात्य तर्पयस्त्वि'ति गोरसादिभिस्तर्पणम् । अनुस्वारसकारौ छान्दसौ । क्रियाभेदात्प्रतिमन्त्रमितिशन्दः । एतत्सर्वेषु कालेषु कर्तव्यम् ॥१३॥

14 पुराग्निहोत्रस्य होमादुपांशु जपेत्

पुराग्निहोत्रस्य होमादुपांशु जपेत् । व्रात्य यथा ते मनस्तथास्त्विति । व्रात्य यथा ते वशस्तथास्त्विति । व्रात्य यथा ते प्रियं तथास्त्विति । व्रात्य यथा ते निकामस्तथास्त्विति १४

▼

⑤

>
▼ Bühler

14. (If the guest stays at the time of the Agnihotra, he shall make him sit down to the north of the fire and) murmur in a low voice, before offering the oblations: 'O faithful fulfiller of thy vows, may it be as thy heart desires;' 'O faithful fulfiller of thy vows, may it be as thy will is;' 'O faithful fulfiller of thy vows, may it be as thy wish is;' 'O faithful fulfiller of thy vows, may it be as thy desire is.' 19

▼ हरदत्त-टीका

टिप्पनी⑥

पुराऽग्निहोत्रस्य होमादुपांशु जपेत्-व्रात्य यथा ते मनस्तथाऽस्त्विति, व्रात्य यथा ते वशस्तथाऽस्त्विति, व्रात्य यथा ते प्रियं तथाऽस्त्विति, व्रात्य यथा ते निकामस्तथास्त्विति ॥ १४ ॥

सूत्रम्⑥

स यदि होमकालेऽप्यासीत, तदा पुरा होमादपरेणाग्निं दर्भेषु सादयित्वा 'व्रात्य तथा ते मन' इत्यादिमन्त्रानुपाशु जपेत् ब्रूयात् । तत्र प्रतिमन्त्रमितिशब्दप्रयोगादर्थभेदाच्चतुर्णां विकल्पः । समुच्चय इत्यन्ये । अत्र चाऽध्वर्युर्यजमानो वा यो20होता स जपेत् । ततो जुहुयात् ॥ १४॥

15 यस्योद्धृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्व्रात्य अतिसृज

यस्योद्धृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्व्रात्य अतिसृज होष्यामि । इत्यतिसृष्टेन होतव्यम् । अनतिसृष्टश्चेज्जुहुयाद्दोषं ब्राह्मणमाह १५

▼

⑤

>

▼ Bühler

15. If a guest comes, after the fires have been placed (on the altar), but before the oblations have been offered, (the host) himself shall approach him and say to him: 'O faithful fulfiller of thy vows give me permission; I wish to sacrifice.' Then he shall sacrifice, after having received permission. A Brāhmaṇa declares that he commits a sin if he sacrifices without permission. 21

▼ हरदत्त-टीका

सूत्रम्⑥

यस्योदधृतेष्वहुतेष्वग्निष्वतिथिरभ्यागच्छेत्स्वयमेनमभ्युदेत्य ब्रूयात्-व्रात्याऽतिसृज होष्यामीत्यतिसृष्टेन होतव्यमनतिसृष्टश्चेज्जुहुयाद्दोषं ब्राह्मणमाह ॥ १५ ॥

टिप्पनी⑥

उद्धृतेष्विति बहुवचनं सभ्यावसथ्यापेक्षम्। यस्य तु योऽग्नयः, तस्यापि । अहुतेष्वित्यनेन सामानाधिकरण्यात् होमोऽपि त्रिष्वपि भवति। तेनाऽऽहवनीयहोमानन्तरमतिथावागतेऽपि त्रिषु होमो न कृत इति वक्ष्यमाणो विधिर्भवत्येव । कः पुनरसौ ? स्वयमेनमभ्युदेत्य ब्रूयात् ।

व्रात्याऽतिसृज, अनुजानीहि होष्यामीति । ततो जुहुधीत्यतिसृजेत् । अतिसृष्टेन होतव्यम् । यदि पुनरनतिसृष्टोऽननुज्ञातो जुहुयात्, तस्य दोषमाथर्वणिकानां ब्राह्मणवाक्यमाह । 22तदत्र न पठितं तत्र प्रत्येतव्यम् । अत्र पक्षे स्वयं होमो नियतः ॥ १५ ॥

16 एकरात्रञ् चेदतिथीन्वासयेत्पार्थिवांल् लोकानभिजयति

एकरात्रं चेदतिथीन्वासयेत्पार्थिवांल् लोकानभिजयति द्वितीययान्तरिक्ष्यांस्तृतीयया दिव्यांश्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमितांल् लोकानभिजयतीति विज्ञायते १६

▼

⑤

>

▼ Bühler

16. He who entertains guests for one night obtains earthly happiness, a second night gains the middle air, a third heavenly bliss, a fourth the world of unsurpassable bliss; many nights procure endless worlds. That has been declared in the Veda.

▼ हरदत्त-टीका

सूत्रम्⑥

एकरात्रं चेदतिथीन्वासयेत्पार्थिवाल्ँलोकानभिजयति द्वितीययाऽऽन्तरिक्ष्यांस्तृतीयया दिव्यांश्चतुर्थ्या परावतो लोकानपरिमिताभिरपरिमिताल्ँलोकानभिजयतीति विज्ञायते ॥ १६ ॥

टिप्पनी⑥

य23एकां रात्रिमतिथीन् गहे वासयति, स पृथिव्यां भवान् लोकानभिजयति । द्वितीयया रात्र्या आन्तरिक्ष्यान् । तृतीयया दिव्यान् । चतुर्थ्या परावतः सुखस्य परा मात्रा येषु लोकेषु तानभिजयति । अपरिमिताभीरात्रिभिरपरिमितान् लोकानिति विज्ञायते ब्राह्मणं भवति ॥ १६ ॥

17 असमुदेतश्चेदतिथिर्ब्रुवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय

असमुदेतश्चेदतिथिर्ब्रुवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यात् । एवमस्य समृद्धं भवति १७

▼

⑤

>

▼ Bühler

17. If an unlearned person who pretends to be (worthy of the appellation) 'guest' comes to him, he shall give him a seat, water, and food, (thinking) 'I give it to a learned Brāhmaṇa.' Thus (the merit) of his (gift) becomes (as) great (as if a learned Brāhmaṇa had received it).

▼ हरदत्त-टीका

सूत्रम्⑥

असमुदेतश्चेदतिथिर्ब्रुवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यादेवमस्य समृद्धं भवति ॥ १७ ॥

टिप्पनी⑥

विद्यादिभीरहितोऽसमुदेतः । स चेदतिथिरिति ब्रुवाण आगच्छेत्तदा तस्मै आसनादिकं श्रोत्रियायैव ददामीत्येवं मनसि कृत्वा दद्यात् । एवं ददतोऽस्य तद्दानं समृद्धं भवति श्रोत्रियायैव दत्तं भवति ॥ १७॥

इति द्वितीयप्रश्ने सप्तमी कण्डिका ॥ ७ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने तृतीयः पटलः ॥ ३ ॥

इति तृतीयः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition. ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
4. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
5. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
6. Manu II, 35.↩
7. आप० ध० १.३०.८.↩
8. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

13. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

14. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

15. आप० ध० १.३०.८.↩

16. Manu II, 69; Yājñ. I, 15.↩

17. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

18. Manu II, 144.↩

19. Manu II, 146-148.↩

20. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

21. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

22. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

23. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

oɤ①

०८①

01 येन कृतावसथः स्यादतिथिर्न④

येन कृतावसथः *(=दत्ताश्रयः)* स्यादतिथिर्न तं प्रत्युत्तिष्ठेत्प्रत्यवरोहेद्वा पुरस्ताच्चेदभिवादितः १

▼

⑤

>

▼ Bühler

1. On the second and following days of the guest's stay, the host shall not rise or descend (from his couch) in order to salute his (guest), if he has been saluted before (on the first day).

▼ हरदत्त-टीका

सूत्रम्⑥

येन कृतावसथः स्यादतिथिर्न तं प्रत्युत्तिष्ठेत्प्रत्यवरोहेद्वा पुरस्ताच्चेदभिवादितः ॥ १॥

टिप्पनी⑥

येन गृहस्थेनाऽतिथिः कृतावसथः स्यात् 1कृतावासः दत्तावासः स्यात् । द्वितीययान्तरिक्ष्यानित्यादिवचनात् द्वितीयादिष्वहस्सु तं प्रति न प्रत्युत्तिष्ठेत् । नाऽप्यासनात् प्रत्यवरोहेत् । स चेत्तस्मिन्नहनि पूर्वमेवाभिवादितः । अनभिवादिते तु अभिवादनार्थं प्रत्युत्तिष्ठेत्, प्रत्यवरोहेच्च ॥१॥

02 शेषभोज्यतिथीनां स्यात्

शेषभोज्यतिथीनां स्यात् २

▼

⑤

>
▼ Bühler

2. He shall eat after his guests. 2

▼ हरदत्त-टीका

सूत्रम्⑥

शेषभोज्यतिथीनां स्यात् ॥ २ ॥

टिप्पनी⑥

'अतिथीनेवाग्रे भोजये (२.४.११.)दित्येव सिद्धे वचनमिदं प्रमादाद्यन्न दत्तमतिथये, तन्न भुञ्जीतेत्येवमर्थम् ॥ २ ॥

03 न रसान्गृहे भुञ्जीतानवशेषमतिथिभ्यः

न रसान्गृहे भुञ्जीतानवशेषमतिथिभ्यः ३

▼

⑤

>
▼ Bühler

3. He shall not consume all the flavoured liquids in the house, so as to leave nothing for guests. 3

▼ हरदत्त-टीका

सूत्रम्⑥

न रसान् गृहे भुञ्जीताऽनवशेषमतिथिभ्यः ॥ ३ ॥

टिप्पनी⑥

आगामिभ्योऽतिथिभ्यो यथा न किञ्चित् गृहेऽवशिष्यते, तथा गव्यादयो रसा न भोज्याः । सद्यस्सम्पादयितुमशक्यत्वाद्रसानाम् ॥३॥

04 नात्मार्थमभिरूपमन्नम् पाचयेत्

नात्मार्थमभिरूपमन्नं पाचयेत् ४

▼

⑤

>
▼ Bühler

4. He shall not cause sweetmeats to be prepared for his own sake. 4

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽऽत्मार्थमभिरूपमन्नं पाचयेत् ॥ ४ ॥

टिप्पनी⑥

आत्मानमुद्दिश्याऽभिरूपमन्न स्वाद्वपूपादि न पाचयेत् ॥ ४॥

05 गोमधुपर्कार्हो वेदाध्यायः

गोमधुपर्कार्हो वेदाध्यायः ५

▼

⑤

>

▼ Bühler

5. (A guest) who can repeat the (whole) Veda (together with the supplementary books) is worthy to receive a cow and the Madhuparka, 5

▼ हरदत्त-टीका

सूत्रम्⑥

गोमधुपर्कार्हो वेदाध्यायः ॥ ५ ॥

टिप्पनी⑥

साङ्गस्य वेदस्याऽध्येता वेदाध्यायः । सोऽतिथिर्मधुपर्कमर्हति; गां च दक्षिणाम् ॥ ५ ॥

06 आचार्य ऋत्विक् स्नातको

आचार्य, ऋत्विक्, स्नातको, राजा वा धर्मयुक्तः *(मधुपर्कार्हाः)*६

▼

⑤

>

▼ Bühler

6. (And also) the teacher, an officiating priest, a Snātaka, and a just king (though not learned in the Veda).

▼ हरदत्त-टीका

सूत्रम्⑥

आचार्यं ऋत्विक्स्नातको राजा वा धर्मयुक्तः ॥ ६ ॥

टिप्पनी⑥

अवेदाध्याया अप्य् आचार्यादयो गो-मधु-पर्कार्हाः ।

अत एव ज्ञायते—
एकदेशाध्यायिनाव् अप्य् **ऋत्विगाचार्यौ** भवत इति ।
धर्मयुक्त इति राज्ञो विशेषणम् ।
वाशब्दः समुच्चये ॥६॥

07 आचार्यायर्त्विजे श्वशुराय राज्ञ

आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्यो गौर्मधुपर्कश्च ७

▼

⑤

>
▼ Bühler

7. A cow and the Madhuparka (shall be offered) to the teacher, to an officiating priest, to a father-in-law, and to a king, if they come after a year has elapsed (since their former visit).

▼ हरदत्त-टीका

सूत्रम्⑥

आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्यो गौर्मधुपर्कश्च ॥ ७ ॥

टिप्पनी⑥

एतत् 6गृह्ये व्याख्यातम् । गौरत्र दक्षिणाधिका विधीयते ॥७॥

08 दधि मधुसंसृष्टम् मधुपर्कः

दधि मधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टम् ८

▼

⑤

>

▼ Bühler

8. The Madhuparka shall consist of curds mixed with honey, or of milk mixed with honey. 7

▼ हरदत्त-टीका

सूत्रम्⑥

दधि मधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टम् ॥ ८॥

प्रस्तावः⑥

कोऽसौ मधुपर्क इत्यत आह—

टिप्पनी⑥

8गृह्योक्तस्याऽनुवादोऽयमुत्तरविवक्षया ॥ ८ ॥

09 अभाव उदकम्

अभाव उदकम् ९

▼

⑤

>

▼ Bühler

9. On failure (of these substances) water (mixed with honey may be used).

▼ हरदत्त-टीका

सूत्रम्⑥

अभाव उदकम् ॥ ९॥

टिप्पनी⑥

दधिपयसोरलाभ उदकमपि देयम् । मधुसंसृष्टमित्येके । नेत्यन्ये, पूर्वत्र पुनर्मधुसंसृष्टग्रहणादिति ॥ ९॥

10 षडङ्गो वेदः

षडङ्गो वेदः १०

▼

⑤

>

▼ Bühler

10. The Veda has six Aṅgas (auxiliary works). 9

▼ हरदत्त-टीका

सूत्रम्⑥

षडङ्गो वेदः ॥१०॥

प्रस्तावः⑥

वेदाध्याय इत्यत्र विवक्षितं वेदमाह—

टिप्पनी⑥

षड्भिरङ्गैर्युक्तोऽत्र वेदो गृह्यत इति ॥ १० ॥

11 छन्दः कल्पो व्याकरणञ्

छन्दः कल्पो व्याकरणं ज्योतिषं निरुक्तं शीक्षा छन्दोविचितिरिति ११

▼

⑤

>

▼ Bühler

11. (The six auxiliary works are) the Kalpa (teaching the ritual) of the Veda, the treatises on grammar, astronomy, etymology, phonetics, and metrics.

▼ हरदत्त-टीका

सूत्रम्⑥

छन्दोविचितिरिति ॥ ११ ॥

प्रस्तावः⑥

कानि तान्यङ्गानीत्यत आह-~

टिप्पनी⑥

छन्दो वेदः । तत्कल्पयति प्रतिशाखं शाखान्तराधीतेन न्यायप्राप्तेन चाऽङ्गकलापेनोपेतस्य कर्मणः प्रयोगकल्पनयोपस्कुरुत इति छन्दः— कल्पः कल्पसूत्राणि । व्याकरण अर्थविशेषमाश्रित्य पदमन्वाचक्षाणं पदपदार्थप्रतिपादनेन वेदस्योपकारकं विद्यास्थानम् । सूर्यादीनि ज्योतींष्यधिकृत्य प्रवृत्तं शास्त्रं ज्योतिषम् । आदिवृद्ध्यभावे यत्नः कार्यः । तदप्यध्ययनोपयोगिनमनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादयदुपकारकम् । निरुक्तमपि व्याकरणस्यैव कात्स्न्र्यम् । शीक्षा वर्णानां स्थानप्रयत्नादिकमध्ययनकाले कर्मणि च मन्त्राणामुच्चारणप्रकारं शिक्षयतीति । पृषोदरादित्वाद्दीर्घः। गायत्र्यादीनि छन्दांसि यया विचीयन्ते विविच्य ज्ञायन्ते, सा छन्दोविचितिः । एतान्यङ्गानि अङ्गसंस्तवादङ्गत्वम् ।

'मुखं व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसा विचितिः पदे ।

शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते ॥ इति ।
उपकारकत्वाच ॥ ११ ॥

12 शब्दार्थारम्भणानान् तु कर्मणां

(आक्षेपः -) शब्दार्थारम्भणानां तु कर्मणां समाम्नायसमाप्तौ वेदशब्दः *(तेन कल्पोऽपि वेदशब्दवाच्यस् स्यात्)* । तत्र *(६ इति)* संख्या विप्रतिषिद्धा १२

▼

⑤

>
▼ Bühler

12. (If any one should contend that) the term Veda (on account of its etymology, implying that which teaches duty or whereby one obtains spiritual merit) applies to the complete collection of (works which contain) rules for rites to be performed on the authority of precepts, (that, consequently, the Kalpa-sūtras form part of the Veda, and that thereby) the number (fixed above) for those (Aṅgas) is proved to be wrong, 10

▼ हरदत्त-टीका

सूत्रम्⑥

शब्दार्थारम्भणानां तु कर्मणां समाम्नायसमाप्तौ वेदशब्दस्तत्र सङ्ख्या विप्रतिषिद्धा ॥ १२ ॥

प्रस्तावः⑥

उक्त उपकारः, अत्र चोदयति —

टिप्पनी⑥

शब्दार्थतया यान्यारभ्यन्ते न प्रत्यक्षादिप्रमाणगोचरतया, तानि शब्दार्थारम्भणानि कर्माणि वैदिकान्यग्निहोत्रादीनि । तेषां समाम्नाय उपदेशः । तस्य समाप्तौ स यावता ग्रन्थजातेन समाप्तोऽनुष्ठानपर्यन्तो भवति, तत्र वेदशब्दो वर्तते । वेदयति धर्मं विदन्त्यनेनेति वा धर्ममिति । न च मन्त्रब्राह्मणमात्रेणाऽनुष्ठानपर्यन्त उपदेशो भवति । किं तु कल्पसूत्रैरपि सह । ततश्च तेषामपि वेदस्वरूप एवानुप्रवेशात् पञ्चैवाऽङ्गानि । तत्र षट्संख्या विप्रतिषिद्धेति ॥ १२ ॥

13 अङ्गानान् तु प्रधानैरव्यपदेश

(परिहारः -) अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः १३

▼

⑤

>
▼ Bühler

13. (Then we answer), All those who are learned in Mīmāṃsā are agreed that (the terms Veda, Brāhmaṇa, and the like, which are applied to) the principal (works), do not include the Aṅgas (the Kalpa-sūtras and the rest). he remembers at any time during dinner,

▼ हरदत्त-टीका

सूत्रम्⑥

अङ्गानां तु प्रधानैरव्यपदेश इति न्यायवित्समयः ॥१३॥

प्रस्तावः⑥

परिहरति —

टिप्पनी⑥

अङ्गान्येव कल्पसूत्राणि न वेदस्वरूपाणि । पौरुषेयतया स्मरणात् । कतिपयान्येव हि तेषु ब्राह्मणवाक्यानि, भूयिष्ठानि स्ववाक्यानि । अङ्गानां च तेषां प्रधानवाचिभिश्शब्दैः छन्दो वेदो ब्राह्मणमित्यादिभिर्व्यपदेशो न न्याय्य इति न्यायविदां सिद्धान्तः। ताविमौ पूर्वपक्षसिद्धान्तौ 11कल्पसूत्राधिकरणे स्पष्टं द्रष्टव्यौ । यत्तूक्तं न मन्त्रब्राह्मणमात्रेण पूर्ण उपदेश इति। नैष स्थाणोरपराधो यदेनमन्धो न पश्यतीति, पुरुषापराधस्स भवति । इदं तु भवानाचष्टाम्-कल्पसूत्रकाराणामियं प्रयोगकल्पना कुतस्त्यति । न्यायोपबृंहिताभ्यां मन्त्रब्राह्मणाभ्यामिति

वक्तव्यम् । नान्या गतिः । एवं सति भवानपि यततां तादृशस्यामिति । ततो मन्त्रब्राह्मणाभ्यामेव पूर्णमवभोत्स्यत इति ॥१३॥

14 अतिथिन् निराकृत्य यत्र

अतिथिं निराकृत्य यत्र गते भोजने स्मरेत्ततो विरम्योपोष्य १४

▼

⑤

>

▼ Bühler

14. If he remembers at any time that he has refused a guest, he shall at once leave off eating and fast on that day,

▼ हरदत्त-टीका

सूत्रम्⑥

अतिथिं निराकृत्य यत्र गते भोजने स्मरेत्ततो विरम्योपोष्य ॥ १४ ॥

टिप्पनी⑥

अतिथिमागतं केनचित्प्रकारेण निराकृत्य भोजने प्रवृत्तो यत्र गते यदवस्थाप्राप्ते भोजने स्मरेत्-धिङ्गया स निराकृत इति, तत्रैव भोजनाद्विरम्य तस्मिन्नहन्युपोष्य ॥१४॥

इत्यापस्तम्बधर्मसूत्रे उज्वलोपेते द्वितीयप्रश्नेऽष्टमी कण्डिका ॥८॥

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

2. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩

3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

4. Manu II, 35.↩

5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

7. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

9. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

10. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be

understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

०९①

01 श्वोभूते यथामनसन् तर्पयित्वा④

श्वोभूते यथामनसं तर्पयित्वा संसाधयेत् १

▼

⑤

>

▼ Bühler

1. And on the following day (he shall search for him), feast him to his heart's content, and accompany him (on his departure). 1

▼ हरदत्त-टीका

सूत्रम्⑥

श्वो भूते यथामानसं तर्पयित्वा संसाधयेत् ॥ १॥

टिप्पनी⑥

अपरेद्युस्तमन्विष्य यथामानसं यथेच्छं तर्पयित्वा संसाधयेत् गच्छन्तमनुव्रजेत् ॥ १ ॥

02 यानवन्तमा यानात्

यानवन्तमा यानात् २

▼

⑤

>

▼ Bühler

2. (If the guest) possesses a carriage, (he shall accompany him) as far as that.

▼ हरदत्त-टीका

सूत्रम्⑥

यानवन्तमा यानात् ॥ २॥

प्रस्तावः⑥

आ कुत इत्यत आह—

टिप्पनी⑥

स चेदतिथिर्यानवान् भवति, तस्मा तस्याऽऽरोहणादनुव्रजेत् ॥

03 यावन्नानुजानीयादितरः

यावन्नानुजानीयादितरः ३

▼

⑤

>
▼ Bühler

3. Any other (guest he must accompany), until permission to return is given.

▼ हरदत्त-टीका

सूत्रम्⑥

यावन्नाऽनुजानीयादितरः ॥३॥

टिप्पनी⑥

इतरो यानरहितो यावन्नाऽनुजानीयात् गच्छेति, तं तावदनुव्रजेत् ॥३॥

04 अप्रतीभायां सीम्नो निवर्तेत

अप्रतीभायां *(बुद्धौ न जातायाम्)* सीम्नो निवर्तेत ४

▼

⑤

>
▼ Bühler

4. If (the guest) forgets (to give leave to depart), the (host) may return on reaching the boundary of his village.

▼ हरदत्त-टीका

सूत्रम्⑥

अप्रतीभायां सीम्नो निवर्तेत ॥ ४ ॥

टिप्पनी⑥

यदि तस्याऽन्यपरतयाऽनुज्ञायां प्रतीभा बुद्धिर्न जायते, ततस्सीम्नि प्राप्तायां ततो निवर्तेत । प्रतेदीर्घश्छान्दसः। 'संसाधये'दित्यादि सर्वातिथिसाधारणम् । न निराकृतमात्रविषयम् ॥४॥

05 सर्वान्वैश्वदेवे भागिनः कुर्वीता

सर्वान्वैश्वदेवे भागिनः कुर्वीता श्व-चाण्डालेभ्यः ५

▼

⑤

>
▼ Bühler

5. To all (those who come for food) at (the end of) the Vaiśvadeva he shall give a portion, even to dogs and Caṇḍālas.

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वान्वैश्वदेवे भागिनः कुर्वीता श्वचण्डालेभ्यः ॥५॥

टिप्पनी⑥

वैश्वदेवान्ते भोजनार्थमुपस्थितान् सर्वानेव भागिनः कुर्वीताऽऽश्वचण्डालेभ्यः । अभिविधावाकारः । तेभ्योऽपि किञ्चिद्देयम् । तथा च मनुः —
2 'शुनां च पतितानां च श्वपचां पापरोगिणाम् ।
वयसां च क्रिमीणां च शनकैर्निर्वपेद्भुवि ॥ इति ॥५॥

06 नानर्हद्भ्यो दद्याद् इत्य्

नानर्हद्भ्यो दद्याद् इत्य् एके ६

▼

⑤

>
▼ Bühler

6. Some declare that he shall not give anything to unworthy people (such as Caṇḍālas).

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽनहट्यो दद्यादित्येके ॥ ६ ॥

टिप्पनी⑥

अनर्हद्भ्यश्चण्डालादिभ्यो न दद्यादित्येके मन्यन्ते । तत्र दानेऽभ्युदयः । अदाने न प्रत्यवायः॥ ६ ॥

07 उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं

उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् ७

▼

⑤

>

▼ Bühler

7. A person who has been initiated shall not eat the leavings of women or of an uninitiated person. 3

▼ हरदत्त-टीका

सूत्रम्⑥

उपेतः स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् ॥ ७ ॥

टिप्पनी⑥

उपेतः कृतोपनयनोऽसमावृत्तः । स स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयेत् न भुजीत । एवं सति समावृत्तस्योच्छिष्टं भुञ्जानस्य न दोषः स्यात् । एवं तर्हि उपेत आन्तात् कृतदारोऽकृतदारश्च स्त्रीणामनुपेतस्य चोच्छिष्टं वर्जयत् । एवमप्युपेतस्य यस्य कस्यचिदपि यदुच्छिष्टं तद्भोजने न दोषः स्यात् । पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्-(१.४ १९) इत्येतन्नियमार्थं भविष्यति-पितुरेव भ्रातुरेवेति। यथेवं सूत्रमेवेदमनर्थकम्। तस्मादेव नियमादन्यत्राऽप्रसङ्गात् । इदं तर्हि प्रयोजनम्-यदा पिताऽनुपेतः पुत्रस्तु प्रायश्चित्तं कृत्वा कृतोपनयनः तदा तं प्रति पितुरनुपेतस्योच्छिष्टं प्रतिषिध्यते । एवं ज्येष्ठेऽपि द्रष्टव्यम् । एतदपि नास्ति प्रयोजनम् । उक्तं हि 'धर्मविप्रतिपत्तावभोज्य(१.४.१२) मिति । 'तेषामभ्यागमनं भोजनं विवाहमिति च वर्जये(१.१.३३)दिति च। तथा स्त्रीणामित्येतत् किमर्थम् १ मातुरुच्छिष्टप्रतिषेधार्थम् । कथं प्रसङ्गः ? 'भ्रातरि पितर्याचार्यवच्छुश्रूषे' (१.१४.५.)ति वचनात्, 'यदुच्छिष्टं प्राश्नाति

हविरुच्छिष्टमेव त'(१.४.१,२)दित्याचार्योच्छिष्टस्य हविष्ट्वेन संस्तवाच्च । 4 एवमपि 'पितुर्ज्येष्ठस्ये'त्यत्र पितुर्ग्रहणादेव सिद्धम् । तस्मात् केषुचिज्जनपदेषु भार्ययाऽनुपेतेन च सह भोजनमाचरन्ति । तथा च बौधायनः — 5 'यानि दक्षिणतस्तानि व्याख्यास्यामः । यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजन'मिति । तस्य दुराचारत्वमनेन प्रतिपाद्यते ॥

08 सर्वाण्युदकपूर्वाणि दानानि

सर्वाण्युदकपूर्वाणि दानानि ८

▼

⑤

>
▼ Bühler

8. All gifts are to be preceded by (pouring out) water. 6

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वाण्युदकपूर्वाणि दानानि ॥ ८॥

टिप्पनी⑥

'सर्वाणी'ति वचनात् भिक्षाप्युदकपूर्वमेव देया ॥ ८॥

10 यथाश्रुति विहारे ९

यथाश्रुति विहारे *(=यागशालायाम्)*९

▼

⑤

>
▼ Bühler

9. (But gifts offered to priests) at sacrifices (are to be given) in the manner prescribed by the Veda.

▼ हरदत्त-टीका

सूत्रम्⑥

यथाश्रुति विहारे ॥ ९॥

टिप्पनी⑥

विहारे यज्ञकर्मणि यानि दानानि दक्षिणादीनि, तानि यथाश्रुत्येव । नोदकपूर्वाणि ॥९॥

10 ये नित्या भाक्तिकास्तेषाम्

ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः १०

▼

⑤

>
▼ Bühler

10. The division of the food must be made in such a manner that those who receive daily portions (slaves) do not suffer by it.

▼ हरदत्त-टीका

सूत्रम्⑥

ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः।

टिप्पनी⑥

ये नित्या भाक्तिका भक्तार्हाः कर्मकरादयः तेषामुपरोधो यथा न भवति तथा वैश्वदेवान्ते अभ्यागतेभ्यः संविभागः कर्तव्यः ॥ १० ॥

11 काममात्मानम् भार्याम् पुत्रं

काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम् ११

▼

⑤

>
▼ Bühler

11. At his pleasure, he may stint himself, his wife, or his children, but by no means a slave who does his work.

▼ हरदत्त-टीका

सूत्रम्⑥

काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्न त्वेव दासकर्मकरम् ॥ ११ ॥

टिप्पनी⑥

दासो भूत्वा यः कर्म करोति स दासकर्मकरः तं आत्माशुपरोधे नापि नोपरुन्ध्यात् । किं पुनरागतार्थं तं नोपरुन्ध्यादिति7 ॥ ११ ॥

12 तथा चात्मनोऽनुपरोधङ् कुर्याद्यथा

तथा चात्मनोऽनुपरोधं कुर्याद्यथा कर्मस्वसमर्थः स्यात् १२

▼

⑤

>
▼ Bühler

12. And he must not stint himself so much that he becomes unable to perform his duties.

▼ हरदत्त-टीका

सूत्रम्⑥

तथा चाऽऽत्मनोऽनुपरोधं कुर्याद्यथा कर्मसु समर्थस्स्यात् ॥

टिप्पनी⑥

कर्मसु अग्निहोत्रादिषु आर्जनेषु च यथा स्वयं समर्थो भवति तथाऽऽत्मानं नोपरुन्ध्यात कुटुम्बी ॥ १२॥

13 अष्टौ ग्रासा मुनेर्भक्ष्याः

> 'अष्टौ ग्रासा मुनेर् भक्ष्याः षोडशाऽरण्य-वासिनः ।
> द्वात्रिंशतं गृहस्थस्याऽपरिमितं ब्रह्मचारिणः ॥
> आहिताग्निर् अनरड्वांश् च ब्रह्मचारी च ते त्रयः ।
> अश्नन्त एव सिध्यन्ति नैषां सिद्धिर् अनश्नताम्'

इति॥

▼

⑤

>
▼ Bühler

13. Now they quote also (the following two verses):

'Eight mouthfuls are the meal of an ascetic, sixteen that of a hermit living in the woods, thirty-two that of a householder, and an unlimited quantity that of a student. An Agnihotrin, a draught-ox, and a student, those three can do their work only if they eat; without eating (much), they cannot do it.' 8

▼ हरदत्त-टीका

सूत्रम्⑥

9 'अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशाऽरण्यवासिनः ।
द्वात्रिंशतं गृहस्थस्याऽपरिमितं ब्रह्मचारिणः ॥
आहिताग्निरनरड्वांश्च ब्रह्मचारी च ते त्रयः ।
अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नता'मिति

प्रस्तावः⑥

अथाऽप्युदाहरन्ति—

टिप्पनी⑥

अवैतस्मिन्नात्मानं नोपरुन्ध्यादिति विषये 10श्लोकावुदाहरन्ति । मुनेः सन्न्यासिनः । भक्ष्या अष्टौ ग्रासाः आस्याविकारेण । अरण्यवासी वानप्रस्थः । तस्य षोडश । द्वात्रिंशत् ग्रासाः गृहस्थस्य । प्रथमार्थे द्वितीया । ब्रह्मचारिणस्तु विद्यार्थस्य नैष्ठिकस्य च ग्रासनियमो नास्ति । द्वितीयेन श्लोकेनाहिताग्निविषये 'कालयोर्भोजन'(२.१.२.)मित्ययमपि नियमो नास्तीति11 प्रतिपाद्यते । अनडुग्रहणं दृष्टान्तार्थम् । ब्रह्मचारिग्रहणं दृढार्थम् । सिध्यन्ति स्वकार्यक्षमा भवन्ति ॥ १३ ॥

इत्यापस्तम्बधर्मसूत्रे नवमी कण्डिका ॥
इत्यापस्तम्बधर्मसत्रवृत्तौ हरदत्तविरचितायामुज्ज्वलायां द्वितीयप्रश्ने चतुर्थः पटलः ॥ ४ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
5. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
6. Manu II, 35.↩
7. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
8. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

o५①

१०①

01 भिक्षणे निमित्तमाचार्यो विवाहो④

भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षार्हतश्च नियमविलोपः १

▼

⑤

>
▼ Bühler

1. The reasons for (which) begging (is permissible are), (the desire to collect the fee for) the teacher, (the celebration of) a wedding, (or of) a Śrauta-sacrifice, the desire to keep one's father and mother, and the (impending) interruption of ceremonies performed by a worthy man. 1

▼ हरदत्त-टीका

सूत्रम्⑥

भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षाऽर्हतश्च नियमविलोपः ॥१॥

टिप्पनी⑥

भिक्षणं याचनम् । तत्राऽऽचार्यादयो निमित्तम् । बुभूर्षा भर्तुमिच्छा। अर्हतो विद्यादिमतोऽग्निहोत्रादिनियमे योग्यस्याऽर्थस्याऽभावेन लोपः ॥१॥

02 तत्र गुणान्समीक्ष्य यथाशक्ति

तत्र गुणान्समीक्ष्य यथाशक्ति देयम् २

▼

⑤

>
▼ Bühler

2. (The person asked for alms) must examine the qualities (of the petitioner) and give according to his power.

▼ हरदत्त-टीका

सूत्रम्⑥

तत्र गुणान् समीक्ष्य यथाशक्ति देयम् ॥ २॥

टिप्पनी⑥

तत्रैवंभूते भिक्षणे याचतः श्रुतवृत्तादिकान् गुणान् समीक्ष्य शक्त्यनुरूपमवश्यं देयम् । अदाने 2प्रत्यवेयात् । गौतमस्तु निमित्तान्तरमप्याह— 3 'गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनध्वंसयोगवैश्वजितेषु द्रव्यसंविभागो बहिर्वेदि । भिक्षमाणेषु कृतान्नमितरेष्वि'ति । 4वैश्वजितो विश्वजिद्यागस्य कर्ता सर्वस्वदक्षिणः ॥२॥

03 इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम्

इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम् । न तदाद्रियेत ३

▼

⑤

>
▼ Bühler

3. But if persons ask for alms for the sake of sensual gratification, that is improper; he shall not take heed of that.

▼ हरदत्त-टीका

सूत्रम्⑥

5इन्द्रियप्रीत्यर्थस्य तु भिक्षणमनिमित्तम् ॥ ३ ॥

टिप्पनी⑥

इन्द्रियद्वारा आत्मनः प्रीतिरिन्द्रियप्रीतिः । तामर्थयमानो यो भिक्षते स्रक्चन्दनादि तन्मूल्यं वा । तद्भिक्षणं नियमेन दानस्य निमित्तं न भवति ॥३॥

04 न तदाद्रियेत

न तदाद्रियेत

▼

⑤

>
▼ Bühler

he shall not take heed of that.

▼ हरदत्त-टीका

सूत्रम्⑥

न तदाद्रियेत ॥ ४॥

टिप्पनी⑥

तस्मात् न तदाद्रियेत । अदानेऽपि न प्रत्यवायः । विवाहोऽपि द्वितीयो न निमित्तं सत्यां प्रथमायां धर्मप्रजासम्पन्नायाम् । तदर्थमिदं वचनम् । अन्यत्र प्राप्त्यभावात् ॥

05 स्वकर्म ब्राह्मणस्याऽध्ययनमध्यापनं

स्वकर्म ब्राह्मणस्याध्ययनमध्यापनम्यज्ञो याजनं दानं प्रतिग्रहणं दायाद्यं शिलोञ्छः ४

▼

⑤

>

▼ Bühler

4. The lawful occupations of a Brāmaṇa are, 6 studying, teaching, sacrificing for himself, officiating as priest for others, giving alms, receiving alms, inheriting, and gleaning corn in the fields;

▼ हरदत्त-टीका

सूत्रम्⑥

स्वकर्म ब्राह्मणस्याऽध्ययनमध्यापनं यज्ञो याजनं दानं प्रतिग्रहणं दायाद्यं सिलोञ्छः ॥ ५॥

टिप्पनी⑥

'सर्ववर्णानां स्वधर्मानुष्ठान(२.२.२) इत्युक्तम् । तेऽमी स्वधर्मा उच्यन्ते-पुत्राय दीयत इति दायः। तमादत्त इति दायादः । तस्व भावो दायाद्यम्, दायस्वीकारः । क्षेत्रादिषु पतितानि मञ्जरीभूतानि ततश्च्युतानि वा धान्यानि सिलशब्दस्याऽर्थः । तेषामुञ्छनमंगुलीभिर्नखैर्वाऽऽदानं सिलोञ्छः । एतान्यध्ययनादीन्यष्टौ ब्राह्मणस्य स्वकर्म । तेष्वध्ययनयज्ञदानानि द्विजातिसामान्येन कर्तव्यतया नियम्यन्ते । इतराण्यर्थितया द्रव्यार्जने प्रवृत्तस्योपायान्तरानिवृत्त्यर्थान्युपदिश्यन्ते- अध्यापनादिभिरेव द्रव्यमार्जयेन्न चौर्यादिभिरिति 7 ॥ ५॥

06 अन्यच्चापरिगृहीतम्

अन्यच्चापरिगृहीतम् *(यथा मूलफलादिः)*५

▼

⑤

>
▼ Bühler

5. And (he may live by taking) other things which belong to nobody. 8

▼ हरदत्त-टीका

सूत्रम्⑥

अन्यच्चाऽपरिगृहीतम् ॥ ६ ॥

टिप्पनी⑥

यच्चाऽन्यत् केनाप्यपरिगृहीतमारण्यमूलफलादि तेनापि । जीवेदिति प्रकरणात् गम्यते । एतेन निधिर्व्याख्यातः ॥ ६॥

07 एतान्येव क्षत्रियस्याऽध्यापन

एतान्येव क्षत्रियस्याध्यापनयाजनप्रतिग्रहणानीति परिहाप्य दण्डयुद्धाधिकानि ६

▼

⑤

>
▼ Bühler

6. (The lawful occupations) of a Kṣatriya are the same, with the exception of teaching, officiating as priest, and receiving alms. (But) governing and fighting must be added. 9

▼ हरदत्त-टीका

सूत्रम्⑥

एतान्येव क्षत्रियस्याऽध्यापनयाजनप्रतिग्रहणानीति परिहाप्य दण्डयुद्धाधिकानि ॥ ७ ॥

टिप्पनी⑥

एतान्येव क्षत्रियस्याऽपि स्वकर्म । अध्यापनादीनि त्रीणि वर्जयित्वा । दण्डलब्धं युद्धलब्धं चाऽधिकम् ॥७॥

08 क्षत्रियवद्वैश्यस्य दण्डयुद्धवर्जङ् कृषिगोरक्ष्यवाणिज्याधिकम्

क्षत्रियवद्वैश्यस्य दण्डयुद्धवर्जं कृषिगोरक्ष्यवाणिज्याधिकम् ७

▼

⑤

>
▼ Bühler

7. (The lawful occupations) of a Vaiśya are the same as those of a Kṣatriya, with the exception of governing and fighting. (But in his case) agriculture, the tending of cattle, and trade must be added. 10

▼ हरदत्त-टीका

सूत्रम्⑥

क्षत्रियवद्वैश्यस्य दण्डयुद्धवर्जं कृषिगोरक्ष्य वणिज्याऽधिकम् ॥ ८॥

टिप्पनी⑥

गोरक्ष्यं गवां रक्षणम् । भावे ण्यत्प्रत्ययः। वणिजो भावो वणिज्या क्रयविक्रयव्यवहारः, कुसीदं च । 11 दूतवणिग्भ्यां चेति यत्प्रत्ययः ॥ ८॥

09 नाननूचानमृत्विजं वृणीते न

नाननूचानमृत्विजं वृणीते न पणमानम् ८

▼

⑤

>
▼ Bühler

8. He (shall) not choose (for the performance of a Śrauta-sacrifice) a priest who is unlearned in the Veda, nor one who haggles (about his fee).

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽनूचानमृत्विजं वृणीते न पणमाणम् ॥ ९ ॥

टिप्पनी⑥

साङ्गस्य वेदस्याऽध्येता प्रवक्ता चाऽनूचानः । अतादृशमृत्विजं न वृणीते नाऽप्येतावद्देयमिति परिभाषमाणम् ॥९॥

10 अयाज्योऽनधीयानः

अयाज्योऽनधीयानः ९

▼

⑤

>
▼ Bühler

9. (A priest) shall not officiate for a person unlearned in the Veda.

▼ हरदत्त-टीका

सूत्रम्⑥

अयाज्योऽनधीयानः ॥ १० ॥

टिप्पनी⑥

अनधीतवेदं न याजयेत् तदानीमपेक्षितं मन्त्रं यथाशक्ति वाचयन् ॥ १० ॥

11 युद्धे तद्योगा यथोपायमुपदिशन्ति

युद्धे तद्योगा यथोपायमुपदिशन्ति तथा प्रतिपत्तव्यम् १०

▼

⑤

>

▼ Bühler

10. In war (Kṣatriyas) shall act in such a manner as those order, who are learned in that (art of war).

▼ हरदत्त-टीका

सूत्रम्⑥

युद्धे तद्योगा यथोपायमुपदिशन्ति तथा प्रतिपत्तव्यम् ॥ ११ ॥

प्रस्तावः⑥

क्षत्रियस्य युद्धं स्वकर्मेत्युक्तम् । तत्कथं कर्तव्यमित्यत आह—

टिप्पनी⑥

युद्धविषये तथा प्रतिपत्तव्यं यथा तद्योगा उपायमुपदिशन्ति तस्मिन्युद्ध कर्मणि युद्धशास्त्रे वा येषामभियोगः ते तद्योगाः ॥ ११ ॥

12 न्यस्तायुधप्रकीर्णकेशप्राञ्जलिपराङ्गावृत्तानामार्या वधम् परिचक्षते

न्यस्तायुधप्रकीर्णकेशप्राञ्जलिपराङ्गावृत्तानामार्या वधं परिचक्षते ११

▼

⑤

>
▼ Bühler

11. The Āryas forbid the slaughter of those who have laid down their arms, of those who (beg for mercy) with flying hair or joined hands, and of fugitives. 12

▼ हरदत्त-टीका

सूत्रम्⑥

न्यस्तायुधप्रकीर्णकेशमाञ्जलिपराङावृत्तानामार्या वधं परिचक्षते ॥ १२ ॥

टिप्पनी⑥

न्यस्तायुधः त्यक्तायुधः । प्रकीर्णकेशः केशानपि नियन्तुमक्षमः । प्राञ्जलिः कृताञ्जलिः। पराङावृत्तः पराङ्मुखः । सर्व एते भीताः । एतेषां युद्धे वधमार्यास्सन्तो गर्हन्ते । परिगणनादन्येषां वधे न दोषः। तथा च गौतमः-13 न दोषो हिंसायामाहव' इति । न्यस्तायुधः प्रकीर्णकेशः इति विसर्जनीयं केचित्पठन्ति । सोऽपपाठः। पराङावृत्त इति ङकार छान्दसः ॥ १२॥

13 शास्त्रैरधिगतानामिन्द्रि यदौर्बल्याद्विप्रतिपन्नानां शास्ता

शास्त्रैरधिगतानामिन्द्रि यदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् १२

▼

⑤

>
▼ Bühler

12. The spiritual guide shall order those who, 14 (whilst) participating according to sacred law (in the rights of their caste), have gone astray through the weakness of their senses, to perform penances proportionate to (the greatness of) their sins, according to the precepts (of the Smṛti).

▼ हरदत्त-टीका

सूत्रम्⑥

शास्त्रैरधिगतानामिन्द्रियदौर्बल्याद्विप्रतिपन्नानां शास्ता निर्वेषमुपदिशेद्यथाकर्म यथोक्तम् ॥ १३ ॥

टिप्पनी⑥

यथाशास्त्रं गर्भाधानादिभिः संस्कारैः संस्कृताः शास्त्रैरधिगताः तेषामिन्द्रियदौर्बल्यात् अजितेन्द्रियतया विप्रतिपन्नानां स्वकर्मतश्च्युतानां निषिद्धेषु च प्रवृत्तानाम् । शास्ता शासिता आचार्यादिः । निर्वेषं प्रायश्चित्तमुपदिशेत् । यथाकर्म कर्मानुरूपम् । यथोक्तं धर्मशास्त्रेषु ॥ १३ ॥

14 तस्य चेच्छास्त्रमतिप्रवर्तेरन्नजानङ् गमयेत्

तस्य चेच्छास्त्रमतिप्रवर्तेरन्नजानं गमयेत् १३

▼

⑤

>
▼ Bühler

13. If (such persons) transgress their (Ācārya's) order, he shall take them before the king.

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य चेच्छास्त्रमतिप्रवर्तेरन् राजानं गमयेत् ॥ १४ ॥

टिप्पनी⑥

तस्य चेच्छासितुः शास्त्रं शासनं अतिप्रवर्तेरन् न तत्र तिष्ठेयुः राजानं गमयेत्- एवमसौ करोतीति ॥ १४ ॥

15 राजा पुरोहितन् धर्मार्थकुशलम्

राजा पुरोहितं धर्मार्थकुशलम् १४

▼

⑤

>
▼ Bühler

14. The king shall (send them) to his domestic priest, who should be learned in the law and the science of governing.

▼ हरदत्त-टीका

सूत्रम्⑥

राजा पुरोहितं धर्मार्थकुशलम् ॥ १५ ॥

टिप्पनी⑥

स राजा धर्मशास्त्रेष्वर्थशास्त्रेषु कुशलं च पुरोहितं गमयेत्-विनीयतामसाविति ॥ १५॥

16 स ब्राह्मणान्नियुञ्ज्यात्

स ब्राह्मणान्नियुञ्ज्यात् १५

▼

⑤

>

▼ Bühler

15. He shall order (them to perform the proper penances if they are) Brāhmaṇas.

▼ हरदत्त-टीका

सूत्रम्⑥

स ब्राह्मणान्नियुञ्ज्यात् ॥ १६ ॥

टिप्पनी⑥

स पुरोहितः ब्राह्मणाश्चेदतिक्रमणकारिणः प्रापिताः तान्नियुञ्ज्यात् अनुरूपेषु प्रायश्चित्तेषु नियुञ्जीत ॥ १६ ॥

17 बलविशेषेण वधदास्यवर्जन् नियमैरुपशोषयेत्

बलविशेषेण वधदास्यवर्जं नियमैरुपशोषयेत् १६

▼

⑤

>

▼ Bühler

16. He shall reduce them (to reason) by forcible means, excepting corporal punishment and servitude. 15

▼ हरदत्त-टीका

सूत्रम्⑥

बलविशेषेण16 वधदास्यवर्जं नियमैरुपशोषयेत ॥१७॥

प्रस्तावः⑥

अथ यदि ते तत्रापि न तिष्ठेयुः, तदा किं कर्तव्यमित्यत आह—

टिप्पनी⑥

ततस्तान्नियमैरुपवासादिभिरुपशोषयेत् । बलविशेषेण बलानुरूपम् । वधदास्यवर्जं वधस्ताडनादि, वध दास्यं च वर्जयित्वा सर्वमन्यत् बन्धनादिकं बलानुरूपं कारयेत् यावत्ते मन्येरन् चरेम प्रायश्चित्तमिति ॥१८॥

इत्यापस्तम्बधर्मसूत्र उज्वलोपेते द्वितीयप्रश्ने दशमी कण्डिका ॥१०॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
5. आप० ध० १.३०.८.↩
6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. Manu II, 35.↩

9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

14. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our

times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

15. Manu II, 69; Yājñ. I, 15.↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

११①

01 इतरेषां वर्णानामा प्राणविप्रयोगात्समवेक्ष्य④

इतरेषां वर्णानामा प्राणविप्रयोगात्समवेक्ष्य तेषां कर्माणि राजा दण्डम्प्रणयेत् १

▼

⑤

>
▼ Bühler

1. In the cases of (men of) other castes, the king, after having examined their actions, may punish them even by death.

▼ हरदत्त-टीका

सूत्रम्⑥

इतरेषां वर्णानामा प्राणविप्रयोगात्समवेक्ष्य तेषां कर्माणि राजा दण्डं प्रणयेत् ॥१॥

प्रस्तावः⑥

एवं ब्राह्मणविषये उक्तम् । इतरेषामाह -

टिप्पनी⑥

इतरेषां ब्राह्मणव्यतिरिक्तानां वर्णानां राजा पुरोहितोक्तं दण्डं स्वयमेव प्रणयेत् तेषां कर्माणि समवेक्ष्य तदनुरूपमा प्राणविप्रयोगात् । अभिविधाधाकारः ॥१॥
02 न च सन्देहे

न च संदेहे दण्डं कुर्यात् २

▼

⑤

>
▼ Bühler

2. And the king shall not punish on suspicion.

▼ हरदत्त-टीका

सूत्रम्⑥

न च सन्देहे दण्डं कुर्यात् ॥ २ ॥

टिप्पनी⑥

अपराधसन्देहे राजा दण्डं न कुर्यात् ॥ २ ॥

03 सुविचितं विचित्या दैवप्रश्नेभ्यो

सुविचितं विचित्या दैवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्येत ३

▼

⑤

>

▼ Bühler

3. But having carefully investigated (the case) by means of questions (addressed to witnesses) and even of ordeals, the king may proceed to punish. 1

▼ हरदत्त-टीका

सूत्रम्⑥

सुविचितं विचित्या देवप्रश्नेभ्यो राजा दण्डाय प्रतिपद्येत ॥ ३॥

प्रस्तावः⑥

किन्तु —

टिप्पनी⑥

आ दैवप्रश्नेभ्यः साक्षिप्रश्नादिभिः शपथान्तैः सुविचितं यथा भवति तथा विचित्य निरूप्य । राजा दण्डाय प्रतिपद्येत उपक्रमेत ॥३॥

04 एवंवृत्तो राजोभौ लोकावभिजयति

एवंवृत्तो राजोभौ लोकावभिजयति ४

▼

⑤

>

▼ Bühler

4. A king who acts thus, gains both (this and the next) world.

▼ हरदत्त-टीका

सूत्रम्⑥

एवंवृत्तो राजोभौ लोकाभिजयति ॥ ४॥

प्रस्तावः⑥

एवं कुर्वतः फलमाह —

टिप्पनी⑥

एवंभूतं वृत्तं यस्य स एवंवृत्तः । अत्र मनु—
2 'अदण्ड्यान्दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति3 प्रेत्य स्वर्गाच्च हीयते ॥' इति ॥४॥

05 राज्ञः पन्था ब्राह्मणेनासमेत्य

राज्ञः पन्था ब्राह्मणेनासमेत्य ५

▼

⑤

>

▼ Bühler

5. The road belongs to the king except if he meets a Brāhmaṇa. 4

▼ हरदत्त-टीका

सूत्रम्⑥

राज्ञः पन्था ब्राह्मणेनाऽसमेत्य ॥५॥

प्रस्तावः⑥

गच्छतां प्रतिगच्छतां च पथि समवाये केन कस्मै पन्था देय इत्यःत आह—

टिप्पनी⑥

राजा अभिषिक्तः । स यदि ब्राह्मणेन समेतो न भवति, तदा तस्य पन्था दातव्यः । क्षत्रियैरप्यनभिषिक्तैः एतदर्थमेव चेदं वचनम् । अन्यत्र 'वर्णज्यायसां चे'(२.११.८)ति वक्ष्यमाणेनैव सिद्धम् ॥ ५ ॥

06 समेत्य तु ब्राह्मणस्यैव

समेत्य तु ब्राह्मणस्यैव पन्थाः ६

▼

⑤

>

▼ Bühler

6. But if he meets a Brāhmaṇa, the road belongs to the latter. 5

▼ हरदत्त-टीका

सूत्रम्⑥

समेत्य तु ब्राह्मणस्यैव पन्थाः ॥ ६ ॥

टिप्पनी⑥

आपदि शिष्यभूतब्राह्मणविषयमिदम् । शिष्यभूतेनाऽपि ब्राह्मणेन समेत्य तस्यैव राज्ञा पन्था देय इति ॥ ६॥

07 यानस्य भाराभिनिहितस्यातुरस्य स्त्रिया

यानस्य भाराभिनिहितस्यातुरस्य स्त्रिया इति सर्वैर्दातव्यः ७

▼

⑤

>

▼ Bühler

7. All must make way for a (laden) vehicle, for a person who carries a burden, for a sick man, for a woman and others (such as old men and infants).

▼ हरदत्त-टीका

सूत्रम्⑥

6यानस्य भाराभिनिहितस्याऽऽतुरस्य स्त्रिया इति सर्वैर्दातव्यः7 ॥ ७ ॥

टिप्पनी⑥

यानं शकटादि । भाराभिनिहितो भाराक्रान्तः । आतुरो व्याधितः । स्त्रियाः यस्याः कस्याश्चिदपि । एतेभ्यस्सर्वैरेव वर्णैः पन्था दातव्यः । इतिशब्दात् स्थविरबालकृशादिभ्यश्च ॥ ७ ॥

इति महाभारते वनपर्वणि ।

08 वर्णज्यायसाञ् चेतरेर्वर्णैः

वर्णज्यायसां चेतरेर्वर्णैः ८

▼

⑤

>
▼ Bühler

8. And (way must be made), by the other castes, for those men who are superior by caste.

▼ हरदत्त-टीका

सूत्रम्⑥

वर्णज्यायसां चेतरैर्वर्णैः ॥ ८॥

टिप्पनी⑥

वर्णेनोत्कृष्टां वर्णज्यायांसः । तेषां चेतरैरपकृष्टैषणैर्ब्राह्मणैश्च दातव्यः ॥८॥

09 अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः

अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः ९

▼

⑤

>

▼ Bühler

9. For their own welfare all men must make way for fools, outcasts, drunkards, and madmen.

▼ हरदत्त-टीका

सूत्रम्⑥

अशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः ॥९॥

टिप्पनी⑥

अशिष्टो मूर्खः । अन्ये प्रसिद्धाः । एतेषां सर्वैरेवंजातीयैरुत्कृष्टैरपकृष्टैर्ब्राह्मणैश्च । आत्मस्वस्त्ययनार्थेन स्वस्त्ययनमात्मत्राणम् । तेन प्रयोजनेन तदर्थम्, न त्वष्टार्थमिति । अत्र कौटिल्येन देयस्य पथः प्रमाणमुक्तम्-8 'पञ्चारत्नी रथपथश्चत्वारो हस्तिपथो द्वौ क्षुद्रपशुमनुष्याणा'मिति ॥९॥

10 धर्मचर्यया जघन्यो वर्णः

धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ १०

▼

⑤

>
▼ Bühler

10. In successive births men of the lower castes are born in the next higher one, if they have fulfilled their duties. 9

▼ हरदत्त-टीका

सूत्रम्⑥

धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ ॥ १० ॥

टिप्पनी⑥

धर्मचर्यया स्वधर्मानुष्ठानेन जघन्यो वर्णः शूद्रादिः पूर्वं पूर्वं वर्णमापद्यते वैश्यादिकं प्राप्नोति । जातिपरिवृत्तौ जन्मनः परिवर्तने । शुद्रो वैश्यो जायते । तत्रापि स्वधर्मनिष्ठः क्षत्रियो जायते । तत्रापि स्वधर्मपरो ब्राह्मण इति। एवं क्षत्रियवैश्ययोरपि द्रष्टव्यम् ॥१०॥

11 अधर्मचर्यया पूर्वो वर्णो

अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ ११

▼

⑤

>
▼ Bühler

11. In successive births men of the higher castes are born in the next lower one, if they neglect their duties.

▼ हरदत्त-टीका

सूत्रम्⑥

अधर्मचर्यथा पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ ॥ ११ ॥

टिप्पनी⑥

पूर्वेण गम् । महापातकव्यतिरिक्ताधर्मानुष्ठानविषयमेतत् । महापातकेषु 'स्तेनोऽभिशस्त' (२.२.६) इत्यादिना नीचजातिप्राप्तेरुक्तत्वात् ॥ ११॥

12 धर्मप्रजासम्पन्ने दारे नान्याङ्

धर्मप्रजासंपन्ने दारे नान्यां कुर्वीत १२

▼

⑤

>
▼ Bühler

12. If he has a wife who (is willing and able) to perform (her share of) the religious duties and who bears sons, he shall not take

a second. 10

▼ हरदत्त-टीका

सूत्रम्⑥

धर्मप्रजासम्पन्ने दारे नाऽन्यां कुर्वीत ॥ १२ ॥

टिप्पनी⑥

श्रौतेषु गार्ह्येषु स्मार्तेषु च कर्मसु
श्रद्धा शक्तिश्च धर्मसम्पत्तिः ।
प्रजासम्पत्तिः पुत्रवत्वम् ।
एवंभूते दारे सति नान्याम् ।
'दारे' इति प्रकृते अन्याम् इति स्त्रीलिङ्गनिर्देशाद्
अत्रार्थाद् भार्याम् इति गम्यते ।
नान्यां भार्यां कुर्वीत नोऽद्वहेत् ॥ १२ ॥

▼ विश्वास-टिप्पनी

> एवं तर्ह्य् आपस्तम्बिनो ऽस्मद्-आचार्य-ततौ वर्तमानस्य महतो विजयनगरमन्त्रिणो लक्ष्मीकुमारतातार्यस्यैकादश (तद्-अधिका वा) कथं पत्न्यः (याभिस् तुलाभारदानाद्य् अकरोद् इति प्रमाणसिद्धम्)?
> १० पत्नीष्व् एकाऽपि धर्मप्रजासम्पन्ना नेति कठिनं सम्भावयितुम् ...

अस्य परिहारः कश्चन स्फुरति - आपद्-धर्म इति।
लक्ष्मी-कुमारार्य-काले तुरुषाणाम् उपप्लवोऽधिकः, तालिकोट-युधात् परं विघटित-विजय-नगर-साम्राज्य-रक्षायै महान् प्रयासः।
तदा वीर-मृत्युभिः पुंसाम् नैयून्यम्, कन्यानां चाधिक्यं स्यात्, येनैवं विवाहेन तद्-इतरथा चानेन महता तत्-परिजन-प्रार्थनादिभिस् ताः पतिवद् आश्रिताः -
नरकासुर-मुक्त-कृष्ण-गृहीताः कन्या इव।

श्रुताव् अपि बहुपत्नीत्वं क्वचित् प्रशस्तम् -

> इ॒न्द्रि॒यवँ॑ वै सो॑मपी॒थः ।
> इ॒न्द्रि॒यम् ए॒व सो॑मपी॒थम् अव॑ रुन्धे ।
> तेने॑न्द्रि॒येण॑ द्वि॒तीयां॑ञ् जा॒याम् अ॒भ्य॑श्ञुते॥ 57
> … तस्मा॒त् ते द्वे द्वे॑ जा॒ये अ॒भ्यां॑क्षत ।
> य ए॒ववँ॑ वेद॑ -
> अ॒भि द्वि॒तीयां॑ञ् जा॒याम् अ॑श्ञुते ।

13 अन्यतराभावे कार्या प्राग्

अन्यतराभावे कार्या प्राग् अग्न्याधेयात् १३

▼

⑤

>

▼ Bühler

13. If a wife is deficient in one of these two (qualities), he shall take another, (but) before he kindles the fires (of the Agnihotra). 11

▼ हरदत्त-टीका

सूत्रम्⑥

अन्यतराभावे कार्या प्रागग्न्याधेयात् ॥ १३ ॥

टिप्पनी⑥

धर्मप्रजयोरन्यतरस्याऽभावे कार्या उद्वाह्या । तत्रापि प्रागग्न्याधेयात् नोर्ध्वमाधानात् । एतदर्थमेवेदं वचनम् । उभयसम्पत्तौ न कार्येत्युक्ते अन्यतराभावे कार्येत्यस्यांशस्य प्राप्तत्वात् । यदा चाऽन्यतराभावे कार्या तदा का शङ्का उभयाभावे कार्येति ॥ १३॥

14 आधाने हि सती

आधाने हि सती कर्मभिः संबध्यते येषामेतदङ्गम् १४

▼

⑤

>
▼ Bühler

14. For a wife who assists at the kindling of the fires, becomes connected with those religious rites of which that (fire-kindling) forms a part. 12

▼ हरदत्त-टीका

सूत्रम्⑥

आधाने हि सती कर्मभिस्संबध्यते येषामेतदङ्गम् ॥१४॥

प्रस्तावः⑥

प्रागग्न्याधेयादित्यत्र हेतुः —

टिप्पनी⑥

हि यस्मात् आधाने सती विद्यमाना सहान्विता कर्मभिस्सम्बध्यते अधिक्रियते । कैः ? येषामग्निहोत्रादीनामेत13दाधानमङ्गमुपकारकम् । तैः । अत्र 'दारे सती'ति वचनात् मृते तस्मिन्प्रागूर्ध्वं वाऽऽधानात् सत्यामपि पुत्रसम्पत्तौ धर्मसम्पत्त्यर्थं दारग्रहणं भवत्येव । तथा च मनुः

—
14"भार्यायै पूर्वमारिण्यै दत्वाऽग्नीनन्त्यकर्मणि ।
पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥" इति ।

याज्ञवल्क्योऽपि—
15 'आहरेद्विधिवद्दारनग्नींश्चैवाऽविलम्बयन् ।' इति ।
न हि वाचनिकेऽर्थे युक्तयः क्रमन्ते । तेनैतन्न चोदनीयम्-यजमानः पूर्वमन्वारम्भणीयया संस्कृतो न तस्यायं संस्कारः पुनरापादयितुं शक्यः । या च भार्या आधानात्परमूढा सा च पूर्वमसंस्कृता, न तस्या दर्शपूर्णमासादिष्वधिकारः । स कथं तया तैर्यष्टुमर्हतीति । अन्वारम्भणीयाजन्यश्च संस्कारो यदि संयोगवद्द्वयनिष्टः तदा भार्यानाशे नश्यतीति तस्य पुनस्संस्कारोऽपि नाऽनुपपन्नः । यानि च नाऽन्वारम्भणीयामपेक्ष्यन्ते स्मार्तानि गार्ह्याणि च तैरधिकारस्तस्याऽप्यविरुद्धः ।
ननु च प्रागन्याधानात् कर्मभिस्सम्बध्यते गार्ह्यैस्स्मार्तैश्च, तत्किमुच्यते आधाने हि सती कर्मभिस्सम्बध्यत इति ? सत्यम् , अस्मादेव च हेतुनिर्देशादवसीयते-प्रागाधानात् सत्यामपि धर्मसम्पत्तौ प्रजासम्पत्तौ च रागान्धस्य कदाचिद्दारग्रहणे नाऽतीव दोष इति । अथ यस्याहिताग्नेर्भार्या सत्येव कर्मण्यश्रद्दद्धाना अशक्ता वा भवति पुत्राश्च मृता अनुत्पन्ना वा तस्य कथम् । यद्येषा युक्तिः 'धर्मप्रजासम्पन्न' इति कर्मभिस्सम्बध्यत इति च, तदा कर्तव्यो विवाहः । (न च 'प्रागग्न्याधेया'दित्यस्य विरोधः । अन्यतराभावे कार्येत्यस्यैव स शेषः । न पुनरुभयाभावे कार्येत्यस्य । भारद्वाजसूत्रे तु यद्यप्यविशेषेणाऽहिताग्नेर्दारानुज्ञा प्रतीयते-“अथ यद्याहिताग्निः पुनर्दारक्रियां कुर्वीत यद्यग्नीनोत्सृजेत् लौकिकास्सम्पद्येरन् तस्य पुनरग्न्याधेयं कुर्वीतेत्याश्मरथ्या, पुनराधनमित्यालेखनः, पुनरग्न्याधेयमित्यौडुलोमि,रिति । तथापि तस्याप्ययमेव विषयः) ॥ १४ ॥

15 सगोत्राय दुहितरन् न

सगोत्राय दुहितरं न प्रयच्छेत् १५

▼

⑤

>
▼ Bühler

15. He shall not give his daughter to a man belonging to the same family (Gotra), 16

▼ हरदत्त-टीका

सूत्रम्⑥

सगोत्राय दुहितरं न प्रयच्छेत् ॥ १५ ॥

टिप्पनी⑥

कन्यागोत्रमेव गोत्रं यस्य तस्मै कन्या न देया । यथा-हारीताय हारीतीं, वात्स्याय वात्सीमित्यादि ॥ १५ ॥

16 मातुश्च योनिसम्बन्धेभ्यः

मातुश्च योनिसंबन्धेभ्यः १६

▼

⑤

>

▼ Bühler

16. Nor to one related (within six degrees) on the mother's or (the father's) side. 17

▼ हरदत्त-टीका

सूत्रम्⑥

मातुश्च योनिसम्बन्धेभ्यः ॥ १६ ॥

टिप्पनी⑥

मातुर्योनिसम्बन्धाः कन्याया मातुलादयः । चकारात् पितुरप्येवम् । तेभ्यः असगोत्रेभ्योऽपि न देया कन्यका । अत्र मनुः—

18 'असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां 19दारकर्मण्यमैथुनी ॥

20 स्नात्वा समुद्वहेत्कन्यां सवर्णं लक्षणान्विताम् ।
यवीयसी भ्रातृमतीमसगोत्रां प्रयत्नतः ॥
मातुस्सगोत्रामप्येके नेच्छन्त्युद्वाहकर्मणि ।
जन्मनाम्नोरविज्ञाने नोद्वहेदविशङ्कितः ॥
मातुस्सपिण्डा यत्नेन वर्जनीया द्विजातिभिः ॥ इति।'

गौतमः —

21 असमानप्रवरैर्विवाहः । ऊर्ध्वं सप्तमात्पितबन्धुभ्यो बीजिनश्च । मातृबन्धुभ्यः पञ्चमात्, इति । कात्यायनः— 'प्रवर एषामविवाह इत्येतेषु प्रत्यध्यायमाहत्य वचनं येषामेव प्रवरः तेषामेवाऽविवाह' इति । कारिका च भवति —

रातीयानामविवाह एषामिति येषां सूत्रकृदब्रवीत् ।
तेषामेव विवाहः स्यात् नान्येषामिति धारणेति ॥

शङ्खः22 —

'दारानाहरेत्सदृशानसमानार्षेयानसम्बन्धानासप्तमपञ्चमात्पितृमातृबन्धुभ्यः, इति ।

वसिष्ठः —

23 गृहस्थो विनीतक्रोधहर्षों गुरुणाऽनुरज्ञातः स्नात्वाऽसमानार्षेयामस्पृष्टमैथुनामवरवयसीं भ्रातृमतीं सदृशीं भार्यां विन्देत । पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः' इति ।

हारीत24 —

'शिवत्री कुष्ठ्युदरी यक्ष्मामयाव्यल्पायुरनार्षेयमब्रह्म समानार्षेयमित्येतान्यपतितान्यपि कुलानि वर्जनीयानि भवन्ति । कुलानुरूपाः प्रजा भवन्तीति । आदितष्षडयझियत्वादनार्षेयम् । अवेदत्वादब्रह्म । एककुलत्वात् समानार्षेयमिति । तस्मात् सप्त पितृतः परीक्ष्य पञ्च मातृतोऽनग्निकां श्रेष्ठां भ्रातृमतीं भार्यां विन्देत ॥

पैठीनसिः—असमानायां कन्यां वरयेत् । पञ्चमातृतः परिहरेत्सप्तपितृतः त्रीन्मातृतः पञ्च पितृतो वा'।

याज्ञवल्क्यः —

25 अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥'

विष्णुः—

26 असगोत्रामसमानप्रवरां भार्यां विन्देत मातृतः पञ्चमात् पितृतस्सप्तमात् ।

नारदः —
27आसप्तमात्पञ्चमाच्च बन्धुभ्यः पितृमातृतः । अविवाह्यास्सगोत्रास्स्युस्समानप्रवरास्तथा ।'

शातातपः—
28 परिणीय सगोत्रां तु समानप्रवरां तथा ।
कृत्वा तस्यास्समुत्सर्गमतिकृच्छ्रो विशोधनम् ॥
मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव द्विजचान्द्रायणं चरेत् ॥'

मनुः —
29पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च ।
मातुश्च भ्रातुस्तनयां गत्वा चान्द्रायणं चरेत् ॥
एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत्तु बुद्धिमान् ।
ज्ञातित्वेनाऽनुपेयास्ताः पतति ह्युपयन्नधः ॥'

बौधायनः— 30 'सगोत्रां चेदमत्योपयच्छेत मातृवदेनां विभृयात्' । 31 सगोत्रां गत्वा चान्द्रायणमुपदिशेत् ॥ व्रते परिनिष्ठिते ब्राह्मणीं न त्यजेत् मातृवद्भगिनीवद्गर्भो न दुष्यतीति काश्यप इति विज्ञायते । अथ सान्निपात अविवाहः तदाध्यायं वर्जयेत् । बोधायनस्य तत्प्रमाणं कर्तव्यम् । मानव्यो हि प्रजा इति विज्ञायते इति ।
गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ।
ऊनपञ्चाशदेवैषां प्रवरा ऋषिदर्शनात् ॥
एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते ।
तावत्समानगोत्रत्वमन्वद्भृग्वाङ्गिरोगणात ॥' इति ।

सुमन्तुः —
32पितृपत्न्यस्सर्वा मातरस्तद्भ्रातरो मातुलाः तत्सुता मातुलसुतास्तस्मात्ता नोपयन्तव्या' इति ॥ १६ ॥

17 ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्याणि

ब्राह्मे विवाहे बन्धुशीलश्रुतारोग्याणि बुद्ध्वा प्रजासहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणालंकृत्य १७

▼

⑤

>

▼ Bühler

17. At the wedding called Brāhma, he shall give away (his daughter) for bearing children and performing the rites that must be performed together (by a husband and his wife), after having enquired regarding (the bridegroom's) family, character, learning, and health, and after having given (to the bride) ornaments according to his power. 33

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मे विवाहे बन्धुशीललक्षणसम्पन्नश्रुतारोग्याणि बुद्ध्वा प्रजां सहत्वकर्मभ्यः प्रतिपादयेच्छक्तिविषयेणाऽलंकृत्य ॥ १७ ॥

टिप्पनी⑥

ब्रह्मणा इष्टो ब्राह्मः । तस्मिन् विवाहे वरस्य बन्ध्वादीन् बुद्ध्वा परीक्ष्य प्रजां दुहितरं सहत्वकर्मभ्यः सहकर्तव्यानि यानि कर्माणि तेभ्यः, तानि कर्तुम्, प्रतिपादयेत् दद्यात् । शक्तिविषयेण विभक्तिप्रतिरूपोऽयं निपातो यथाशक्तीत्यस्यार्थे द्रष्टव्यः । यथाशक्त्यलंकृत्य दद्यादित्येष ब्राह्मो विवाहः । प्रजासहत्वकर्मभ्य' इति पाठे प्रजार्थं सहत्वकर्मार्थं चेति ॥ १७॥

18 आर्षे दुहितृमते मिथुनौ

आर्षे दुहितृमते मिथुनौ गावौ देयौ १८

▼

⑤

>

▼ Bühler

18. At the wedding called Ārsha, the bridegroom shall present to the father of the bride a bull and a cow. 34

▼ हरदत्त-टीका

सूत्रम्⑥

आर्षे दुहितृमते मिथुनौ गावौ देयौ ॥ १८ ॥

टिप्पनी⑥

ऋषिभिर्दष्टे विवाहे मिथुनौ गावौ स्त्रीगवी पुंगवश्च दुहितृमते देयौ । एष आर्षः ॥ १८ ॥

19 दैवे यज्ञतन्त्र ऋत्विजे

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् १९

▼

⑤

>
▼ Bühler

19. At the wedding called Daiva, (the father) shall give her to an officiating priest, who is performing a Śrauta-sacrifice. 35

▼ हरदत्त-टीका

सूत्रम्⑥

दैवे यज्ञतन्त्र ऋत्विजे प्रतिपादयेत् ॥ १९॥

टिप्पनी⑥

देवैर्दृष्टे विवाहे यज्ञतन्त्रे वितते ऋत्विजे कर्म कुर्वते कन्यां दद्यात् । एष दैवो विवाहः ॥ १९॥

20 मिथः कामात्सांवर्तेते स

मिथः कामात्सांवर्तेते स गान्धर्वः २०

▼

⑤

>
▼ Bühler

20. If a maiden and a lover unite themselves through love, that is called the Gāndharva-rite. 36

▼ हरदत्त-टीका

सूत्रम्⑥

मिथः कामात्सांवर्तेते स गान्धर्वः ॥ २० ॥

टिप्पनी⑥

यत्र कन्यावरौ रहसि कामात् मिथः परस्परं रागात् सांवर्तेते मिथुनी भवतः स गान्धर्वो विवाहः । समो दीर्घः पूर्ववत् । अत्र संयोगोत्तरकालं विवाहसंस्कारः कर्तव्यः ॥ २०॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकादशी कण्डिका ॥ ११ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

5. Manu II, 35.↩

6. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

7. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

8. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

9. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

10. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

11. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the

commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

12. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩
13. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
16. Manu II, 69; Yājñ. I, 15.↩
17. Manu II, 144.↩
18. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
19. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

20. यत्किञ्चनदिङ्मुखेन इति क० पु० ।↩

21. प्रतिषेध परिसंख्येत्यनर्थान्तरम् । परिसङ्ख्या वर्जनबुद्धिः । तद्विषयको विधिः परिसंख्याविधिः । स परिसंख्यापदेनाऽप्यभिधीयते इति मीमांसकाना मतम् । अत एव

    > विधिरत्यन्तमप्राप्ते नियम पाक्षिके सति ।
    > तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥

    इत्येव वार्तिककारैरुक्तम् । ग्रन्थकारस्त्वयं परिसंख्या नियमविधावेवान्तर्भावयति ॥↩

22. आप० ध० १ ३१. ६.↩

23. इदं च तर्किकादिमतमनुसृत्य प्रभाकरमतञ्च । भाट्टमते तत्तत्कर्मणामेव यागदानहोमादिरूपाणां चोदनालक्षणानां धर्मत्वाङ्गीकारात् । उक्तं हि भट्टपादैः-

    > श्रेयो हि पुरुषप्रीतिस्सा द्रव्यगुणकर्मभिः ।
    > चोदनालक्षणैस्साध्या तस्मात्तेष्वेव धर्मता ॥ इति । श्लो. वा. १२. १९१.

    ↩

24. पक्षेऽप्राप्तांशस्य पूरणकरणादित्यर्थः ।↩

25. या०स्मृ० १.५२,५३.↩

26. मुद्रितश्लोकात्मकविष्णुस्मृतौ नेदं वचनमुपलभ्यते परन्तु ग्रन्थान्तरेष्वस्याविष्णुस्मृतित्वमुक्तम् ।↩

27. नार०स्मृ० व्यवहा० १२. श्लो० ७.↩

28. मुद्रितशातातपस्मृतौ लघुशतातपस्मृतौ बृद्धशातातपस्मृतौ वा नेदं वचनमुपलभ्यते ॥↩

29. म.स्मृ. ११.१७१, १७१.↩

30. बौ. ध. २.१.३८.↩

31. महाप्रवरे समाप्तिसूत्रकाण्डे । बौ० सू० (प्रवर) १३.५५.↩

32. सु० स्मृ०↩

33. Manu II, 146-148.↩

34. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩

35. Manu II, 147.↩

36. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩

१२①

01 शक्तिविषयेण द्र व्याणि④

शक्ति-विषयेण द्रव्याणि दत्वा वहेरन् - स आसुरः १

▼

⑤

>

▼ Bühler

1. If the suitor pays money (for his bride) according to his ability, and marries her (afterwards), that (marriage is called) the Āsura-rite. 1

▼ हरदत्त-टीका

सूत्रम्⑥

शक्तिविषयेण द्रव्याणि दत्वाऽऽवहरेन् स आसुरः ॥१॥

टिप्पनी⑥

यत्र विवाहे कन्यावते यथाशक्ति द्रव्याणि दत्त्वाऽऽवहेरन् कन्यां स आसुरः । 2 'वित्तेनाऽऽनतिस्त्रीमतामासुर' इति गौतमः। तेन कन्यायै गृहक्षेत्राभरणादिदानेन विवाहो नाऽऽसुरः ॥१॥

02 दुहितृमतः प्रोथयित्वा वहेरन्स

दुहितृमतः प्रोथयित्वा वहेरन् - स राक्षसः २

▼

⑤

>

▼ Bühler

2. If the (bridegroom and his friends) take away (the bride), after having overcome (by force) her father (or relations), that is called the Rākṣasa-rite. 3

▼ हरदत्त-टीका

सूत्रम्⑥

दुहितृमतः प्रोथयित्वाऽऽवहेरन् स राक्षसः ॥२॥

टिप्पनी⑥

दुहितृमतः कन्यावतः पित्रादीन् प्रोथयित्वा प्रमथ्य यत्राऽऽवहेरन् स राक्षसो विवाहः। 4 'हत्वा मित्वा च शीर्षाणि रुदतीं रुदद्भ्यो हरेत् स राक्षस' इत्याश्वलायनः । अत्रापि विवाहसंस्कारः कर्तव्यः। द्वौ चाऽपरौ विवाहौ शास्त्रान्तरेषुक्तौ । तत्राऽऽश्वलायनः-5 'सह धर्मं चरतमिति प्राजापत्यः । सुप्तां प्रमत्तां वाऽपहरेत् स पैशाच' इति । ताविह पृथङ्नोक्तौ ब्राह्मराक्षसयोरन्तर्भावादिति ॥२॥

03 तेषान् त्रय आद्याः

तेषां त्रय आद्याः प्रशस्ताः, पूर्वः पूर्वः श्रेयान् ३

▼

⑤

>
▼ Bühler

3. The first three amongst these (marriage-rites are considered) praiseworthy; each preceding one better than the one following. 6

▼ हरदत्त-टीका

सूत्रम्⑥

तेषां त्रय आद्याः प्रशस्ताः पूर्वः पूर्वः श्रेयान् ॥ ३ ॥

टिप्पनी⑥

तेषां विवाहानां मध्ये आद्यास्त्रयो ब्राह्मार्षदैवा प्रशस्ताः । तत्रापि पूर्वः पूर्वोऽतिशयेन प्रशस्त इति ॥ ३ ॥

04 यथा युक्तो विवाहस्तथा

यथा युक्तो विवाहस् - तथा युक्ता प्रजा भवति ४

▼

⑤

>
▼ Bühler

4. The quality of the offspring is according to the quality of the marriage-rite. 7

▼ हरदत्त-टीका

सूत्रम्⑥

यथायुक्तो विवाहस्तथा युक्ता प्रजा भवति ॥ ४ ॥

टिप्पनी⑥

प्रशस्ते विवाहे जाता प्रजापि प्रशस्ता भवति । निन्दिते निन्दिता तत्र मनुः—
8ब्राह्माादिषु विवाहेषु चतुर्वेदानुपूर्वशः ।
ब्रह्मवर्चसिनः पुत्रा जायन्ते शिष्टसम्मताः ॥
रूपसत्त्वगुणापेता धनवन्तो यशस्विनः ।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥
उत्तरेषु च शिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मसमुज्झिताः ॥
प्राजापत्येन सह ब्राह्माद्याश्चत्वारो ब्राह्मणस्य ।
गान्धर्वराक्षसौ क्षत्रियस्य । आसुरं तु वैश्यशूद्रयोः ।
पैशाचो न कस्यचिदपि ॥४॥

05 पाणिसमूढम् ब्राह्मणस्य नाप्रोक्षितम्

पाणि-समूढं *(भूभागम्)* ब्राह्मणस्य नाप्रोक्षितम् अभितिष्ठेत् ५

▼

⑤

>
▼ Bühler

5. He shall not step on a spot which has been touched by the hand of a Brāhmaṇa, without having sprinkled it with water.

▼ हरदत्त-टीका

सूत्रम्⑥

पाणिसमूढं ब्राह्मणस्य नाऽप्रोक्षितमभितिष्ठेत् ॥ ५॥

टिप्पनी⑥

ब्राह्मणस्य पाणिना **समूढम्** उपलिप्तं सम्मृष्टं वा भूप्रदेशम् **अप्रोक्षितं नाभितिष्ठेत्** नाधितिष्ठेत् । प्राध्यैवाऽधितिष्ठेदिति ॥ ५॥

06 अग्निम् ब्राह्मणञ् चान्तरेण

अग्निं ब्राह्मणं चान्तरेण नातिक्रामेत् ६

▼

⑤

>

▼ Bühler

6. He shall not pass between a fire and a Brāhmaṇa,

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निं ब्राह्मणं चाऽन्तरेण नाऽतिक्रामेत् ॥ ६॥

टिप्पनी⑥

अग्नेर्ब्राह्मणस्य च मध्ये न गच्छेत् ॥ ६ ॥

07 ब्राह्मणांश्च

ब्राह्मणांश्च ७

▼

⑤

>
▼ Bühler

7. Nor between Brāhmaṇas.

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मणांश्च ॥ ७ ॥

टिप्पनी⑥

अन्तरेण नातिक्रामेदित्येव । ब्राह्मणानां च मध्ये न गच्छेत् ॥७॥

08 अनुज्ञाप्य वातिक्रामेत्

अनुज्ञाप्य वातिक्रामेत् ८

▼

⑤

>

▼ Bühler

8. Or he may pass between them after having received permission to do so.

▼ हरदत्त-टीका

सूत्रम्⑥

अनुज्ञाप्य वाऽतिक्रामेत् ॥ ८ ॥

टिप्पनी⑥

स्पष्टम् ॥८॥

09 अग्निमपश्च न युगपद्धारयीत

अग्निमपश्च न युगपद्धारयीत ९

▼

⑤

>

▼ Bühler

9. He shall not carry fire and water at the same time.

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निमपश्च न युगपद्धारयीत ॥ ९ ॥

टिप्पनी⑥

अग्निमुदकञ्च न युगपद्धारयेत् ॥९॥

10 नानाग्नीनाञ् च सन्निवापं

नानाग्नीनां च संनिवापं वर्जयेत् १०

▼

⑤

>
▼ Bühler

10. He shall not carry fires (burning in) separate (places) to one (spot). 9

▼ हरदत्त-टीका

सूत्रम्⑥

नानाग्नीनां च सन्निपातं वर्जयेत् ॥ १० ॥

टिप्पनी⑥

पृथगवस्थितानामग्नीनामेकत्र समावपनं वर्जयेत् न कुर्यात् । अग्नावग्निं न प्रक्षिपेदित्यन्ये10 ॥ १०॥

12 प्रतिमुखमग्निमाह्रियमाणम् नाप्रतिष्ठितम् भूमौ

प्रतिमुखमग्निमाह्रियमाणम् नाप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् *(प्रतिष्ठिते तु प्रदक्षिणीकुर्यात्)*११

▼

⑤

>

▼ Bühler

11. If, whilst he walks, fire is being carried towards him, he shall not walk around it with his right hand turned towards it, except after it has been placed on the ground. 11

▼ हरदत्त-टीका

सूत्रम्⑥

प्रतिमुखमग्निमाह्रियमाणं नाऽप्रतिष्ठितं भूमौ प्रदक्षिणीकुर्यात् ॥ ११ ॥

टिप्पनी⑥

यदाऽस्य गच्छतः प्रतिमुखमग्निर्ह्रियते तदा न तं प्रदक्षिणीकुर्यात् स चेद्भूमौ प्रतिष्ठितो न भवति । प्रतिष्ठिते त्वग्नौ दृष्टे प्रदक्षिणीकुर्यादिति ॥११॥

12 पृष्ठतश्चाऽऽत्मनः पाणी

पृष्ठतश्चात्मनः पाणी न संश्लेषयेत् १२

▼

⑤

>
▼ Bühler

12. He shall not join his hands on his back.

▼ हरदत्त-टीका

सूत्रम्⑥

पृष्ठतश्चाऽऽत्मनः पाणी न संश्लेषयेत् ॥१२॥

टिप्पनी⑥

स्वस्य पृष्ठभागे स्वपाणिद्वयं न सश्लेषयेन्न बध्नीयात् ॥ १२॥

13 स्वपन्न् अभिनिम्रुक्तो नाश्वान्

स्वपन्न् अभिनिम्रुक्तो *(=सूर्यास्तसमये निद्रालुः)* नाश्वान् *(=अनश्नन्)* वाग्यतो रात्रिमासीत । श्वोभूत उदकमुपस्पृश्य वाचं विसृजेत् १३

▼

⑤

>

▼ Bühler

13. If the sun sets whilst he sleeps, he shall sit up, fasting and silent, for that night. On the following morning he shall bathe and then raise his voice (in prayer). 12

▼ हरदत्त-टीका

सूत्रम्⑥

स्वपन्नभिनिम्रुक्तो नाश्वान् वाग्यतो रात्रिमासीत श्वोभूत उदकमुपस्पृश्य वाचं विमृजेत् ॥ १३ ॥

टिप्पनी⑥

13 सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ।
अंशुमानभिनिम्रुक्ताभ्युदितौ तौ यथाक्रमम् ॥
स्वपन्नभिनिम्रुक्तो नाश्वानभुजानस्तूष्णीं भूतो रात्रिं सर्वामासीत न शयीत । अथाऽपरेद्युः उदकमुपस्पृश्य प्रातः स्नात्वा वाचं विसृजेत् । अयमस्य निर्वेषः ॥

14 स्वपन्न् अभ्युदितो नाश्वान्

स्वपन्न् अभ्युदितो *(नाम सूर्योदये निद्रालुः)* नाश्वान्*(=अनश्नन्)* वाग्यतोऽहस्तिष्ठेत् १४

▼

⑤

>

▼ Bühler

14. If the sun rises whilst he is asleep, he shall stand during that day fasting and silent.

▼ हरदत्त-टीका

सूत्रम्⑥

स्वपन्नभ्युदितो नाश्वान्वाग्यतोऽहस्तिष्ठेत् ॥१४॥

टिप्पनी⑥

पूर्वेण गतम् । 'उदकमुपस्पृश्य वाचं विसृजेदिति चात्राऽपेक्ष्यते । तत्रास्तमिते स्नानप्रतिषेधात् सायमेव स्नात्वा वाचं विसृज्य सन्ध्यामुपासीत ॥१४॥

15 आतमितोः प्राणमायच्छेदित्येके १५

आतमितोः प्राणमायच्छेदित्येके *(तावद् वा प्राणान् आयमयेद् यावद् अङ्ग्लानिर् न स्यात्)*१५

▼

⑤

>

▼ Bühler

15. Some declare that he shall restrain his breath until he is tired.

▼ हरदत्त-टीका

सूत्रम्⑥

आतमितोः प्राणमायच्छेदित्येके ॥ १५ ॥

टिप्पनी⑥

यावदङ्गानां ग्लानिर्भवति तावत्प्राणमायच्छेत् प्राणवायुमाकृष्य धारयेत् । प्राणायाम कुर्यादित्येके मन्यते । शक्त्यपेक्षो विकल्पः ।
तत्र मनुः — 14सव्याहृतीं सप्रणवां गायत्रीं शिरसा सह ।
त्रिः पठेदायतप्राणः प्राणायामस्स उच्यते ॥ इति ।
एवमावर्तयेद्यावद्ग्लानिः ॥ १५॥

16 स्वप्नं वा पापकं दृष्ट्वा

स्वप्नं वा पापकं दृष्ट्वा १६

▼

⑤

>
▼ Bühler

16. And (he shall restrain his breath until he is tired) if he has had a bad dream,

▼ हरदत्त-टीका

सूत्रम्⑥

स्वप्नं वा पापकं दृष्ट्वा ॥ १६ ॥

टिप्पनी⑥

पापकस्वप्नो दुस्स्वप्नः मर्कटास्कन्दनादिः । तं च दृष्ट्वा ॥ १६ ॥

17 अर्थं वा सिषाधयिषन्

अर्थं वा सिषाधयिषन् १७

▼

⑤

>

▼ Bühler

17. Or if he desires to accomplish some object,

▼ हरदत्त-टीका

सूत्रम्⑥

अर्थं वा 15सिसाधयिषन् ॥ १७ ॥

टिप्पनी⑥

टिप्पनी⑥

अरण्ये भवमारण्यमजिनवल्कलादि ॥१॥

02 ततो मूलैः फलैः

ततो मूलैः फलैः पर्णैस् तृणैर् इति वर्तयंश् चरेत् २

▼

⑤

>
▼ Bühler

2. Then he shall wander about, sustaining his life by roots, fruits, leaves, and grass. 2

▼ हरदत्त-टीका

सूत्रम्⑥

ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेत् ॥ २ ॥

टिप्पनी⑥

ततो मूलादिभिर्वर्तयन् वृत्तिः प्राणयात्रा तां कुर्वंश्चरेच्चरणशीलः स्यात् ॥ २॥

03 अन्ततः प्रवृत्तानि

अन्ततः प्रवृत्तानि *(= स्वयम् पतितानि)* ३

▼

⑤

>
▼ Bühler

3. In the end (he shall live on) what has become detached spontaneously.

▼ हरदत्त-टीका

सूत्रम्⑥

अन्ततः प्रवृत्तानि ॥३॥

टिप्पनी⑥

मूलादिभिः स्वयंगृहीतैः कञ्चित्कालं वर्तयित्वा अन्ततः अन्ते प्रवृत्तानि स्वयमेव पतितानि अभिनिश्रयेदिति वक्ष्यमाणेन सम्बन्धः । तान्यभिनिश्रित्य तैर्वतयेदिति ॥ ३॥

04 ततोऽपो वायुमाकाशमित्यभिनिश्रयेत्

ततोऽपो वायुम् आकाशम् इत्य् अभिनिश्रयेत् ४

▼

⑤

>
▼ Bühler

4. Next he shall live on water, (then) on air, then on ether. 3

▼ हरदत्त-टीका

सूत्रम्⑥

ततोऽपो वायुमाकाशमित्यभिनिश्रयेत् ॥ ४ ॥

टिप्पनी⑥

ततः कियन्तञ्चित्कालमब्भक्षः ततो वायुभक्षः तत आकाशमभिनिश्रयेत् न किञ्चित् भक्षयेदिति । अभिनिश्रयणं सेवनम् ॥४॥

05 तेषामुत्तर उत्तरः संयोगः

तेषाम् उत्तर उत्तरः संयोगः फलतो विशिष्टः ५

▼

⑤

>
▼ Bühler

5. Each following one of these modes of subsistence is distinguished by a (greater) reward.

▼ हरदत्त-टीका

सूत्रम्⑥

तेषामुत्तर उत्तरस्संयोगः फलतो विशिष्टः ॥५॥

टिप्पनी⑥

संयुज्यते संश्रयत इति संयोगः । तेषां मूलादीनां मध्ये उत्तरमुत्तरं समाश्रयणं फलतो विशिष्टमिति द्रष्टव्यम् ॥ ५॥

06 अथ वानप्रस्थस्यैवानुपूर्व्यमेक उपदिशन्ति

अथ वानप्रस्थस्यैवानुपूर्व्यम् एक उपदिशन्ति ६

▼

⑤

>

▼ Bühler

6. Now some (teachers) enjoin for the hermit the successive performance (of the acts prescribed for the several orders). 4

▼ हरदत्त-टीका

सूत्रम्⑥

अथ वानप्रस्थस्यैवाऽऽनुपूर्व्यमेक उपदिशन्ति ॥६॥

टिप्पनी⑥

अथेति पक्षान्तरोपन्यासे । पूर्वं ब्रह्मचर्यादेव वनप्रवेश उक्तः । एके वाचार्यास्तस्यैव वानप्रस्थस्याऽऽनुपूर्व्यं कर्मोपदिशन्ति ॥६॥

07 विद्यां समाप्य दारङ्

विद्यां समाप्य
दारं कृत्वाग्नीन् आधाय
कर्माण्य् आरभते, सोमावरार्ध्यानि यानि श्रूयन्ते ७

▼

⑤

>
▼ Bühler

7. After having finished the. study of the Veda, having taken a wife and kindled the sacred fires, he shall begin the rites, which end with the Soma-sacrifices, (performing) as many as are prescribed in the revealed texts.

▼ हरदत्त-टीका

सूत्रम्⑥

विद्यां समाप्य दारं कृत्वाऽग्नीनाधाय कर्माण्यरभते सोमावरार्ध्यानि यानि श्रूयन्ते ॥ ७ ॥

प्रस्तावः⑥

कथम्? —

टिप्पनी⑥

ब्रह्मचर्ये स्थितो विद्यां समाप्य गृहस्थश्च भूत्वाऽग्नीनाधाय कर्माणि कुर्यात् । कानि ? सोमावरार्ध्यानि अवरार्धं पश्चार्धं तत्र भवोऽवरार्ध्यः सोमः अवरार्ध्यो येषां तानि सोमावरार्ध्यानि सोमान्तानि हविर्यज्ञाख्यानि चातुर्मास्यादीन् हविर्यज्ञान् सोमं चेत्यर्थः । यानि श्रूयन्ते श्रुतौ विहितानि ॥७॥

08 गृहान्कृत्वा सदारः सप्रजः

गृहान् कृत्वा सदारः सप्रजः सहाग्निभिर् बहिर्ग्रामाद् वसेत् ८

▼

⑤

>
▼ Bühler

8. (Afterwards) he shall build a dwelling, and dwell outside the village with his wife, his children, and his fires, 5

▼ हरदत्त-टीका

सूत्रम्⑥

गृहान् कृत्वा सदारस्सप्रजस्सहाग्निभिर्बहिर्ग्रामाद्वसेत् ॥ ८ ॥

टिप्पनी⑥

अथ ग्रामाद्बहिररण्ये गृहान् कृत्वा सकुटुम्बस्सहैव चाग्निभिर्ग्रामाद्बहिर्वसेत् । अस्मिन्पक्षे प्रागुक्तमेकाग्निरित्येतन्नाऽस्ति ॥ ८ ॥

09 एको वा

एको वा ९

▼

⑤

>
▼ Bühler

9. Or (he may live) alone.

▼ हरदत्त-टीका

सूत्रम्⑥

एको वा ॥ ९ ॥

टिप्पनी⑥

अथवा पुत्रेषु भार्यां निक्षिप्य स्वयमेक एव वसेत्। अस्मिन् पक्षे 'प्राजापत्यां निरुप्येष्ट'मिति परिव्राज उक्तेन न्यायेन श्रौतानग्नीनात्मनि समारोप्य श्रामणकेनाऽग्निमाधाय एकाग्निर्भवेत् ॥ ९॥

10 शिलोञ्छेन वर्तयेत्

शिलोञ्छेन+++(=उपात्तशस्यात् क्षेत्रात् शेषावचयनेन)+++ वर्तयेत् १०

▼

⑤

>
▼ Bühler

10. He shall support himself by gleaning corn. 6

▼ हरदत्त-टीका

सूत्रम्⑥

सिलोञ्छेन वर्तयेत् ॥ १० ॥

टिप्पनी⑥

व्याख्यातः शिलोञ्छः+++(=उपात्तशस्यात् क्षेत्रात् शेषावचयनम्)+++ । तेन वर्तयेत् प्राणयात्रां कुर्यात् । इदं सकुटुम्बस्य एकाकिनश्च साधारणम् । एकाकिन एवेत्यन्ये ॥ १० ॥

11 न चात ऊर्ध्वम्

न चात ऊर्ध्वं प्रतिगृह्णीयात् ११

▼

⑤

>
▼ Bühler

11. And after that he shall not any longer take presents.

▼ हरदत्त-टीका

सूत्रम्⑥

न चाऽत ऊर्ध्वं प्रतिगृह्णीयात् ॥ ११ ॥

टिप्पनी⑥

यदा सिलोञ्छेन वृत्तिर्जाता अत ऊर्ध्वं न कुतश्चिदपि प्रतिगृह्णीयात् ॥११॥

12 अभिषिक्तश्च जुहुयात्

अभिषिक्तश् च जुहुयात् १२

▼

⑤

>

▼ Bühler

12. And he shall sacrifice (only) after having bathed (in the following manner):

▼ हरदत्त-टीका

सूत्रम्⑥

अभिषिक्तश्च जुहुयात् ॥ १२ ॥

टिप्पनी⑥

यदा जुहुयात्तदा अभिषिक्तः स्नातः। अनुवादोऽयं स्नाने विशेषं विधातुम् ॥ १२ ॥

13 शनैरपोऽभ्यवेयादभिघ्नन्न् अभिमुखमादित्यमुदकमुपस्पृशेत्

शनैर् अपोऽभ्यवेयाद्
अभिघ्नन्न्
अभिमुखम् आदित्यम्
उदकम् उपस्पृशेत् *(=स्नायात्)* १३

▼

⑤

>
▼ Bühler

13. He shall enter the water slowly, and bathe without*(??)* beating it (with his hand), his face turned towards the sun.

▼ हरदत्त-टीका

सूत्रम्⑥

शनैरपोऽभ्युपेयादभिघ्नन्नभिमुख आदित्यमुदकमुपस्पृशेत् ॥ १३ ॥

टिप्पनी⑥

शनैरवेगेन जलाशयं प्रविशेत् । प्रविश्य चाऽभिघ्नन् हस्तेनोदकं ताडयन् उदकमुपस्पृशेत् स्नायात् आदित्याभिमुखः ॥ १३ ॥

14 इति सर्वत्रोदकोपस्पर्शनविधिः

इति सर्वत्रोदकोपस्पर्शन-विधिः १४

▼

⑤

>
▼ Bühler

14. This rule of bathing is valid for all (castes and orders).

▼ हरदत्त-टीका

सूत्रम्⑥

7इति सर्वत्रोदकोपस्पर्शनविधिः ॥ १४ ॥

टिप्पनी⑥

सर्ववर्णाश्रमसाधारणमेतत् । तथाचोत्तरत्र तस्य ग्रहणम् ॥ १४ ॥

15 तस्य द्वन्द्वन् द्र

तस्य द्वन्द्वं द्रव्याणाम् एक उपदिशन्ति -
पाकार्थ-भोजनार्थ-
वासि*(=chisel)*-परशु-दात्र*(=असिद)*-काजानाम्*(=mallet)* १५

▼

⑤

>
▼ Bühler

15. Some enjoin (that he shall prepare) two sets of utensils for cooking and eating, (and) of choppers, hatchets, sickles, and mallets. 8

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य द्वन्द्वद्रव्याणामेक उपदिशन्ति पाकार्थं भोजनार्थं वासिपरशुदात्रकाजानाम् ॥ १५ ॥

टिप्पनी⑥

यानि पाकार्थानि ताम्रभाण्डादीनि । यानि च भोजनार्थानि कांस्यादीनि । वासिर्दर्व्यादि । तेषां सर्वेषां वास्यादीनां चतुर्णा9मेकैकस्य द्वे द्वे द्रव्ये उत्पाद्ये इत्येक उपदिशन्ति । काजमपि वास्यादिवदुपकरणविशेषो दारुमयः ॥ १५॥

16 द्वन्द्वानामेकैकमादायेतराणि दत्वारण्यमवतिष्ठेत

द्वंद्वानाम् एकैकम् आदायेतराणि *(भार्यायै)* दत्वा ऽरण्यम् अवतिष्ठेत १६

▼

⑤

>

▼ Bühler

16. He shall take one of each pair (of instruments), give the others (to his wife), and (then) go into the forest.

▼ हरदत्त-टीका

सूत्रम्⑥

द्वन्दानामेकैकमादायेतराणि दत्वाऽरण्यमवतिष्ठेत ॥१६॥

टिप्पनी⑥

तेषां पाकादिसाधनानां द्रव्याणामेकैकं द्रव्यं स्वयमादायेतराणि भार्यायै दत्वा अरण्यमवतिष्ठेत उपतिष्ठेत् आश्रयेदिति ॥ १६ ॥

17 तस्यारण्येनैवात ऊर्ध्वं होमो

तस्यारण्येनैवात ऊर्ध्वं होमो, वृत्तिः, *(अतिथि-)*प्रतीक्षा, ऽऽच्छादनं च १७

▼

⑤

>

▼ Bühler

17. After that time (he shall perform) the burnt-oblations, (sustain) his life, (feed) his guests, and (prepare) his clothes with materials produced in the forest. 10

▼ हरदत्त-टीका

सूत्रम्⑥

तस्याऽऽरण्येनैवाऽत ऊर्ध्वं होमो वृत्तिः प्रतीक्षाच्छादनं च ॥१७॥

टिप्पनी⑥

तस्य वानप्रस्थस्याऽतोऽरण्यप्रवेशादूर्ध्वं आरण्येनैव नीवारादिना होमः वृत्तिः प्राणयात्रा प्रतीक्षा अतिथिपूजा च आच्छादनं वल्कलादिना ॥ १७ ॥

18 येषु कर्मसु पुरोडाशाश्चरवस्तेषु

येषु कर्मसु पुरोडाशश् चरवस्
तेषु कार्याः १८

▼

⑤

>
▼ Bühler

18. Rice must be used for those sacrifices for which cakes mixed with meat (are employed by the householder).

▼ हरदत्त-टीका

सूत्रम्⑥

येषु कर्मसु पुरोडाशाश्चरवस्तेषु कार्याः ॥१८॥

टिप्पनी⑥

येषु दर्शपूर्णमासादिषु पुरोडाशा विहिताः गृहस्थस्य, तेष्वस्य तत्स्थाने 11चरवः कार्याः ॥ १८ ॥

19 सर्वञ् चोपांशु सह

सर्वं चोपांशु - सह स्वाध्यायेन १९

▼

⑤

>
▼ Bühler

19. And all (the Mantras), as well as the daily portion of the Veda, (must be recited) inaudibly.

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वं चोपांशु सह स्वाध्यायेन ॥ १९ ॥

टिप्पनी⑥

सर्वं च कर्मकाण्डं साङ्गं प्रधानमुपांशु भवति पारायणब्रह्मयज्ञाध्ययनेन सह । तदप्युपांशु कर्तव्यमिति ॥ १९ ॥

20 नारण्यमभ्याश्रावयेत्

नारण्यम् अभ्याश्रावयेत् २०

▼

⑤

>
▼ Bühler

20. He shall not make the inhabitants of the forest hear (his recitation). 12

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽऽरण्यमभ्याश्रावयेत् ॥ २०॥

टिप्पनी⑥

उपांशुवचनादेव सिद्धे वचनमाभिमुख्यप्रतिषेधार्थम् । तेनाऽरण्यस्था यथा नाऽऽभिमुख्येन शृणुयुः तावदुपांश्विति ॥ २० ॥

21 अग्न्यर्थं शरणम्

अग्न्य्-अर्थं शरणम् *(=गृहम्)* २१

▼

⑤

>
▼ Bühler

21. (He shall have) a house for his fire (only).

▼ हरदत्त-टीका

सूत्रम्⑥

अग्न्यर्थं शरणम् ॥ २१ ॥

टिप्पनी⑥

शरणं गृहं तदग्न्यर्थमेव ॥ २१ ॥

22 आकाशे स्वयम्

आकाशे स्वयम् *(न गृहे)* २२

▼

⑤

>
▼ Bühler

22. He himself (shall live) in the open air.

▼ हरदत्त-टीका

सूत्रम्⑥

आकाशे स्वयम् ॥ २२ ॥

टिप्पनी⑥

स्वयं चाऽऽकाश एव वसेत् ॥ २२ ॥

23 अनुपस्तीर्णे शय्यासने

अनुपस्तीर्णे शय्य्-आसने

▼

⑤

>
▼ Bühler

23. His couch and seat, must not be covered (with mats).

▼ हरदत्त-टीका

सूत्रम्⑥

अनुपस्तीर्णे शय्यासने ॥ २३ ॥

टिप्पनी⑥

शयनं चाऽऽसनं चाऽनुपस्तीर्णे देशे कुर्यात् न तु किञ्चिदुपस्तीर्य ॥२३॥

24 नवे सस्ये प्राप्ते

नवे सस्ये प्राप्ते पुराणम् अनुजानीयात् *(विसर्जनाय)* २४

▼

⑤

>

▼ Bühler

24. If he obtains fresh grain, he shall throw away the old (store). 13

▼ हरदत्त-टीका

सूत्रम्⑥

नवे सस्ये प्राप्ते पुराणमनुजानीयात् ॥ २४ ॥

टिप्पनी⑥

नवे धान्ये श्यामाकनीवारादौ प्राप्ते जाते पुराणं पूर्वसञ्चितं सस्यमनुजानीयात् परित्यजेत् । तत्र मनुः —
14 'त्यजेदाश्वयुजे मासि मुन्यन्नं पूर्वसञ्चितम् ।
जीर्णानि चैव वासांसि पुष्पमूलफलानि च ॥' इति ॥ २४ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition. ↩
2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
3. Manu II, 35.↩
4. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
5. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
6. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
8. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have

begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
10. Manu II, 69; Yājñ. I, 15.↩
11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
12. Manu II, 144.↩
13. Manu II, 146-148.↩
14. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

२३①

01 भूयांसं वा नियममिच्छन्न्④

भूयांसं वा नियमम् इच्छन्न्
अन्वहम् एव पात्रेण सायं प्रातर् अर्थम् आहरेत् १

▼

⑤

>
▼ Bühler

1. If he desires (to perform) very great austerities, he (shall not make a hoard of grain, but) collect food every day only, morning and evening, in his vessel. 1

▼ हरदत्त-टीका

सूत्रम्⑥

भूयांसं वा नियममिच्छन्नन्वहमेव पात्रेण सायंप्रातरर्थमाहरेत् ॥ १ ॥

टिप्पनी⑥

इदमेकाकिनो वानप्रस्थस्य । भूयासं नियममिच्छन्न सस्यं सञ्चिनुयात् । किं तर्हि ? अन्वहमेव पात्रेण येनकेनचित् सायंप्रातश्चाऽर्थमशनीयमात्रमाहरेत् वानप्रस्थेभ्य एव ॥१॥

02 ततो मूलैः फलैः

ततो मूलैः फलैः पर्णैस् तृणैर् इति वर्तयंश् चरेद्
अन्ततः प्रवृत्तानि *(=स्वयम्पतितानि)*,
ततोऽपो वायुम् आकाशम्
इत्य् अभिनिश्रयेत्।
तेषामुत्तर उत्तरः संयोगः फलतो विशिष्टः २

▼

⑤

>

▼ Bühler

2. Afterwards he shall wander about, sustaining his life with roots, fruits, leaves, and grass (which he 2 collects). Finally (he shall content himself with) what has become detached spontaneously. Then he shall live on water, then on air, (and finally) upon ether. Each succeeding mode of subsistence procures greater rewards.

▼ हरदत्त-टीका

सूत्रम्⑥

ततो मूलैः फलैः पर्णैस्तृणैरिति वर्तयंश्चरेदन्ततः प्रवृत्तानि ततोऽपो वायुमाकाशमित्यभिनिश्रयेत् । तेषामुत्तर उत्तरस्संयोगः फलतो विशिष्टः ॥२॥

प्रस्तावः⑥

एवं कियन्तचित्कालं वर्तयित्वा—

टिप्पनी⑥

सर्वं गतम् ॥२॥

03 अथ पुराणे श्लोकावुदाहरन्ति

अथ पुराणे श्लोकाव् उदाहरन्ति ३

▼

⑤

>
▼ Bühler

3. Now they quote (the following) two verses from a Purāṇa: 3

▼ हरदत्त-टीका

सूत्रम्⑥

अथ पुराणे श्लोकावुदाहरन्ति–
अष्टाशीतिसहस्राणि ये प्रजामीषिर ऋषयः ।
दक्षिणेनाऽर्यम्णः पन्थानं ते श्मशानानि भेजिरे ॥३॥

प्रस्तावः⑥

निरूपिता आश्रमाः। अथेदानीं पक्षप्रतिपक्षरूपेण तेषामेव प्राधान्यमप्राधान्यं च निरूप्यते—

टिप्पनी⑥

अष्टाशीतिसहस्राणि ये गृहस्था ऋषयः प्रजामीषिरे प्रजातिमभ्यनन्दन् ते अर्यम्णो यो दक्षिणेन पन्थाः दक्षिणायनमार्गः तं प्राप्य छान्दोग्योक्तेन 4धूमादिमार्गेण गत्वा पुनरपि सम्भूय श्मशानानि भेजिरे मरणं प्रतिपेदिरे। जायस्व म्रियस्वेत्याजीवं जीवभावमापेदिर इति गृहस्थानां निन्दा ॥३॥

04 अष्टाशीतिसहस्राणि ये प्रजामीशिर

अष्टाशीति-सहस्राणि ये
प्रजाम् ईशिर *(=अभ्यनन्दन्)* ऋर्षयः ।
दक्षिणेनार्यम्णः पन्थानं
ते श्मशानानि भेजिरे ४

▼

⑤

>
▼ Bühler

4. Those eighty thousand sages who desired offspring passed to the south by Aryaman's road and obtained burial-grounds. 5

▼ हरदत्त-टीका

सूत्रम्⑥

अष्टाशीतिसहस्राणि ये प्रजां नेषिर ऋषयः ।
उत्तरेणाऽर्यम्णः पन्थानं तेऽमृतत्वं हि कल्पते ॥ ४॥

टिप्पनी⑥

ये6तु प्रजातिं नाभ्यनन्दन् ते उत्तरायणमार्गेण7 अर्चिरादिमार्गेण गत्वा अमृतत्त्वं विभक्तिव्यत्ययः, अमृतत्वाय कल्पते वचनव्यत्ययः कल्पन्ते समर्थास्सम्पद्यन्ते ॥४॥

05 अष्टाशीतिसहस्राणि ये प्रजान्

अष्टाशीतिसहस्राणि ये प्रजां नेषिरर्षयः ।
उत्तरेणार्यम्णः पन्थानं तेऽमृतत्वं हि कल्पते ५

▼

⑤

>
▼ Bühler

5. Those eighty thousand sages who desired no offspring passed by Aryaman's road to the north and obtained immortality.

▼ हरदत्त-टीका

सूत्रम्⑥

इत्यूर्ध्वरेतसां प्रशंसा ॥५॥

टिप्पनी⑥

गृहस्थादन्ये त्रयोऽपि ऊर्ध्वरेतसः। तेषामेषा प्रशंसेति ॥ ५ ॥

06 इत्यूर्ध्वरेतसाम् प्रशंसा

इत्यूर्ध्वरेतसां *(=गृहस्थेतरेषाम्)* प्रशंसा ६

▼

⑤

>
▼ Bühler

6. Thus are praised those who keep the vow of chastity.

▼ हरदत्त-टीका

सूत्रम्⑥

इत्यूर्ध्वरेतसां प्रशंसा ॥५॥

टिप्पनी⑥

गृहस्थादन्ये त्रयोऽपि ऊर्ध्वरेतसः। तेषामेषा प्रशंसेति ॥ ५ ॥

07 अथापि सङ्कल्पसिद्ध्यो भवन्ति

अथापि संकल्प-सिद्ध्यो *(=सङ्कल्पत एव सिद्धिः)* भवन्ति ७

▼

⑤

>
▼ Bühler

7. Now they accomplish also their wishes merely by conceiving them,

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽपि सङ्कल्पसिद्धयो भवन्ति ॥ ६॥

प्रस्तावः⑥

पुनरपि तेषामेव प्रकारान्तरेण प्रशंसा—

टिप्पनी⑥

अथाऽपि अपि च सङ्कल्पादेव सिद्धयो भवन्ति तेषामूर्ध्वरेतसाम् ॥६॥

08 यथा वर्षम् प्रजादानन्

यथा वर्षं, प्रजा-दानं,
दूरे दर्शनं, मनो-जवता,
यच्चान्यद् एवं युक्तम् ८

▼

⑤

>
▼ Bühler

8. For instance, (the desire to procure) rain, to bestow children, second-sight, to move quick as thought, and other (desires) of this description.

▼ हरदत्त-टीका

सूत्रम्⑥

यथा वर्षं प्रजा दानं दूरदर्शनं मनोजवता यच्चान्यदेवंयुक्तम् ॥ ७ ॥

प्रस्तावः⑥

तत्रोदाहरणम् -

टिप्पनी⑥

यदि महत्यामनावृष्टौ8 सत्यां 'वर्षतु देव' इति ते कामयेरन् तदा कामवर्षी पर्जन्यो भवति । यदि वा कश्चिदपुत्रमनुगृह्णीयुः-पुत्रोऽस्य जायतामिति स पुत्रवानेव भवति । यदि वा 9चोलेष्ववस्थितास्तदैव हिमवन्तं दिदृक्षेरन् तथैव तद्भवति। मनस इव जवो येषां ते मनोजवा तेषां भावो मनोजवता । यदि कामयेरन् अमुं देशमियत्यामेव कालकलायां प्राप्नुयामेति, ततो यावता कालेन मनस्तं देशं प्राप्नोति तावता तं देशं प्राप्नुयुरिति । यच्चान्यदेवंयुक्तम् रोगिणामारोग्यादि तदपि सङ्कल्पादेव तथा भवति ॥ ७॥

09 तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानाश्रमानेतानेके

तस्माच् छ्रुतितः, प्रत्यक्ष-फलत्वाच् च
विशिष्टान् आश्रमान् एतान् एके ब्रुवते ९

▼

⑤

>
▼ Bühler

9. Therefore on account of (passages) of the revealed texts, and on account of the visible results, some declare these orders

(of men keeping the vow of chastity to be) the most excellent.

▼ हरदत्त-टीका

सूत्रम्⑥

यस्मादेवम्—
तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानाश्रमानेतानेके ब्रुवते ॥ ८॥

टिप्पनी⑥

तस्माच्छ्रुतितः 'यदहरेव विरजेत्तदहरेव प्रव्रजेदि'त्यादिश्रुत्यनुगतत्वादुक्तेन प्रकारेण प्रत्यक्षफलत्वाच्च एतानूर्ध्वरेतसामाश्रमान् विशिष्टान् गार्हस्थ्यादुत्कृष्टानेके ब्रुवत इति ॥ ८॥

10 त्रैविद्यवृद्धानान् तु वेदाः

त्रैविद्य-वृद्धानां तु
वेदाः प्रमाणम्
इति निष्ठा।
तत्र यानि श्रूयन्ते
व्रीहि-यव-पश्व्-आज्य-पयः-कपाल-पत्नी-संबन्धान्य्
उच्चैर् नीचैः कार्यम् इति
तैर् विरुद्ध आचारो ऽप्रमाणम् इति मन्यन्ते १०

▼

⑤

>

▼ Bühler

10. But (to this we answer): It is the firm opinion of those who are well versed in the threefold sacred learning, that the Vedas

are the highest authority. They consider that the (rites) which are ordered there to be performed with rice, yava, animals, clarified butter, milk, potsherds, (in conjunction) with a wife, (and accompanied) by loud or muttered (Mantras), must be performed, and that (hence) a rule of conduct which is opposed to these (rites) is of no authority.

▼ हरदत्त-टीका

सूत्रम्⑥

त्रैवृद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसम्बन्धान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यन्ते ॥ ९॥

प्रस्तावः⑥

तदिदं गार्हस्थ्योत्कर्षप्रतिपादनेन निराकरोति—

टिप्पनी⑥

त्र्यवयवा विद्या **त्रिविद्या** त्रयो वेदाः ।
तां ये पाठतश्चाऽर्थतश्च विदन्ति ते **त्रैविद्याः**।
तेषु पक्व-ज्ञानास् **त्रैविद्यवृद्धाः** ।
तेषां 10वेदशास्त्रविदां वेदा एव **प्रमाणम्** अतीन्द्रियेऽर्थ **इति, निष्ठा** निर्णयः ।
यथाह भगवान् जैमिनिः— 11'चोदनालक्षणोऽर्थो धर्मः, इति12 प्रत्यक्षमनिमित्तमि'ति च ।
ततश् च **तत्र** वेदे **यानि** कर्माणि श्रूयन्ते,
किंलक्षणानि ? व्रीहियवादिभिस् सम्बद्धानि
"उच्चैः ऋचा क्रियते, उपांशु यजुषे"त्येवंप्रकाराणि
तैर् विरुद्ध आचारः प्रमाणं न भवतीति मन्यन्ते ।
एतदुक्तं भवति— सर्वेषु वेदेषु सर्वासु च शाखासु अग्निहोत्रादीनि13 विश्वसृजामयनपर्यन्तानि

कर्माण्येव तात्पर्यतया विधीयन्ते ।
अतो गार्हस्थ्यम् एव श्रेष्ठम् ।
ऊर्ध्वरेतसां त्वाश्रमास् तद्विरुद्धा
नैवाऽऽश्रयणीयाः यदि वेदाः प्रमाणम् इति ।
तथा च गौतमः-'ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्ये'ति । एवं गार्हस्थ्यं प्रशस्यते ॥ ९॥

11 यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते

यत् तु श्मशानम् उच्यते

("दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे" इत्यस्मिन्)
नाना-कर्मणाम् एषोऽन्ते पुरुष-संस्कारो विधीयते ११

▼

⑤

>
▼ Bühler

11. But by the term burial-ground (in the text above given) it is intended to ordain the last rites for those who have performed many sacrifices, (and not to mean that dead householders become demons and haunt burial-grounds.) 14

▼ हरदत्त-टीका

सूत्रम्⑥

यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसंस्कारो विधीयते ॥ १० ॥

प्रस्तावः⑥

श्मशानानि भेजिर इति निन्दां परिहरति—

टिप्पनी⑥

यत्तु गृहस्थानां श्मशान श्रूयते स एष नानाकर्मणामग्निहोत्रादीनामन्ते पितृमेधाख्यः पुरुषसंस्कारो विधीयते । न तु पिशाचा भूत्वा श्मशानमेव सेवन्त इति ॥ १०॥

12 ततः परमनन्त्यम् फलं

ततः परम् अनन्त्यं फलं स्वर्ग्य-शब्दं श्रूयते १२

▼

⑤

>
▼ Bühler

12. The revealed texts declare that after (the burial follows) a reward without end, which is designated by the term 'heavenly bliss.'

▼ हरदत्त-टीका

सूत्रम्⑥

ततः परमनन्त्यं फलं स्वर्ग्यशब्दं श्रूयते ॥१२॥

प्रस्तावः⑥

कुत इत्याह—

टिप्पनी⑥

ततः परं श्मशानकर्मणोऽनन्तरम्, अनन्त्यमपरिमितं स्वर्गशब्दवाच्यं फलं श्रूयते-'स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकमेती'ति । अनन्त्यं स्वर्ग्यमिति15 यकारश्छान्दसः उपजनः अपपाठो वा ॥१२॥

इत्यापस्तम्बधर्ममूत्रवृत्तौ द्वितीयप्रश्ने त्रयोविंशी कण्डिका ॥२३॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

3. Manu II, 35.↩

4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

7. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

10. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

11. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

12. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

13. आप० ध० १.३०.८.↩

14. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

15. मनु० रमृ० २.६↩

२४①

01 अथाप्यस्य प्रजातिम् अमृतम्④

अथाप्यस्य प्रजातिम्
अमृतम् आम्नाय आह । प्रजामनु प्रजायसे तदु ते मर्त्यामृतमिति १

▼

⑤

>
▼ Bühler

1. Now the Veda declares also one's offspring to be immortality (in this verse): 'In thy offspring thou art born again, that, mortal, is thy immortality.'

▼ हरदत्त-टीका

सूत्रम्⑥

अथाप्यस्य प्रजातिममृतमानाय आह—
प्रजामनु प्रजायसे तदु ते मत्र्थोऽमृतामिति ॥ १ ॥

प्रस्तावः⑥

पुनरपि गार्हस्थ्यमेव प्रकारान्तरेण स्तौति—

टिप्पनी⑥

अथाऽपि अपि च अस्य गृहस्थस्य प्रजापतिं प्रजासन्तानम् अमृतम् अमरमणम् आम्नायो वेद आह हे मर्त्य मरणधर्मन् ! प्रजां जायमानामनु त्वं प्रजायसे त्वमेव प्रजारूपेण जायसे । तदेव ते मरणधर्मिणः अमृतममरणमिति । न त्वं म्रियसे, यतस्त्वं प्रजारूपेण तिष्ठसीति ॥ १॥
02 अथापि स एवायं

अथापि - स एवायं विरूढः पृथक् प्रत्यक्षेणोपलभ्यते दृश्यते चापि सारूप्यं देहत्वमेवान्यत् २

▼

⑤

>
▼ Bühler

2. Now it can also be perceived by the senses that the (father) has been reproduced separately (in the son); for the likeness (of a father and of a son) is even visible, only (their) bodies are different.

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽपि स एवाऽयं विरूढः पृथक्प्रत्यक्षेणोपलभ्यते दृश्यते चाऽपि सारूप्यं देहत्वमेवाऽन्यत् ॥ २ ॥

प्रस्तावः⑥

उपपन्नं चैतदित्याह—

टिप्पनी⑥

अपि च स एवाऽय पृथग्विरूढः प्रत्यक्षेणोपलभ्यते । स एव द्विधाभूत इव लक्ष्यते । दृश्यते हि सारूप्यं द्वयोः । देहमात्रं तु भिन्नम् । देहत्वमिति स्वार्थिकस्त्वः ॥ २॥

03 ते शिष्टेषु कर्मसु

ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां सांपरायेण कीर्तिं स्वर्गं च वर्धयन्ति ३

▼

⑤

>
▼ Bühler

3. 'These (sons) who live, fulfilling the rites taught (in the Veda), increase the fame and heavenly bliss of their departed ancestors.'

▼ हरदत्त-टीका

सूत्रम्⑥

ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां साम्परायेण कीर्तिं स्वर्गं च वर्धयन्ति ॥ ३ ॥

प्रस्तावः⑥

यदि पुत्ररूपेणाऽवस्थानं, किमेतावतेत्याह—

टिप्पनी⑥

ते पुत्राश्शिष्टेषु चोदितेषु कर्मसु वर्तमाना अवस्थिताः पूर्वेषां पितृपितामहादीनां साम्परायेण परलोकेन सम्बद्धानां कीर्तिं स्वर्गं च वर्धयन्ति— अस्याऽयं पुत्र एवं कर्मा, अस्याऽयं पौत्र इति । स्वर्गं च वर्धयन्ति । कीर्तिमतां हि स्वर्गवासश्श्रूयते ॥ ३ ॥

04 एवमवरोऽवरः परेषाम्

एवमवरोऽवरः परेषाम् *(=पूर्विकाणाम्)* ४

▼

⑤

>

▼ Bühler

4. 'In this manner each succeeding (generation increases the fame and heavenly bliss) of the preceding ones.'

▼ हरदत्त-टीका

सूत्रम्⑥

एवमवरोऽवरः परेषाम् ॥ ४॥

टिप्पनी⑥

एवमनेन प्रकारेण अवरोऽवर परेषां कीर्तिं स्वर्गं च वर्धयति ॥ ४॥

05 आ भूतसम्प्लवात् ते

आ भूतसंप्लवात् ते स्वर्गजितः ५

▼

⑤

>

▼ Bühler

5. 'They (the ancestors) live in heaven until the (next) general destruction of created things.'

▼ हरदत्त-टीका

सूत्रम्⑥

आभूतसम्प्लवात्ते स्वर्गजितः ॥५॥

टिप्पनी⑥

भूतसम्प्लवो महाप्रलयः । आ तस्मात्ते पुत्रिणस्स्वर्गजितो भवन्ति ते च ५

06 पुनः सर्गे बीजार्था

पुनः सर्गे बीजार्था भवन्तीति भविष्यत्पुराणे ६

▼

⑤

>

▼ Bühler

6. At the new creation (of, the world) they become the seed. That has been declared in the Bhaviṣyatpurāṇa. 1

▼ हरदत्त-टीका

सूत्रम्⑥

पुनस्सर्गे बीजार्था भवन्तीति भविष्यत्पुराणे ॥६॥

टिप्पनी⑥

प्रलयानन्तरं सर्गः, तत्र संसारस्य बीजार्थाः प्रजार्थाः प्रजापतयो भवन्तीति भविष्यत्पुराणे श्रूयते ॥ ६ ॥

07 अथापि प्रजापतेर्वचनम्

अथापि प्रजापतेर्वचनम् ७

▼

⑤

>

▼ Bühler

7. Now Prajāpati also says,

▼ हरदत्त-टीका

सूत्रम्⑥

अथाऽपि प्रजापतेर्वचनम् ॥ ७॥

टिप्पनी⑥

अपि च प्रजापतेरपि वाक्यमस्मिन्नर्थे भवति । गार्हस्थ्यमेव वरिष्ठमिति ॥७॥

08 त्रयीं विद्याम् ब्रह्मचर्यम्

त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् । य एतानि कुर्वते तैरित् सह *(वयम् प्रजापतयः)* स्मो, रजो भूत्वा ध्वंसते ऽन्यत् प्रशंसन्न् इति ८

▼

⑤

>

▼ Bühler

8. 'Those dwell with us who fulfil the following (duties): the study of the three Vedas, the studentship, the procreation of children, faith, religious austerities, sacrifices, and the giving of gifts. He who praises other (duties), becomes dust and peṛṣes.' 2

▼ हरदत्त-टीका

सूत्रम्⑥

त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् । य एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन्निति ॥ ८॥

टिप्पनी⑥

त्रयीं विद्यां त्रयाणां वेदानामध्ययनम् । ब्रह्मचर्यमष्टाचत्वारिंशदादिकम् । प्रजातिं प्रजोत्पादनम् । श्रद्धामास्तिक्यम् । तप उपवासादि । यज्ञमग्निहोत्रादिकं सोमयागान्तम् । अनुप्रदानं अन्तर्वेदि बहिर्वेदि च दानम् । य एतानि कर्माणि कुर्वते, तैरित् तैरेव सह वयं स्मः त एवाऽस्माकं सहायाः। अन्यत्तु ऊर्ध्वरेतसामाश्रमादिकं प्रशंसन् पुरुषो रजः पांसुर्भूत्वा ध्वंसते नश्यति । इतिशब्दो व वनसमाप्त्यर्थः । यथैवं तर्हि शिष्टेषु वर्तमानाः पुत्राः पूर्वेषां कीर्तिं स्वर्गं च वर्धयन्ति, तथा प्रतिषिद्धेषु वर्तमानां अकीर्तिं नरकं च वर्धयेयुः॥८॥

09 तत्र ये पापकृतस्त

तत्र ये पापकृतस्त एव ध्वंसन्ति यथा पर्णं वनस्पतेर्न परान्हिंसन्ति ९

▼

⑤

>
▼ Bühler

9. Those among these (sons) who commit sin, peṛṣ alone, just as the leaf of a tree (which has been attacked by worms falls without injuring its branch or tree). They do not hurt their ancestors.

▼ हरदत्त-टीका

सूत्रम्⑥

तत्र ये पापकृतस्त एवं ध्वंसन्ति यथा पर्णं वनस्पतेर्न परान् हिंसन्ति ॥ ९॥

प्रस्तावः⑥

तत्राऽऽह—

टिप्पनी⑥

तत्र प्रजासन्ताने ये पापस्य कर्तारः, त एव ध्वंसन्ते न परान् पित्रादीन् हिंसन्ति । यथा यदेव पर्णं वनस्पतेः कीटादिभिर्दूषितं तदेव पतति, न वनस्पतिं शाखान्तरं वा पातयति तद्वत् ॥९॥

10 नास्यास्मिंल् लोके कर्मभिः

नास्यास्मिंल् लोके कर्मभिः संबन्धो विद्यते तथा परस्मिन्कर्मफलैः १०

▼

⑤

>
▼ Bühler

10. (For) the (ancestor) has no connection with the acts committed (by his descendant) in this world, nor with their results in the next.

▼ हरदत्त-टीका

सूत्रम्⑥

नाऽस्याऽस्मिल्ँलोके कर्मभिस्सम्बन्धो विद्यते तथा परस्मिन् कर्मफलैः ॥१०॥

प्रस्तावः⑥

एतदेवोपपादयति—

टिप्पनी⑥

अस्येति सामान्यापेक्षमेकवचनम् । अस्य पित्रादेः पूर्वपुरुषस्य आस्मिन् लोके पुत्रकृतैः कर्मभिः सम्बन्धो न विद्यते । दृष्टान्तोऽयम् । यथा पुत्रकृतेषु कर्मसु पित्रादेः कर्तृत्वं नाऽस्ति, तथा परस्मिन्नपि लोके कर्मफलैरपि सम्बन्धो नाऽस्तीत्यर्थः॥ १० ॥

11 तदेतेन वेदितव्यम्

तदेतेन वेदितव्यम् ११

▼

⑤

>
▼ Bühler

11. (The truth of) that may be known by the following (reason):

▼ हरदत्त-टीका

सूत्रम्⑥

तदेतेन वेदितव्यम् ॥ ११ ॥

टिप्पनी⑥

यदुक्तं ये पापकृतस्त एव ध्वंसन्ति न परान् हिंसन्तीति तदर्थरूपमेतेन वक्ष्यमाणेन हेतुना वेदितव्यम् ॥ ११ ॥

12 प्रजापतेर्ऋषीणामिति सर्गोऽयम्

प्रजापतेर्ऋषीणामिति सर्गोऽयम् १२

▼

⑤

>
▼ Bühler

12. This creation (is the work) of Prajāpati and of the sages.

▼ हरदत्त-टीका

सूत्रम्⑥

प्रजापतेर्ऋषीणामिति सर्गोऽयम् ॥१२॥

टिप्पनी⑥

प्रजापतेर्हिरण्यगर्भस्य ऋषीणां च मरीच्यादीनामयं सर्गो देवादिस्तिर्यगन्तः । ते चाऽध्वस्ता एच स्वे स्वे पदे वर्तन्ते । यदि च पुत्राः पापकृतः स्वयं ध्वंसमानाः परानपि ध्वंसयेयुः, सदैतन्नोपपद्यते— पुण्यकृतः सुखेनाऽद्यापि वर्तन्ते इति ॥ १२॥

13 तत्र ये पुण्यकृतस्तेषाम्

तत्र ये पुण्यकृतस् तेषां प्रकृतयः परा ज्वलन्त्य *(= तारारूपेण)* उपलभ्यन्ते १३

▼

⑤

>

▼ Bühler

13. The bodies of those (sages) who stay there (in heaven) on account of their merits appear visibly most excellent and brilliant (as, for instance, the constellation of the seven Ṛṣis). 3

▼ हरदत्त-टीका

सूत्रम्⑥

तत्र ये पुण्यकृतस्तेषां प्रकृतयःपरा ज्वलन्त्य उपलभ्यन्ते ॥ १३ ॥

प्रस्तावः⑥

अत्रोदाहरणमाह—

टिप्पनी⑥

तत्र स्वर्गे ये पुण्यकृतो वसिष्ठादयस्तेषां प्रकृतयश्शरीराणि परा उत्कृष्टाः ज्वलन्त्यः दीप्यमाना उपलभ्यन्ते, दिवि यथा सप्तर्षिमण्डलम् । श्रूयते च4 'सुकृतां वा एतानि ज्योतींषि, यन्नक्षत्राणी'ति । इदमपि प्रमाणं न पुत्राणां ध्वंसे पूर्वेषां प्रध्वंस इति ॥ १३ ॥

14 स्यात्तु कर्मावयवेन तपसा

स्यात् तु कर्मावयवेन तपसा वा कश्चित् सशरीरो ऽन्वन्तं लोकं जयति, सङ्कल्पसिद्धिश् च स्यान् - न तु तज् ज्यैष्ठ्यम् आश्रमाणाम् १४

▼

⑤

>
▼ Bühler

14. But even though some (ascetic), whilst still 5 in the body, may gain heaven through a portion of (the merit acquired by his former) works or through austerities, and though he may. accomplish (his objects) by his mere wish, still this is no reason to place one order before the other.

▼ हरदत्त-टीका

सूत्रम्⑥

स्यात्तु कर्मावयवेन तपसा वा कश्चित्सशरीरोऽन्तवन्तं लोकं जयति सङ्कल्पसिद्धिश्च स्यान्न तु तज्ज्यैष्ठ्यमाश्रमाणाम् ॥ १४ ॥

टिप्पनी⑥

कर्मावयवेन पूर्वार्जितानां कर्मणामेकदेशेन भुक्तशेषेण तपसा वा तीव्रेण कश्चिदूर्ध्वरेतास्सहशरीरेणाऽन्तवन्तं लोकं जयतीति यत्तत् स्यात् सम्भवेदपि । यश्च सङ्कल्पादेव सिद्धिस्स्यादिति, तदपि स्यात् न तु तदाश्रमाणां ज्यैष्ठ्यकारणमिति । तदेव "मैकाश्रम्यं त्वाचार्या' इत्ययमेव पक्षः स्थापितः । अन्ये मन्यन्ते-सर्वे आश्रमा दूषिताः भूषिताश्च । ततस्तेषु सर्वेषु यथोपेदेशमव्यग्रो वर्तमानः क्षेमं गच्छतीत्येतदेव स्थितमिति ॥ १४ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने चतुर्विंशी कण्डिका॥ १७ ॥

इति चापस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायां उज्ज्वलायां द्वितीयप्रश्ने नवमः पटलः ॥९॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

3. Manu II, 35.↩

4. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

२५①

01 व्याख्याताः सर्ववर्णानां साधारणवैशेषिका④

व्याख्याताः सर्ववर्णानां साधारणवैशेषिका धर्माः । राज्ञस्तु विशेषाद्वक्ष्यामः १

▼

⑤

>
▼ Bühler

1. The general and special duties of all castes have been explained. But we will now declare those of a king in particular.

▼ हरदत्त-टीका

सूत्रम्⑥

व्याख्यातास्सर्ववर्णानां साधारणवैशेषिका धर्मा राज्ञस्तु विशेषाद्वक्ष्यामः ॥ १॥

टिप्पनी⑥

उक्तवक्ष्यमाणसङ्कीर्तनं श्रोतृबुद्धिसमाधानार्थम् । अहिंसासत्यास्तेयादयः सर्ववर्णानां साधारणधर्माः । अध्ययनादयस्त्रयाणाम् । अध्यापनादयो ब्राह्मणस्य । युद्धादयः क्षत्रियस्य । कृष्यादयो वैश्यस्य । शुश्रूषा शूद्रस्य । राजाऽत्राभिषिक्तो विविक्षितः। तस्यैव हि वक्ष्यमाणं धर्मजातं सम्भवति । तस्य विशेषाद्विशेषतो यद्वक्तव्यं तद्वक्ष्यामः । विशेषानिति द्वितीयान्तपाठस्तु युक्तः॥१॥

02 दक्षिणाद्वारं वेश्म पुरञ्

दक्षिणाद्वारं वेश्म पुरं च मापयेत् २

▼

⑤

>
▼ Bühler

2. He shall cause to be built a town and a palace, the gates of both of which (must look) towards the south.

▼ हरदत्त-टीका

सूत्रम्⑥

दक्षिणाद्वारं वेश्म पुरं च मापयेत् ॥ २॥

टिप्पनी⑥

वेश्म गृहं पुरं नगरं तदुभयमपि दक्षिणाद्वारं मापयेत् कारयेत् स्थपत्यादिभिः । दक्षिणपार्श्वे द्वारं यस्य तत्तथोक्तम् ॥ २ ॥

03 अन्तरस्याम् पुरि वेश्म

अन्तरस्यां पुरि वेश्म ३

▼

⑤

>
▼ Bühler

3. The palace (shall stand) in the heart of the town. 1

▼ हरदत्त-टीका

सूत्रम्⑥

अन्तरस्यां पुरि वेश्म ॥ ३ ॥

टिप्पनी⑥

सर्वेषामेव प्राकाराणां मध्ये या पुस्तस्यामन्तरस्यां पुरि वेश्म मापयेदात्मनः ॥३॥

04 तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते

तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते ४

▼

⑤

>
▼ Bühler

4. In front of that (there shall be) a hall. That is called the hall of invitation.

▼ हरदत्त-टीका

सूत्रम्⑥

तस्य पुरस्तादावसथस्तदामन्त्रणमित्याचक्षते ॥ ४॥

टिप्पनी⑥

तस्य वेश्मनः पुरस्तादावसथः कारयितव्यः । एत्य वसन्त्यस्मिन्नित्यावसथः आस्थानमण्डपः। तस्यामन्त्रणमिति संज्ञा2 ॥४॥

05 दक्षिणेन पुरं सभा

दक्षिणेन पुरं सभा दक्षिणोदग्द्वारा यथोभयं संदृश्येत बहिरन्तरं चेति ५

▼

⑤

>
▼ Bühler

5. (At a little distance) from the town to the south, (he shall cause to be built) an assembly-house with doors on the south and on the north sides, so that one can see what passes inside and outside.

▼ हरदत्त-टीका

सूत्रम्⑥

दक्षिणेन पुरं सभा दक्षिणोदग्द्वारा यथोभयं सन्दृश्येत बहिरन्तरं चेति ॥५॥

टिप्पनी⑥

दक्षिणेनेत्येनबन्तम् । पुरमिति3 'एनपा द्वितीये'ति द्वितीयान्तम् । पुरस्य दक्षिणतः अदूरे सभा कारयितव्या। दक्षिणोदग्द्वारा दक्षिणस्यामुत्तरस्यां च दिशि द्वारं यस्यास्सा तथोक्ता। किमर्थमुभयत्र द्वारमिति चेत् । यद्बहिर्वृत्तं यच्चाऽभ्यन्तर तदुभयमपि यथा सन्दश्येतेत्येवमर्थमिति । सैषा द्यूतसभा । तस्यां धूतार्थिनः प्रविशन्तीति तदायस्थानं राज्ञः ॥ ५॥

06 सर्वेष्वेवाजस्रा अग्नयः स्युः

सर्वेष्वेवाजस्रा अग्नयः स्युः ६

▼

⑤

>

▼ Bühler

6. In all (these three places) fires shall burn constantly. 4

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वेष्वेवाऽजस्रा अग्नयस्स्युः ॥६॥

टिप्पनी⑥

वेश्मन्यावसथे सभायामित्येतेषु सर्वेष्वेव स्थानेषु लौकिका अग्नयोऽजस्राः स्युः । अविच्छेदेन धार्याः ॥ ६॥

07 अग्निपूजा च नित्या

अग्निपूजा च नित्या यथा गृहमेधे ७

▼

⑤

>
▼ Bühler

7. And oblations must be offered in these fires daily, just as at the daily sacrifice of a householder. 5

▼ हरदत्त-टीका

सूत्रम्⑥

अग्निपूजा च नित्या यथा गृहमेधे ॥ ७॥

टिप्पनी⑥

तेषु चाग्निषु नित्यमग्निपूजा कार्या। यथा गृहमेधे औपासने सायंप्रातर्होम इत्यर्थः । मन्त्रावपि तावेव, द्रव्यमपि तदेव ॥ ७॥

08 आवसथे श्रोत्रियावराध्यानतिथीन्वासयेत्

आवसथे श्रोत्रियावराध्यानतिथीन्वासयेत् ८

▼

⑤

>
▼ Bühler

8. In the hall he shall put up his guests, at least those who are learned in the Vedas. 6

▼ हरदत्त-टीका

सूत्रम्⑥

आवसथे श्रोत्रियावरार्ध्यानतिथीन् वासयेत् ॥ ८॥

टिप्पनी⑥

आवसथाख्ये स्थाने अतिथीन् वासयेत् । ते विशेष्यन्ते श्रोत्रियावरार्ध्यानिति । अवरपर्यायोऽवरार्ध्यशब्दः । यदि सर्वान्वासयितुं न शक्नोति श्रोत्रियानपि तावद्वासयेदिति ॥ ८॥

09 तेषां यथागुणमावसथाः शय्यान्नपानञ्

तेषां यथागुणमावसथाः शय्यान्नपानं च विदेयम् ९

▼

⑤

>
▼ Bühler

9. Rooms, a couch, food and drink should be given to them according to their good qualities.

▼ हरदत्त-टीका

सूत्रम्⑥

तेषां यथागुणमावसथाः शय्याऽन्नपानं च विदेयम् ॥९॥

टिप्पनी⑥

तेषामतिथीनां यथागुणं विद्यावृत्तानुगुणमावसथादि विदेयं विशेषेण देयम् । आवसथा अपवरकादयः । शय्या खट्वादयः । अन्नमोदनादि। पान7 तक्रादि ॥९॥

१. तक्रसूपादि इति च. पु. तक्रादिसूपादि इति क. पु.

10 गुरूनमात्यांश्च नातिजीवेत्

गुरूनमात्यांश्च नातिजीवेत् १०

▼

⑤

>
▼ Bühler

10. Let him not live better than his Gurus or ministers. 8

▼ हरदत्त-टीका

सूत्रम्⑥

गुरूनमात्यांश्च नातिजीवेत् ॥१०॥

टिप्पनी⑥

गुरवः पित्रादयः । अमात्या मन्त्रिणः । तान्नाऽतिजीवेत् भक्ष्यभोज्याच्छादनादिषु तान्नाऽतिशयीत ॥ १० ॥

11 न चास्य विषये

न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां वावसीदेदभावाद्बुद्धिपूर्वं वा कश्चित् ११

▼

⑤

>
▼ Bühler

11. And in his realm no (Brāhmaṇa) should suffer hunger, sickness, cold, or heat, be it through want, or intentionally. 9

▼ हरदत्त-टीका

सूत्रम्⑥

न चास्य विषये क्षुधा रोगेण हिमातपाभ्यां वाऽवसीदेदभावाद्बुद्धिपूर्वं वा कश्चित् ॥११॥

टिप्पनी⑥

अस्य राज्ञो विषये राष्ट्रे क्षुधा आहाराभावेन बुभुक्षया रोगेण व्याधिना हिमेन नीहारेण वर्षादीनामप्युपलक्षणमेतत् । आतपः आदित्यरश्मितापः। एतैः प्रकारैरभावात् बुद्धिपूर्वं वा न कश्चिदब्राह्मणोऽप्यवसीदेत् अवसन्नो न स्यात् । राज्ञो हयमपराधो यदाहाराद्यभावेन कश्चिदवसन्नः

स्यात् । बुद्धिपूर्वं वेत्यत्रोदाहरणम् — यदा कश्चित् करमृणं वा दाप्यो भवति, तदा नाऽसौ हिमातपयोरुपनिवेशयितव्यः भोजनाद्वा निरोद्धव्यः। तथा कुर्वाणं राजा दण्डयेदिति ॥ ११ ॥

12 सभाया मध्ये ऽधिदेवनमुद्धत्या

सभाया मध्ये ऽधिदेवनमुद्धत्या ऽऽवोक्ष्या ऽऽक्षान् निवपेद् युग्मान् वैभीतकान्यथार्थान् १२

▼

⑤

>

▼ Bühler

12. In the midst of the assembly-house, (the superintendent of the house) shall raise a play-table and sprinkle it with water, turning his hand downwards, and place on it dice in even numbers, made of Vibhītaka (wood), as many as are wanted.

▼ हरदत्त-टीका

सूत्रम्⑥

सभाया मध्येऽधिदेवनमुद्धत्याऽवोक्ष्याऽक्षान्निवपेद्युग्मान् वैभीतकान् यथार्थान् ॥ १२ ॥

टिप्पनी⑥

पूर्वोक्तायाः सभाया मध्ये अधिदेवनं यस्योपरि कितवा अक्षैर्दीव्यन्ति तत्स्थानमधिदेवनम् । तत् पूर्वं काष्ठादिना उद्धन्ति उद्धत्यावोक्षति । अवोक्ष्य तत्राऽक्षान् युग्मसङ्ख्याकान्वैभीतकान् विभीतकवृक्षस्य विकारभूतान् यथार्थान् यावद्भिर्द्यूतं निर्वर्तते, तावतो निवपति । कः ? यस्तत्र राज्ञा नियुक्तः सभिको नाम ॥ १२॥

13 आर्याः शुचयः सत्यशीला

आर्याः शुचयः सत्यशीला दीवितारः स्युः १३

▼

⑤

>

▼ Bühler

13. Men of the first three castes, who are pure and truthful, may be allowed to play there. 10

▼ हरदत्त-टीका

सूत्रम्⑥

आर्याः शुचयस्सत्यशीला दीवितारस्स्युः ॥ १३॥

टिप्पनी⑥

आर्याः द्विजातयः । 11शुचयोऽर्थशुद्धाः । सत्यशीलास्सत्यवादिनः । एवंभूता एव पुरुषास्तत्र दीवितारः देवितारः स्युः। त एव तत्र दीव्येयुरित्यर्थः । ते च तत्र देवित्वा यथाभाषितं पणं सभिकाय दत्वा गच्छेयुः। स च राज्ञे तमायमहरहः प्रतिमासं प्रतिसंवत्सरं वा दद्यात् । स एव च स्थानान्तरे दीव्यतो दण्डयेत्, सभास्थाने च कलहकारान् । तत्र याज्ञवल्क्यः—
12 'ग्लहे शतिकवृद्धस्तु सभिकः पञ्चकं शतम् ।
गृह्णीयाद्धूर्तकितवादितराद्दशकं शतम् ॥
स सम्यक्पालितो दद्याद्राज्ञे भागं यथाकृतम् ।
जितमुद्ग्राहयेज्जैत्रं दद्यात्सत्यं वचः क्षमी ॥ इति ॥ १३॥

14 आयुधग्रहणन् नृत्तगीतवादित्राणीति राजाधीनेभ्योऽन्यत्र

आयुधग्रहणं नृत्तगीतवादित्राणीति राजाधीनेभ्योऽन्यत्र न विद्येरन् १४

▼

⑤

>

▼ Bühler

14. Assaults of arms, dancing, singing, music, and the like (performances) shall be held only (in the houses) of the king's servants. 13

▼ हरदत्त-टीका

सूत्रम्⑥

आयुधग्रहणे नृत्तगीतवादित्राणीति राजाधीनेभ्योऽन्यत्र न विद्येरन् ॥ १४ ॥

टिप्पनी⑥

आयुधग्रहणादीनि राजाधीनेभ्यो राजाश्रया ये पुरुषास्तेभ्योऽन्यत्र न विद्येरन् न भवेयुः । उत्सवादिष्वन्यत्रापि भवतीत्याचारः ॥ १४ ॥

15 क्षेमकृद्राजा यस्य विषये

क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते १५

▼

⑤

>

▼ Bühler

15. That king only takes care of the welfare of his subjects in whose dominions, be it in villages or forests, there is no danger from thieves. 14

▼ हरदत्त-टीका

सूत्रम्⑥

क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते ॥ १५ ॥

टिप्पनी⑥

यस्य राज्ञो विषये ग्रामेऽरण्ये च चोरभयं नास्ति स एव राजा क्षेमकृत् क्षेमङ्करः । न त्वन्यः शतं तुभ्यं शतं तुभ्यमिति ददानोऽपि ॥ १५ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने पञ्चविंशी काण्डिका ॥ २५ ॥

इति नवमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

4. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

5. Manu II, 35.↩

6. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
8. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩
9. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩
10. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

11. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

12. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

13. Manu II, 69; Yājñ. I, 15.↩

14. Manu II, 144.↩

१०①

२६①

01 भृत्यानामनुपरोधेन क्षेत्रं वित्तञ्④

भृत्यानामनुपरोधेन क्षेत्रं वित्तं च दददब्राह्मणेभ्यो यथार्हमनन्तांल् लोकाभिजयति १

▼

⑤

>
▼ Bühler

1. A (king) who, without detriment to his servants, gives land and money to Brāhmaṇas according to their deserts gains endless worlds. 1

▼ हरदत्त-टीका

सूत्रम्⑥

भृत्यानामनुपरोधेन क्षेत्रं वित्तं च दददब्राह्मणेभ्यो यथार्हमनन्तालँल्लोकानभिजयति ॥ १॥

टिप्पनी⑥

भृत्यानामनुपरोधेन भृत्यवर्गस्य यथोपरोधो न भवति तथा ब्राह्मणेभ्यो यथार्हं विद्यावृत्ताद्यनुरूपं क्षेत्रं वित्तं च दद्यात् । एवं दददनन्तालँल्लोकानभिजयति ॥१॥

02 ब्राह्मणस्वान्यपजिगीषमाणो राजा यो

ब्राह्मणस्वान्यपजिगीषमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति २

▼

⑤

>

▼ Bühler

2. They say (that) a king, who is slain in attempting to recover the property of Brāhmaṇas, (performs) a sacrifice where his body takes the place of the sacrificial post, and at which an unlimited fee is given. 2

▼ हरदत्त-टीका

सूत्रम्⑥

ब्राह्मणस्वान्यपजिगीषमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति ॥२॥

टिप्पनी⑥

ब्राह्मणस्वानि चोरादिभिरपहृतानि अपजिगीषमाणः ब्राह्मणेभ्यो दानायापजित्य ग्रहीतुमिच्छन् यो राजा युद्धे चोरैर्हन्यते तमात्मयूपोऽनन्तदक्षिणो यज्ञ इत्याहुर्धर्मज्ञाः । सङ्ग्रामो यज्ञः। तस्य आत्मा यूपस्थानीयः आत्मेति शरीरमाह । अन्तरात्मा तु पशुस्थानीयः । प्रत्यानिनीषितं तु द्रव्यं दक्षिणा । सूत्रे तु 'तं यज्ञ इत्याहुरि'ति गौणो वादः ॥२॥

03 एतेनान्ये शूरा व्याख्याताः

एतेनान्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजः ३

▼

⑤

>
▼ Bühler

3. Hereby have been declared (the rewards of) other heroes, who fall fighting for a (worthy) cause. 3

▼ हरदत्त-टीका

सूत्रम्⑥

एतेनाऽन्ये शूरा व्याख्याताः प्रयोजने युध्यमानास्तनुत्यजः ॥३॥

टिप्पनी⑥

प्रयोजनं चोरादिभिरपहृतानां ब्राह्मणस्वानां प्रत्यानयनादि, तदर्थं युध्यमाना ये शूरास्तनुत्यजो भवन्ति तेऽप्येतेन राज्ञा व्याख्याता आत्मयूपा यज्ञा अनन्तदक्षिणा इति ॥ ३ ॥

04 ग्रामेषु नगरेषु चार्यान्शुचीन्सत्यशीलान्प्रजागुप्तये

ग्रामेषु नगरेषु चार्यान्शुचीन्सत्यशीलान्प्रजागुप्तये निदध्यात् ४

▼

⑤

>
▼ Bühler

4. He shall appoint men of the first three castes, who are pure and truthful, over villages and towns for the protection of the

people. 4

▼ हरदत्त-टीका

सूत्रम्⑥

ग्रामेषु नगरेषु चाऽऽर्याञ्छुचीन् सत्यशीलान् प्रजागुप्तये निदध्यात् ॥४॥

टिप्पनी⑥

आर्याञ्छुचीन् सत्यशीलानिति व्याख्यातम् । एवंभूतान् पुरुषानू ग्रामेषु नगरेषु च प्रजानां रक्षणार्थं निदध्यात् नियुञ्जति ॥ ४॥

05 तेषाम् पुरुषास्तथागुणा एव

तेषां पुरुषास्तथागुणा एव स्युः ५

▼

⑤

>

▼ Bühler

5. Their servants shall possess the same qualities.

▼ हरदत्त-टीका

सूत्रम्⑥

तेषां पुरुषास्तथागुणा एव स्युः॥ ५॥

टिप्पनी⑥

तेषां नियुक्तानां ये पुरुषा नियोज्याः तेऽपि तथागुणा आर्यादिगुणा एव स्युः ॥५॥

06 सर्वतो योजनन् नगरन्

सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यम् ६

▼

⑤

>
▼ Bühler

6. They must protect a town from thieves in every direction to the distance of one yojana. 5

▼ हरदत्त-टीका

सूत्रम्⑥

सर्वतो योजनं नगरं तस्करेभ्यो रक्ष्यम् ॥ ६॥

टिप्पनी⑥

सर्वतः सर्वासु दिक्षु योजनमात्रं नगरं तस्करेभ्यो रक्षणीयम् । रक्ष्यन्नित्यपपाठः ॥६॥

07 क्रोशो ग्रामेभ्यः

क्रोशो ग्रामेभ्यः ७

▼

⑤

>
▼ Bühler

7. (They must protect the country to the distance of) one krośa from each village. 6

▼ हरदत्त-टीका

सूत्रम्⑥

क्रोशो ग्रामेभ्यः ॥७॥

टिप्पनी⑥

ग्रामेभ्यस्तु सर्वासु दिक्षु क्रोशो रक्ष्यः। ग्रामेभ्यः इति7 'यतश्चाऽध्वकालपरिमाणं तत्र पञ्चमी वक्तव्ये'ति पञ्चमी ॥ ७॥

08 तत्र यन्मुष्यते तैस्तत्प्रतिदाप्यम्

तत्र यन्मुष्यते तैस्तत्प्रतिदाप्यम् ८

▼

⑤

>
▼ Bühler

8. They must be made to repay what is stolen within these (boundaries). 8

▼ हरदत्त-टीका

सूत्रम्⑥

तत्र यन्मुष्यते तैस्तत्प्रतिदाप्यम् ॥ ८ ॥

टिप्पनी⑥

तत्र योजनमाने क्रोशमात्रे वा यन्मुष्यते चोर्यते ते नियुक्ताः स्वामिभ्यस्तत्प्रतिदद्यू राज्ञा तैस्तत् प्रतिदाप्यम् राजा तैः प्रतिदापयेदिति प्रायेण दन्त्योष्ठयं वकारं पठन्ति ॥ ८॥

09 धार्म्यं शुल्कमवहारयेत्

धार्म्यं शुल्कमवहारयेत् ९

▼

⑤

>

▼ Bühler

9. The (king) shall make them collect the lawful taxes (śulka). 9

▼ हरदत्त-टीका

सूत्रम्⑥

धार्म्यं शुल्कमवहारयेत् ॥ ९ ॥

टिप्पनी⑥

तत्र गौतमः—
10'विंशतिभागश्शुल्कः पण्ये' इति । यद्वणिग्भिर्विक्रीयते हिङ्ग्वादि, तस्य विंशतितमं भागं राजा गृह्णीयात् । तस्य शुल्क इति संज्ञा। एष धार्म्यः धर्म्यश्शुल्कः। तमधिकृतैरेवाऽवहारयेत् ग्राहयेदिति। मूलादिषु विशेषस्तेनैवोक्तः—
11 मूलफलपुष्पौषधिमधुमांसतृणेन्धनानां षाष्टिक्य'मिति ॥ ९ ॥

10 अकरः श्रोत्रियः

अकरः श्रोत्रियः १०

▼

⑤

>
▼ Bühler

10. A learned Brāhmaṇa is free from taxes, 12

▼ हरदत्त-टीका

सूत्रम्⑥

अकरः श्रोत्रियः ॥ १० ॥

टिप्पनी⑥

श्रोत्रियः करं न दाप्यः । अन्ये दाप्याः ॥१०॥

11 सर्ववर्णानाञ् च स्त्रियः

सर्ववर्णानां च स्त्रियः ११

▼

⑤

>
▼ Bühler

11. And the women of all castes, 13

▼ हरदत्त-टीका

सूत्रम्⑥

सर्ववर्णानां च स्त्रियः ॥ ११ ॥

टिप्पनी⑥

अकराः । वर्णग्रहणात् प्रतिलोमादिस्त्रियो दाप्याः ॥११॥

12 कुमाराश्च प्राग् व्यञ्जनेभ्यः

कुमाराश्च प्राग् व्यञ्जनेभ्यः १२

▼

⑤

>
▼ Bühler

12. And male children before the marks (of puberty appear),

▼ हरदत्त-टीका

सूत्रम्⑥

कुमाराश्च प्राक् व्यञ्जनेभ्यः ॥ १२ ॥

टिप्पनी⑥

व्यञ्जनानि श्मश्र्वादीनि । यावत्तानि नोत्पद्यन्ते तावदकराः ॥ १२ ॥

13 ये च विद्यार्थी

ये च विद्यार्थी वसन्ति १३

▼

⑤

>
▼ Bühler

13. And those who live (with a teacher) in order to study,

▼ हरदत्त-टीका

सूत्रम्⑥

ये च विद्यार्था वसन्ति ॥ १३ ॥

टिप्पनी⑥

विद्यामुद्दिश्य ये गुरुषु वसन्ति ते जातव्यञ्जना अप्यसमाप्तवेदा अकराः ॥ १३ ॥

14 तपस्विनश्च ये धर्मपराः

तपस्विनश्च ये धर्मपराः १४

▼

⑤

>
▼ Bühler

14. And those who perform austerities, being intent on fulfilling the sacred law, 14

▼ हरदत्त-टीका

सूत्रम्⑥

तपस्विनश्च ये धर्मपराः ॥ १४ ॥

टिप्पनी⑥

तपस्विनः कृच्छ्रचान्द्रायणादिप्रवृत्ताः। धर्मपरा , अफलाकाङ्क्षिणः नित्यनैमित्तिकधर्मनिरताः। धर्मपरा इति किम् ? ये अभिचारकामा मन्त्रासिद्धये तपस्तप्यन्ते ते अकरा मा भूवन्निति ॥१४॥

15 शूद्रश्च पादावनेक्ता

शूद्रश्च पादावनेक्ता *(= पादधावनजीवी)* १५

▼

⑤

>

▼ Bühler

15. And a Śūdra who lives by washing the feet,

▼ हरदत्त-टीका

सूत्रम्⑥

शुद्रश्च पादावनेक्ता ॥ १५ ॥

टिप्पनी⑥

यस्त्रैवर्णिकानां पादावनेक्ता स शूद्रोऽप्यकरः ॥१५॥

16 अन्धमूकबधिररोगविष्टाश्च

अन्धमूकबधिररोगविष्टाश्च १६

▼

⑤

>

▼ Bühler

16. Also blind, dumb, deaf, and diseased persons (as long as their infirmities last),

▼ हरदत्त-टीका

सूत्रम्⑥

अन्धमूकबधिररोगाविष्टाश्च ॥१६॥

टिप्पनी⑥

एतेऽप्यकराः यावदान्ध्यादि ॥ १६ ॥

17 ये व्यर्था द्रव्यपरिग्रहैः

ये व्यर्था *(=मुक्ताश् शास्त्रैः)* द्रव्यपरिग्रहैः १७

▼

⑤

>

▼ Bühler

17. And those to whom the acquisition of property is forbidden (as Sannyāsins).

▼ हरदत्त-टीका

सूत्रम्⑥

ये व्यर्था द्रव्यपरिग्रहैः ॥ १७॥

टिप्पनी⑥

ये च परिव्राजकादयः द्रव्यपरिग्रहैर्व्यर्था निष्प्रयोजनाः शास्त्रतो येषां द्रव्यपरिग्रहः प्रतिषिद्धः तेऽप्यकराः।
तथा च वसिष्ठः—
15"अकरः श्रोत्रियो राजा पुमाननाथः प्रव्रजितो बालवृद्धतरुणप्रशान्ता" इति ॥ १७॥

18 अबुद्धिपूर्वमलङ्कृतो युवा परदारमनुप्रविशन्कुमारीं

अबुद्धिपूर्वमलंकृतो युवा परदारमनुप्रविशन्कुमारीं वा वाचा बाध्यः १८

▼

⑤

>
▼ Bühler

18. A young man who, decked with ornaments, enters unintentionally (a place where) a married woman or a (marriageable) damsel (sits), must be reprimanded. 16

▼ हरदत्त-टीका

सूत्रम्⑥

अबुद्धिपूर्वमलङ्कृतो युवा परदारमनुप्रविशन् कुमारीं वा वाचा बाध्यः ॥१८॥

टिप्पनी⑥

यत्र परदारा आसते कुमारी वा पतिंवरा, तत्र युवा अलङ्कृतः अबुद्धिपूर्वमज्ञानादनुप्रविशन् वाचा बाध्यः-अत्रेयमास्ते,माऽत्र प्रविशेति ॥१८॥

19 बुद्धिपूर्वन् तु दुष्टभावो

बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः १९

▼

⑤

>
▼ Bühler

19. But he does it intentionally with a bad purpose, he must be fined. 17

▼ हरदत्त-टीका

सूत्रम्⑥

बुद्धिपूर्वं तु दुष्टभावो दण्ड्यः ॥ १९ ॥

टिप्पनी⑥

यस्तु जानन्नेव दुष्टभावः प्रलोभनार्थी प्रविशति स दण्ड्यो द्रव्यानुरूपमपराधानुरूपं च । दुष्टभावग्रहणमाचार्यादिप्रेषितस्य प्रवेशे दण्डो मा भूदिति ॥१९॥

20 सन्निपाते वृत्ते शिश्नच्छेदनं

संनिपाते वृत्ते शिश्नच्छेदनं सवृषणस्य २०

▼

⑤

>

▼ Bühler

20. If he has actually committed adultery, his organ shall be cut off together with the testicles.

▼ हरदत्त-टीका

सूत्रम्⑥

सन्निपाते वृत्ते शिश्नच्छेदनं सवृषणस्य ॥ २० ॥

टिप्पनी⑥

सन्निपातो मैथुनं, तस्मिन् वृत्ते शिश्नच्छेदनं दण्डः । सवृषणस्येत्युपसर्जनस्यापि शिश्नस्य विशेषणम् । सवृषणस्य शिश्नस्य च्छेदनमिति ॥२०॥

21 कुमार्यान् तु स्वान्यादाय

कुमार्यां तु स्वान्यादाय नाश्यः २१

▼

⑤

>

▼ Bühler

21. But (if he has had intercourse) with a (marriageable) girl, his property shall be confiscated and he shall be banished.

▼ हरदत्त-टीका

सूत्रम्⑥

कुमार्यां तु स्वान्यादाय नाश्यः ॥ २१ ॥

टिप्पनी⑥

कुमार्यां तु सन्निपाते वृत्ते सर्वस्वहरणं कृत्वा देशान्निर्वास्यः, न शिश्नच्छेदः ॥ २१ ॥

22 अथ भृत्ये राज्ञा

अथ *(परदार-कुमार्यौ)* भृत्ये राज्ञा २२

▼

⑤

>

▼ Bühler

22. Afterwards the king must support (such women and damsels),

▼ हरदत्त-टीका

सूत्रम्⑥

अथ भृत्ये राज्ञा ॥ २२ ॥

टिप्पनी⑥

अथ सन्निपानात्प्रभृति ते परदारकुमार्यौ राज्ञा भृत्ये ग्रासाच्छादनप्रदानेन भर्तव्ये ॥ २२ ॥

23 रक्ष्ये चात ऊर्ध्वम्

रक्ष्ये चात ऊर्ध्वं मैथुनात् २३

▼

⑤

>
▼ Bühler

23. And protect them from defilement.

▼ हरदत्त-टीका

सूत्रम्⑥

रक्ष्ये चाऽत ऊर्ध्वं मैथुनात् ॥ २३ ॥

टिप्पनी⑥

अतः प्रथमात् सन्निपातात् ऊर्ध्वं मैथुनाच्च रक्ष्ये यथा पुनः मैथुनं नाचरतस्तथा कार्ये ॥ २३ ॥

24 निर्वेषाभ्युपाये तु स्वामिभ्योऽवसृजेत्

निर्वेषाभ्युपाये तु स्वामिभ्योऽवसृजेत् २४

▼

⑤

>
▼ Bühler

24. If they agree to undergo the (prescribed) penance, he shall make them over to their (lawful) guardians. 18

▼ हरदत्त-टीका

सूत्रम्⑥

निर्वेषाभ्युपाये तु स्वामिभ्योऽवसृजेत् ॥ २४ ॥

टिप्पनी⑥

यदि ते एवं निरुद्धे निर्वेषणमभ्युपेतः अभ्युपगच्छत्तः तदा निर्वेषाभ्युपाये तु स्वामिहस्ते अवसृजेत् दद्यात् । परदारं भर्त्रे श्वशुराय वा, कुमारीं पित्रे भ्रात्रे वा। अनभ्युपगमे तु प्रायश्चित्तस्य यावज्जीवं निरोधः ॥ २१ ॥

इत्यापस्तम्बधर्मसूत्रे द्वितीयप्रश्ने षड्विंशी कण्डिका ॥ २६ ॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

3. Manu II, 35.↩

4. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

5. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

6. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in

order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

9. Manu II, 69; Yājñ. I, 15.↩
10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
12. Manu II, 144.↩
13. Manu II, 146-148.↩
14. 'Because it procures heavenly bliss and final liberation.'--Haradatta.↩
15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
16. Manu II, 147.↩
17. Yājñ. I, 14; Manu II, 36; Āśvakāyana Gṛ. Sū. I, 19, 1, 4: Weber, Ind. Stud. X, 20 seq.↩
18. Manu II, 37.↩

२७①

01 चरिते यथापुरं, धर्माद्धि④

चरिते यथापुरं, *(यतः)* धर्माद्धि संबन्धः १

▼

⑤

>

▼ Bühler

1. If (adulteresses) have performed (the prescribed penance), they are to be treated as before (their fault). For the connection (of husband and wife) takes place through the law.

▼ हरदत्त-टीका

सूत्रम्⑥

चरिते यथापुरं धर्माद्धि सम्बन्धः ॥१॥

टिप्पनी⑥

चरिते तु निर्वेषे यथापुरं यथापूर्वं धर्मात् , तृतीयार्थे पञ्चमी । धर्मेण सम्बन्धो भवति । हिशब्दो हेतौ । यस्मादेवं तम्मात् अवश्यं प्रायश्चित्तं कारयितव्ये । ततो यज्ञविवाहादौ न कश्चिद्दोष इति ॥ १॥

02 सगोत्रस्थानीयान् न परेभ्यः

सगोत्रस्थानीयां न परेभ्यः समाचक्षीत २

▼

⑤

>
▼ Bühler

2. (A husband) shall not make over his (wife), who occupies the position of a 'gentilis,' to others (than to his 'gentiles'), in order to cause children to be begot for himself. 1

▼ हरदत्त-टीका

सूत्रम्⑥

सगोत्रस्थानीयां न परेभ्यस्समाचक्षीत ॥ २॥

प्रस्तावः⑥

परदारप्रसङ्गादुच्यते—

टिप्पनी⑥

योऽनपत्यः आत्मनश्शक्त्यभावं निश्चित्य क्षेत्रजं पुत्रमिच्छन् भार्यां 2परत्र नियुङ्क्ते, मृते वा तस्मिन् तत्पित्रादयस्सन्तानकाङ्क्षिणः, तद्विषयमेतत । कुलान्तरप्रविष्टा सगोत्रस्थानीया। सा हि पूर्वं पितृगोत्रा सती3 भर्तृगोत्रधर्मैरधिक्रियेत । अतः भर्तृपक्ष्याणां सगोत्रस्थानीया भवति । भर्ता तु

साक्षात्सगोत्रः। तां सगोत्रस्थानीयां न परेभ्योऽसगोत्रेभ्यस्समाचक्षीत-इयमनपत्या, अस्यामपत्यमुत्पाद्यतामिति । सगोत्रायैव तु समाचक्षीत, तत्रापि देवराय, तदभाव4 सपिण्डेभ्यः॥

03 कुलाय हि स्त्री

कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ३

▼

⑤

>
▼ Bühler

3. For they declare, that a bride is given to the family (of her husband, and not to the husband alone).

▼ हरदत्त-टीका

सूत्रम्⑥

कुलाय हि स्त्री प्रदीयत इत्युपदिशन्ति ॥३॥

प्रस्तावः⑥

कः पुनस्सगोत्रस्य विशेषः ? तमाह—

टिप्पनी⑥

हि यस्मात् स्त्री कन्या प्रदीयमाना कुलायैव प्रदीयत इत्युपदिशन्ति धर्मज्ञाः । तस्मात् सगोत्रायैव समाचक्षीततति5 ॥३॥

04 तदिन्द्रि यदौर्बल्याद्विप्रतिपन्नम्

तदिन्द्रि यदौर्बल्याद्विप्रतिपन्नम् ४

▼

⑤

>
▼ Bühler

4. That is (at present) forbidden on account of the weakness of (men's) senses. 6

▼ हरदत्त-टीका

सूत्रम्⑥

तदिन्द्रियदौर्बल्याद्विप्रतिपन्नम् ॥ ४ ॥

प्रस्तावः⑥

तमिमं नियोगं दूषयति—

टिप्पनी⑥

यद्यप्येवं पूर्वे कृतवन्तः, तथाऽपि तदद्यत्वे विप्रतिपन्नं विप्रतिषिद्धम् । कुतः ? इन्द्रियदौर्बल्यात् । दुर्बलेन्द्रिया ह्यद्यत्वे मनुष्याः। ततश्च शास्त्रव्याजेनापि भर्तृव्यतिक्रमेऽतिप्रसङ्गस्स्यादिति ॥ ४॥

05 अविशिष्टं हि परत्वम्

अविशिष्टं हि परत्वं पाणेः ५

▼

⑤

>

▼ Bühler

5. The hand (of a gentilis is considered in law to be) that of a stranger, and so is (that of any other person except the husband).

▼ हरदत्त-टीका

सूत्रम्⑥

अविशिष्टं हि परत्वं पाणेः ॥ ५ ॥

प्रस्तावः⑥

सगोत्रविषयेऽपि यो विशेषस्सोऽपि नास्तीत्याह—

टिप्पनी⑥

येन पाणिना पूर्वमग्निसाक्षिकं पाणिर्गृहीतः कन्यायाः, तस्मात् पाणेरन्यो भवति सगोत्रस्यापि पाणिः । यस्मादेवं पाणेः परत्वमविशिष्टं समानम् ? तस्मादविशेष इति । अविशिष्टमित्यपपाठः ॥ ५ ॥

06 तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः

तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ६

▼

⑤

>
▼ Bühler

6. If the (marriage vow) is transgressed, both (husband and wife) certainly go to hell.

▼ हरदत्त-टीका

सूत्रम्⑥

तद्व्यतिक्रमे खलु पुनरुभयोर्नरकः ॥६॥

प्रस्तावः⑥

पाणिरन्यो भवतु, को दोषः ?

टिप्पनी⑥

तस्य पाणेर्व्यतिक्रमे उभयोर्दम्पत्योः नरको भवति । खलु पुनरिति प्रसिद्धिद्योतकौ निपातौ । अतः पत्याऽपि न स पाणिस्त्याज्यः यः पूर्वं गृहीतः । भार्ययापि न स पाणिस्त्याज्यो येन पूर्वमात्मानः पाणिर्गृहीतः॥६॥

07 नियमारम्भणो हि वर्षीयान्

नियमारम्भणो हि वर्षीयान् *(=गरीयान्)* अभ्युदय एवमारम्भणादपत्यात् ७

▼

⑤

>
▼ Bühler

7. The reward (in the next world) resulting from obeying the restrictions of the law is preferable to offspring obtained in this manner (by means of Niyoga).

▼ हरदत्त-टीका

सूत्रम्⑥

नियमारम्भणो हि वर्षीयानभ्युदय एवमारम्भणादपत्यात् ॥ ७॥

टिप्पनी⑥

आरभ्यतऽनेनेत्यारम्भणः योऽयं दम्पत्योः परस्परनियमः, स आरम्भणो यस्य स नियमारम्भणः । एवंभूतो योऽभ्युदयस्स एवं वर्षीयान् । वृद्धतरः । कस्मात् वर्षीयान् ? एवमुक्तप्रकारेण नियोगलक्षणेन यदपत्यमारभ्यते तस्मादेवमारम्भणादपत्याद्वर्षीयानिति । अपत्यादिति पाठः । आपत्यादिति प्रायेण पठन्ति ॥ ७॥

08 नाश्य आर्यः शूद्रायाम्

नाश्य आर्यः शूद्रायाम् ८

▼

⑤

>
▼ Bühler

8. A man of one of the first three castes (who commits adultery) with a woman of the Śūdra caste shall be banished.

▼ हरदत्त-टीका

सूत्रम्⑥

नाश्य आर्यश्शूद्रायाम् ॥ ८॥

टिप्पनी⑥

आर्यस्त्रैवर्णिकः, शूद्रायां परभार्यायां प्रसक्तो राज्ञा राष्ट्रान्नाश्यः निर्वास्यः ॥८॥

09 वध्यः शूद्र आर्यायाम्

वध्यः शूद्र आर्यायाम् ९

▼

⑤

>

▼ Bühler

9. A Śūdra (who commits adultery) with a woman of one of the first three castes shall suffer capital punishment. 7

▼ हरदत्त-टीका

सूत्रम्⑥

वध्यश्शुद्र आर्यायाम् ॥ ९ ॥

टिप्पनी⑥

शूद्रस्तु त्रैवर्णिकस्त्रियां प्रसक्तो वध्यः । एतच्च योऽन्तःपुरादिष्वधिकृतो रक्षकस्सन् स्वयं गच्छति, तस्य भवति । अन्यस्य तु पूर्वोक्तं शिश्नच्छेदनमेव । तथा च शूद्राधिकारे गौतमः8— 'आर्यस्त्र्यभिगमने लिङ्गोद्धारः स्वहरणं च । गोप्ता चेद्वधोऽधिक' इति । याज्ञवल्क्येन प्रातिलोम्येन गमनमात्रे वध उक्तः —

"9सजातावुत्तमो दण्डः आनुलोम्ये तु मध्यमः ।
प्रातिलोम्ये वधः10 पुंसां स्त्रीणां नासादिकृन्तनम् ॥ इति ।

सोऽनुबन्धाभ्यासाद्यपेक्षो द्रष्टव्यः । तथा 'नाश्य आर्यश्शूद्रायामि' त्याचार्यवचनमप्यभ्यासापेक्षम्, ब्राह्मणादेः क्रमविवाहे या शूद्रा, तद्विषयं वा द्रष्टव्यम् ॥९॥

10 दारञ् चास्य कर्शयेत्

दारं चास्य कर्शयेत् १०

▼

⑤

>
▼ Bühler

10. And he shall emaciate a woman who has committed adultery with a (Śūdra, by making her undergo penances and fasts, in case she had no child).

▼ हरदत्त-टीका

सूत्रम्⑥

दारं चाऽस्य कर्शयेत् ॥१०॥

टिप्पनी⑥

अस्य शूद्रस्य या दारभूता तेन भुक्ता त्रैवर्णिकस्त्री तां च कर्शयेत व्रतनियमोपवासैः । या प्रजाता न भवति तद्विषयमेतत् ।
11 "ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण सङ्गताः।
अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः ॥" इति स्मरणात् ॥ १०॥

11 सवर्णायामन्यपूर्वायां सकृत्सन्निपाते पादः

सवर्णायामन्यपूर्वायां सकृत्संनिपाते पादः पततीत्युपदिशन्ति *(अतः पतितप्रायश्चित्तस्य पादस् तस्मै)* ११

▼

⑤

>
▼ Bühler

11. They declare, that (a Brāhmaṇa) who has 12 once committed adultery with a married woman of equal class, she perform one-fourth of the penance prescribed for an outcast.

▼ हरदत्त-टीका

सूत्रम्⑥

सवर्णायामन्यपूर्वायां सकृत्सन्निपाते पादः पततीत्युपदिशन्ति ॥ ११ ॥

टिप्पनी⑥

अन्यः पूर्वः पतिः यस्यास्सा अन्यपूर्वा परभार्या, तस्यां सवर्णायां सकृद्गमने पादः पतति । पतितस्य द्वादशवार्षिकं प्रायश्चित्तम् । तस्य तुर्योऽशस्त्रीणि वर्षाणि प्राकृतं ब्रह्मचर्यमस्य प्रायश्चित्तम् । एतच्च श्रोत्रियभार्यायामृतुकाले कामतः प्रथम13दूषकस्य । तत्र गौतमः14-'द्वे परदारे । त्रीणि श्रोत्रियस्ये'ति ॥ ११ ॥

12 एवमभ्यासे पादः पादः

एवमभ्यासे पादः पादः १२

▼

⑤

>

▼ Bühler

12. In like manner for every repetition (of the crime), one-fourth of the penance (must be added).

▼ हरदत्त-टीका

सूत्रम्⑥

एवमभ्यासे पादः पादः ॥ १२ ॥

टिप्पनी⑥

एवमभ्यासे प्रत्यभ्यासं पादः पादः पतति ॥ १२॥

13 चतुर्थे सर्वम्

चतुर्थे सर्वम् १३

▼

⑤

>
▼ Bühler

13. (If the offence be committed) for the fourth time, the whole (penance of twelve years must be performed).

▼ हरदत्त-टीका

सूत्रम्⑥

चतुर्थे सर्वम् ॥ १३ ॥

टिप्पनी⑥

अतः- चतुर्थे सन्निपाते सर्वमेव पतति । ततश्च पूर्णद्वादशवार्षिकं कर्तव्यम् । तृतीयं नव वर्षाणि । द्वितीये षड्वर्षाणि । एतच प्रतियोगं स्त्रीभेदेन प्रथमदूषकस्य । एकस्यामेव त्वभ्यासे कल्प्यम् । तत्र—
15 यत् पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् , इति स्मरणात् स्त्रिया अपि प्रतियोगं पादः पादः पतति । तदनुरोधेन कल्प्यम् ॥ १३ ॥

14 जिह्वाच्छेदनं शूद्र स्यार्यन्

जिह्वाच्छेदनं शूद्र स्यार्यं धार्मिकमाक्रोशतः १४

▼

⑤

>
▼ Bühler

14. The tongue of a Śūdra who speaks evil of a virtuous person, belonging to one of the first three castes, shall be cut out.

▼ हरदत्त-टीका

सूत्रम्⑥

जिह्वाच्छेदनं शुद्रस्याऽऽर्यं धार्मिकमाक्रोशतः ॥१४॥

टिप्पनी⑥

शूद्रो द्विजातीनामन्यतमं धार्मिके16स्वकर्मस्थं यद्याक्रोशति निन्दति गर्हते, तदा तस्य जिह्वा छेत्तव्येति । मनुस्तु सामान्येनाह—
17 येनाङ्गेनावरो वर्णो ब्राह्मणस्याऽपराध्नुयात् ।
तदा तस्य छेत्तव्यं तन्मनोरनुशासनम् इति ॥

गौतमस्तु—18 'शूद्रो द्विजातीनतिसन्धायाऽभिहत्य च वाग्दण्डपारुष्याभ्यामङ्गं मोच्यो येनोपहन्या'दिति ॥१४॥

16 वाचि पथि शय्यायामासन

वाचि पथि शय्यायाम् आसन इति समीभवतो दण्डताडनम् *(शूद्रस्य)*१५

पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः १६

▼

⑤

>
▼ Bühler

15. A Śūdra who assumes a position equal (to that of a member of one of the first three castes), in conversation, on the road, on a couch, in sitting (and on similar occasions), shall be flogged. 19

▼ हरदत्त-टीका

सूत्रम्⑥

वाचि पथि शय्यायामासन इति समीभवतो दण्डताडनम् ॥ १५ ॥

टिप्पनी⑥

यस्तु शुद्रो वागादिष्वार्यैस्समीभवति, न तु न्यग्भूतः, तस्य दण्डेन ताडनं कर्तव्यम् । स दण्डेन ताडयितव्यः । अयमस्य दण्डः ॥ १५ ॥

16 पुरुषवधे स्तेये

पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः १६

▼

⑤

>

▼ Bühler

16. In case (a Śūdra) commits homicide or theft, appropriates land (or commits similar heinous crimes), his property shall be confiscated and he himself shall suffer capital punishment.

▼ हरदत्त-टीका

सूत्रम्⑥

पुरुषवधे स्तेये भूम्यादान इति स्वान्यादाय वध्यः ॥१६॥

टिप्पनी⑥

भूम्यादानं परक्षेत्रस्य बलात्स्वीकारः, पुरुषवधादिषु निमित्तेषु शूद्रस्सर्वस्वहरणं कृत्वा पश्चाद्वध्यः मारयितव्यः ॥ १६ ॥

17 चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य

चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य १७

▼

⑤

>

▼ Bühler

17. But if these (offences be committed) by a Brāhmaṇa, he shall be made blind (by tying a cloth over his eyes). 20

▼ हरदत्त-टीका

सूत्रम्⑥

चक्षुनिरोधस्त्वेतेषु ब्राह्मणस्य ॥ १७ ॥

टिप्पनी⑥

ब्राह्मणस्य त्वेतेषु निमित्तेषु चक्षुषो निरोधः कर्तव्यः । पट्टबन्धादिना चक्षुषी निरोद्धव्ये, यथा यावज्जीवं न पश्यति । न तूत्पाटयितव्ये 21'न शारीरो ब्राह्मणदण्डः। अक्षतो ब्राह्मणो व्रजे'दिति स्मरणात् । 'चक्षुनिरोध' इति रेफलोपश्छान्दसः ॥ १७ ॥

18 नियमातिक्रमणमन्यं वा रहसि

नियमातिक्रमणमन्यं वा रहसि बन्धयेत् १८

▼

⑤

>

▼ Bühler

18. He shall keep in secret confinement him who violates the rules (of his caste or order), or any other sinner,

▼ हरदत्त-टीका

सूत्रम्⑥

नियमातिक्रमिणमन्यं वा रहसि बन्धयेत् ॥१८॥

टिप्पनी⑥

यो वर्णाश्रमप्रयुक्तानियमानतिक्रामति तं नियमातिक्रमिणमन्यं वा प्रतिषिद्धानां कर्तारं रहसि बन्धयेत् निगलितं निरुन्ध्यात् ॥ १८ ॥

19 आ समापत्तेः

आ समापत्तेः १९

▼

⑤

>
▼ Bühler

until (he promises) amendment.

▼ हरदत्त-टीका

सूत्रम्⑥

आसमापत्तेः ॥ १९॥

टिप्पनी⑥

यावदसौ नियमान् प्रतिपत्स्ये प्रतिषिद्धेभ्यो निवर्तिष्य इति ब्रूयात् ॥ १९ ॥

20 असमापत्तौ नाश्यः

असमापत्तौ नाश्यः २०

▼

⑤

>
▼ Bühler

19. If he does not amend, he shall be banished.

▼ हरदत्त-टीका

सूत्रम्⑥

असमापत्तौ नाश्यः ॥२०॥

टिप्पनी⑥

यद्यसौ दीर्घकालं निरुद्धोऽपि न समापद्येत, ततो नाश्यः निर्वास्यः ॥२०॥

21 आचार्य ऋत्विक् स्नातको

आचार्य, ऋत्विक्, स्नातको, राजेति त्राणं *(=दण्डन-ह्रासनम् "अहं वारयामीमम्" इति)* स्युर् - अन्यत्र वध्यात् २१

▼

⑤

>
▼ Bühler

20. A spiritual teacher, an officiating priest, a 22 Snātaka, and a prince shall be able to protect (a criminal from punishment by their intercession), except in case of a capital offence.

▼ हरदत्त-टीका

सूत्रम्⑥

आचार्य ऋत्विक्स्नातको राजेति त्राणं स्युरन्यत्र वध्यात् ॥ २१ ॥

टिप्पनी⑥

यदि दण्डे प्रवृत्तं राजानम् **आचार्यो** ब्रूयात- "अहमेनम् अतः परं वारयिष्यामि मुच्यताम् अयम्" इति,
अतोऽङ्गदण्डे प्राप्ते ऽर्थदण्डम्,
अर्थदण्डे प्राते ताडनम् ,
ताडने प्राप्ते धिग्-दण्डम्
इति कृत्वा तद्-वशे विसृजेत् ।

एवम् ऋत्विजि । **ऋत्विग्**-आचार्यौ राज्ञस् स्व-भूतौ न दण्ड्यस्य ।
स्नातको विद्या-व्रताभ्याम् ।
राजा अनन्तरादिः ।

सर्व एते राज्ञस् सम्मान्याः ।
अतस् ते दण्ड्यस्य त्राणं स्युः ।
उक्तेन प्रकारेण रक्षका भवेयुः । नान्यः कश्चित् ।

तेऽप्य् **अन्यत्र वध्यात्** यस्य वधानुगुणो ऽपराधः, न तस्याऽचार्यादयो ऽपि त्राणम् ; हन्तव्य एव स इति ॥ २१ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने सप्तविंशी कण्डिका ॥ २७ ॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ हरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने दशमः पटलः ॥ १०॥

इति दशमः पटलः

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
↩
2. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
3. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
4. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
6. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
7. Manu II, 35.↩
8. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
9. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩
10. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩
11. आप० ध० १.३०.८.↩
12. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

13. मनु० रमृ० २.६↩

14. गौ० ध० १. १, २↩

15. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

16. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

17. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

18. आप० ध० १.३०.८.↩

19. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

20. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

21. मनु० रमृ० २.६↩

22. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not

be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

११①

२८①

01 क्षेत्रम् परिगृह्योत्थानाभावात्फलाभावे यः④

क्षेत्रं परिगृह्योत्थानाभावात्फलाभावे यः समृद्धः स भावि तदपहार्यः १

▼

⑤

>
▼ Bühler

1. If a person who has taken (a lease of) land (for cultivation) does not exert himself, and hence (the land) bears no crop, he shall, if he is rich, be made to pay (to the owner of the land the value of the crop) that ought to have grown. 1

▼ हरदत्त-टीका

सूत्रम्⑥

क्षेत्रं परिगृह्योत्थानाभावात्फलाभावे यस्समृद्धस्स भावि तदपहार्यः ॥ १॥

टिप्पनी⑥

वैश्यो वैश्यवृत्तिर्वा परस्य क्षेत्रं कृष्यर्थं परिगृह्य यदि उत्थानं कृषिविषयं यत्नं न कुर्यात्, तदभावाच्च फलं न स्यात् , तत एतस्मिन्निमित्ते स कर्षकस्समृद्धश्चेत्तस्मिन् भोगे यद्भावि फलं तदपहार्यः अपहारयितव्यः । राज्ञा क्षेत्रस्वामिने दाप्यः ॥१॥

02 अवशिनः कीनाशस्य कर्मन्यासे

अवशिनः कीनाशस्य कर्मन्यासे दण्डताडनम् २

▼

⑤

>
▼ Bühler

2. A servant in tillage who abandons his work shall be flogged. 2

▼ हरदत्त-टीका

सूत्रम्⑥

अवशिनः कीनाशस्य कर्मन्यासे दण्डताडनम् ॥२॥

टिप्पनी⑥

कीनाशः कर्षकः। तस्याऽवशिनः अस्वतन्त्रस्य निर्धनस्थ कर्मन्यासे स चेत् कृषिकर्म न्यसेत् विच्छिन्द्यात् तस्य दण्डेन ताडनं कर्तव्यं स दण्डेन ताडयितव्यः । अर्थाभावान्नाऽर्थदण्डः ॥

अपर आह- अवशी अवश्यः अविधेयः यः क्षेत्रं परिगृह्याऽवशिनः कीनाशस्य कृषिकर्म न्यसेत् न स्वयं कुर्यात् , तदा स परिग्राहको दण्डेन ताडयितव्य इति। यदि वा अवशिन इति बहुव्रीहिः । यस्य कीनाशस्य वशी स्वतन्त्रः क्षेत्रवान्नास्ति, स यदि पूर्वकृष्टस्य क्षेत्रस्य कृषिकर्म न्यसेत् न कुर्यात्, तस्य दण्डताडनं दण्ड इति राजपुरुषस्योपदेशः ॥२॥

03 तथा पशुपस्य

तथा पशुपस्य ३

▼

⑤

>
▼ Bühler

3. The same (punishment shall be awarded) to a herdsman (who leaves his work);

▼ हरदत्त-टीका

सूत्रम्⑥

तथा पशुपस्य ॥३॥

टिप्पनी⑥

पशुपो गोपालः तस्याऽपि कर्मन्यासे पालनस्याऽकरणे दण्डेन ताडनं दण्डः ॥३॥

04 अवरोधनञ् चास्य पशूनाम्

अवरोधनं चास्य पशूनाम् ४

▼

⑤

>
▼ Bühler

4. And the flock (entrusted) to him shall be taken away (and be given to some other herdsman).

▼ हरदत्त-टीका

सूत्रम्⑥

अवरोधनं चाऽस्य पशूनाम् ॥ ४॥

टिप्पनी⑥

ये चास्य पशवो रक्षणाय समर्पितास्तेषां चाऽवेराधनमपहरणं कर्तव्यमन्यस्य गोपस्य समर्पणीया इति ॥४॥

05 हित्वा व्रजमादिनः कर्शयेत्पशून्

हित्वा व्रजमादिनः कर्शयेत्पशून्। नातिपातयेत्। ५

▼

⑤

>

▼ Bühler

5. If cattle, leaving their stable, eat (the crops of other persons, then the owner of the crops, or the king's servants), may make them lean (by impounding them); (but) he shall not exceed (in such punishment). 3

▼ हरदत्त-टीका

सूत्रम्⑥

हित्वा व्रजमादिनः कर्शयेत्पशून् ॥ ५ ॥

टिप्पनी⑥

ये पशवो व्रजे गोष्ठे निरुद्धास्तं व्रजं हित्वा आदिनस्सस्यादेर्भक्षयितारो भवन्ति; तान् कर्शयेत् बन्धनादिना कृशान् कुर्यात् । कः? यत् भक्षितं तद्वान्, राजपुरुषो वा ॥५॥

सूत्रम्⑥

नाऽतिपातयेत् ॥ ६ ॥

टिप्पनी⑥

नाऽतिनिरोधं कुर्यात् न ताडयेद्वेति ॥ ६ ॥

06 अवरुध्य पशून्मारणे नाशने

अवरुध्य पशून्मारणे नाशने वा स्वामिभ्योऽवसृजेत् ६

▼

⑤

>

▼ Bühler

6. If (a herdsman) who has taken cattle under his care, allows them to peṛṣ, or loses (them by theft, through his negligence), he shall replace them (or pay their value) to the owners. 4

▼ हरदत्त-टीका

सूत्रम्⑥

अवरुध्य5 पशुन्मारणे नाशने वा स्वामिभ्योऽवसृजेत् ॥७॥

टिप्पनी⑥

यदि पशुपः पशूनवरुध्य पालयितुं गृहीत्वा सभयस्थाने विसृज्योपेक्षया मारयेत् नाशयेद्वा । नाशनं चारादिभिरपहरणम् । स स्वामिभ्यः पशूनवसृजेत् प्रत्यर्पयेत् पश्वभावे मूल्यम् ॥ ७ ॥

07 प्रमादादरण्ये पशूनुत्सृष्टान्दृष्ट्वा ग्राममानीय

प्रमादादरण्ये पशूनुत्सृष्टान्दृष्ट्वा ग्राममानीय स्वामिभ्योऽवसृजेत् ७

▼

⑤

>

▼ Bühler

7. If (the king's forester) sees cattle that have been sent into the forest through negligence (without a herdsman), he shall lead them back to the village and make them over to the owners.

▼ हरदत्त-टीका

सूत्रम्⑥

प्रमादादरण्ये पशूनुत्सृष्टान् दृष्ट्वा ग्राममानीय स्वामिभ्योऽवसृजेत् ॥ ८॥

टिप्पनी⑥

यदि स्वामिनः प्रमादादरण्ये पशूनुत्सृजेयुः विना पालकेन ततस्तान् दृष्ट्वा ग्राममानीय स्वामिभ्यः अर्पयेत् । कः ? यस्तत्र रक्षकत्वेन राज्ञा नियुक्तः ॥८॥

08 पुनः प्रमादे सकृदवरुध्य

पुनः प्रमादे सकृदवरुध्य ८

▼

⑤

>
▼ Bühler

8. If the same negligence (occur) again, he shall once impound them (and afterwards give them back).

▼ हरदत्त-टीका

सूत्रम्⑥

पुनः प्रमादे सकृदवरुध्य ॥ ९ ॥

टिप्पनी⑥

पुनः प्रमादादुत्सृष्टेषु सकृदवरुध्य स्वामिभ्योऽवसृजेत् ॥९॥

09 तत ऊर्ध्वन् न

तत ऊर्ध्वं न सूर्क्षेत् ९

▼

⑤

>
▼ Bühler

9. (If the same fault be committed again) after that (second time), he shall not take care (of them).

▼ हरदत्त-टीका

सूत्रम्⑥

तत ऊर्ध्वं न सूर्क्षेत् ॥१०॥

टिप्पनी⑥

ततो द्वितीयात् प्रयोगादूर्ध्वं 'ग्राममानीये'त्यादि यदुक्तं तन्न सूर्क्षेत् नाद्रियेत तस्मिन् विषये उपेक्षेत ॥१०॥

10 परपरिग्रहमविद्वानाददान एधोदके मूले

परपरिग्रहमविद्वानाददान एधोदके मूले पुष्पे फले गन्धे ग्रासे शाक इति वाचा बाध्यः १०

▼

⑤

>
▼ Bühler

10. He who has taken unintentionally the property of another shall be reprimanded, in case (the property be) fuel, water, roots, flowers, fruits, perfumes, fodder, or vegetables.

▼ हरदत्त-टीका

सूत्रम्⑥

परपरिग्रहमविद्वानाददान एधोदके मूले पुष्पे फले गन्धे ग्रासे शाक इति वाचा बाध्यः ॥ ११ ॥

टिप्पनी⑥

एधाश्चोदकं च एधोदकम् । ग्रासो गवाद्यर्थो यवसादिः । सर्वत्र विषयसप्तमी । यः परपरिग्रहोऽयमित्यविद्वानजानन् एधादिकमादत्ते गृह्णाति, स तस्मिन्विषये तत्र नियुक्तेन राजपुरुषेण निष्ठुरया वाचा बाध्यः निवार्यः ॥ ११ ॥

11 विदुषो वाससः परिमोषणम्

विदुषो वाससः परिमोषणम् ११

▼

⑤

>
▼ Bühler

11. (If he takes the above-mentioned kinds of property) intentionally, his garment shall be taken away.

▼ हरदत्त-टीका

सूत्रम्⑥

विदुषो वाससः6 परिमोषणम् ॥ १२॥

टिप्पनी⑥

यस्तु विद्वानेवाऽऽदत्ते तस्य वाससोऽपहारः कर्तव्यः ॥ १२ ॥

12 अदण्ड्यः कामकृते तथा

अदण्ड्यः कामकृते तथा प्राणसंशये भोजनमाददानः १२

▼

⑤

>

▼ Bühler

12. He who takes intentionally food when he is in danger of his life shall not be punished.

▼ हरदत्त-टीका

सूत्रम्⑥

अदण्ड्यः कामकृते तथा प्राणसंशये भोजनमाददानः ॥१३॥

टिप्पनी⑥

तथाशब्दस्य भोजनमित्यनेन सम्बन्धः । प्राणसंशयदशायामेधोदकादेरादाने कामकृतेऽप्यदण्ड्यः । तथा भोजनमप्याददानः प्राणसंशये न दण्ड्य इति ॥ १३ ॥

13 प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनः

प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनः स्पृशति १३

▼

⑤

>

▼ Bühler

13. If the king does not punish a punishable offence, the guilt falls upon him. 7

▼ हरदत्त-टीका

सूत्रम्⑥

प्राप्तनिमित्ते दण्डाकर्मणि राजानमेनस्स्पृशति ॥ १४ ॥

टिप्पनी⑥

प्राप्त दण्डनिमित्तं यस्य तस्मिन् पुरुषे दण्डाकर्मणि दण्डस्याऽक्रियायां यदि दययाऽर्थलोभेन वा प्राप्तदण्डं न कुर्यात् तदा तदेनो राजान मेव स्पृशति ॥ १४ ॥

इत्यापस्तम्बधर्मसुत्रवृत्तौ द्वितीयप्रश्ने ऽष्टाविंशी कण्डिका ॥२८॥

---

1. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.
   ↩

2. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩

3. Manu II, 35.↩

4. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩

5. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

6. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

7. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

२९①

01 प्रयोजयिता मन्ता कर्तेति④

प्रयोजयिता मन्ता कर्तेति स्वर्गनरकफलेषु कर्मसु भागिनः १

▼

⑤

>
▼ Bühler

1. He who instigates to, he who assists in, and he who commits (an act, these three) share its rewards in heaven and its punishments in hell.

▼ हरदत्त-टीका

सूत्रम्⑥

प्रयोजयिता मन्ता कर्तेति स्वर्गनरकफलेषु कर्मसु भागिनः ॥१॥

प्रस्तावः⑥

ननु1 शास्त्रफलं प्रयोक्तरि, तत्कथमन्यकृतमेनोऽन्यं स्पृशतीति, बहुविधत्वात् कर्तृभेदस्येत्याह—

टिप्पनी⑥

धर्ममधर्मं वा प्रकुर्वाणं यः प्रयुंक्ते-इदमित्थं कुर्विति, स प्रयोजयिता । स चाऽनेकप्रकारः-आज्ञापकोऽभ्यर्थयिता अनुग्राहक इति । भृत्यादेर्निकृष्टस्य प्रवर्तना आज्ञा । गुर्वादेराराध्यस्य प्रवर्तनाऽभ्यर्थना । अनुग्रहो द्विविधा-उपदेशस्तत्सधर्माचरणं चेति । तत्र य इत्थमर्थमुपदिशति त्वं शत्रुमित्थं व्यापादय, धर्मार्जनेऽयं तेऽभ्युपाय इति स उपदेष्टा । यः पुनः केनचिज्जिघांसितं पलायमानं वा निरुणद्धि निरुद्धश्च हन्यते स निरोद्धाऽनुग्राहकः । मन्ता अनुमन्ता यस्याऽनुमतिमन्तरेणार्थो न निवर्तते स राजादिको धर्माधर्मयोरनुमन्ता । कर्ता साक्षाक्रियाया निर्वर्तकः । एते त्रयोऽपि स्वर्गफलेषु नरकफलेषु च कर्मसु धर्मेष्वधर्मेषु च भागिनः फलस्यांशभागिनः अंशभाजः । सर्वेषां च यथाकथंचित् कर्तृत्वम् ॥ १॥
02 यो भूय आरभते

यो भूय आरभते तस्मिन्फलविशेषः २

▼

⑤

>
▼ Bühler

2. He amongst these who contributes most to the accomplishment (of the act obtains) a greater share of the result.

▼ हरदत्त-टीका

सूत्रम्⑥

यो भूय आरभते तस्मिन् फलविशेषः ॥२॥

टिप्पनी⑥

तेषु प्रयोजकादिषु यो भूय आरभते यस्य व्यापारोऽर्थनिवृत्तावधिकमुपयुज्यते तस्मिन् फलविशेषो भवति ॥ २॥

03 कुटुम्बिनौ धनस्येशते

कुटुम्बिनौ धनस्येशते ३

▼

⑤

>
▼ Bühler

3. Both the wife and the husband have power over (their) common property. 2

▼ हरदत्त-टीका

सूत्रम्⑥

कुटुम्बिनौ धनस्येशाते ॥३॥

प्रस्तावः⑥

यद्यप्येवम्—

टिप्पनी⑥

कुटुम्बिनौ दम्पती। तौ धनस्य परिग्रहे विनियोगे च ईणाते । यद्यप्येवं, तथापि भर्तुरनुशया विना स्त्री न विनियोक्तुं प्रभवति । भर्ता तु प्रभवति । तदेतेन वेदितव्यं 'न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ती'ति (२.१४. २०) ॥ ३॥

04 तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन्

तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन् ४

▼

⑤

>
▼ Bühler

4. By their permission, others also may act for their good (in this and the next world, even by spending money). 3

▼ हरदत्त-टीका

सूत्रम्⑥

तयोरनुमतेऽन्येऽपि तद्धितेषु वर्तेरन् ॥ ४ ॥

टिप्पनी⑥

तयोर्दम्पत्योरनुमतेऽनुमतौ सत्यामन्येऽपि पुत्रादयः तयोरैहिकेष्वामुष्मिकेषु च हितेषु वर्तेरन् द्रव्यविनियोगेनाऽपि ॥४॥

05 विवादे विद्याभिजनसम्पन्ना वृद्धा

विवादे विद्याभिजनसंपन्ना वृद्धा मेधाविनो धर्मेष्वविनिपातिनः ५

▼

⑤

>
▼ Bühler

5. Men of learning and pure descent, who are aged, clever in reasoning, and careful in fulfilling the duties (of their caste and order, shall be the judges) in lawsuits. 4

▼ हरदत्त-टीका

सूत्रम्⑥

विवादे विद्याभिजनसम्पन्ना वृद्धा मेधाविनो धर्मेष्वविनिपातिनः ॥ ५ ॥

टिप्पनी⑥

अर्थिप्रत्यर्थिनोर्विप्रतिषिद्धो वादो विवादः । तत्र विद्यादिगुणसंयुक्ता निर्णेतारस्स्युरिति वाक्यशेषः । विद्या अध्ययनसम्पत्, अध्ययनसहितं शास्त्रज्ञानं वा । अभिजनः कुलशुद्धिः । वृद्धाः परिणतवयसः । मेधाविनः ऊहापोहकुशलाः । धर्मेषु वर्णाश्रमप्रयुक्तेषु अविनिपातिनः, विनिपातः प्रमादः तद्रहिताः ॥५॥

06 सन्देहे लिङ्गतो दैवेनेति

संदेहे लिङ्गतो *(=अनुमानेन)* दैवेनेति विचित्य ६

▼

⑤

>
▼ Bühler

6. In doubtful cases (they shall give their decision) after having ascertained (the truth) by inference, ordeals, and the like (means). 5

▼ हरदत्त-टीका

सूत्रम्⑥

सन्देहे लिङ्गतो देवेनेति विचित्य ॥ ६ ॥

टिप्पनी⑥

ते च निर्णयन्तस्सन्देहस्थलेषु लिङ्गतोऽतुमानेन दैवेन तप्तमाषादिना इतिशब्दः प्रकारे । यच्चान्यदेवंयुक्तं वचनव्याघातादि तेन च विचित्यार्थस्थितिमन्विष्य निर्णेतारस्स्युरित्यध्याहृतेन वाक्यपरिसमाप्तिः ॥६॥

07 पुण्याहे प्रातरग्नाविद्धे ऽपामन्ते

पुण्याहे प्रातरग्नाविद्धे ऽपामन्ते राजवत्य् उभयतः *(उभयपक्षाभ्याम्)* समाख्याप्य सर्वानुमते मुख्यः सत्यं प्रश्नं ब्रूयात् ७

▼

⑤

>
▼ Bühler

7. A person who is possessed of good qualities (may be called as a witness, and) shall answer the questions put to him according to the truth on an auspicious day, in the morning, before a kindled fire, standing near (a jar full of) water, in the presence of the king, and with the consent of all (of both parties and of the assessors), after having been exhorted (by the judge) to be fair to both sides. 6

▼ हरदत्त-टीका

सूत्रम्⑥

पुण्याहे प्रातरग्नाविद्धेऽपामन्ते राजवत्युभयतस्समाख्याप्य सर्वानुमते मुख्यस्सत्यं प्रश्नं ब्रूयात् ॥ ७॥

प्रस्तावः⑥

अथ साक्ष्यविधिः—

टिप्पनी⑥

पुण्याहो देवनक्षत्रम् , प्रातर्मध्याह्नादिषु अग्नाविद्धे अग्निमिध्वा तत्समीपे अपामन्ते उदकमुपनिधाय तत्समीपे राजवति राजाधिष्ठिते सदसि । राजग्रहणं प्राड्विवाकादेरुपलक्षणम् । उभयत उभयोरर्थिप्रत्यर्थिनोस्समाख्याप्य किमहं युवयोः प्रमाणभूतः साक्षीत्यात्मानं ख्यापयित्वा । यदि वा उभयतः उभयोरपि पक्षयोस्सत्यवचने च असत्यवचने च साक्षिणो यद्भावि फलं तत्—
सत्यं ब्रूह्यनृतं त्यक्त्वा सत्येन स्वर्गमेष्यसि ।
7अनृतेन महाघोरं नरकं प्रतिपस्यसे ॥

इत्यादिना प्रकारेण समाख्याप्य प्राड्विवाकादिभिः पृष्ट इति शेषः । सर्वानुमते अर्थिप्रत्यर्थिनोस्सभ्यानां चाऽनुमतौ सत्यां सभ्यो मुख्यः साक्षिगुणैरुपेतो दोषैश्च वर्जितस्साक्षी प्रश्नं पृष्टमर्थं सत्यं यथाऽऽत्मना ज्ञातं तथा ब्रूयात् ॥ ७ ॥

08 अनृते राजा दण्डम्

अनृते राजा दण्डं प्रणयेत् ८

▼

⑤

>

▼ Bühler

8. If (he is found out speaking) an untruth, the king shall punish him. 8

▼ हरदत्त-टीका

सूत्रम्⑥

अनृते राजा दण्डं प्रणयेत् ॥ ८॥

टिप्पनी⑥

साक्षिणाऽनृतमुक्तमिति प्रतिपन्ने राजा9 दण्डं प्रणयेत् ।

अत्र मनुः—
"10यस्य दृश्येत् सप्ताहा11दुक्तसाक्ष्यस्य साक्षिणः ।
रोगोऽग्निर्ज्ञातिमरणं 12दाप्यो दण्ड च तत्समम् ॥” इति ॥ ८॥

09 नरकश्चात्राधिकः साम्पराये

नरकश्चात्राधिकः सांपराये ९

▼

⑤

>
▼ Bühler

9. Besides, in that case, after death, hell (will be his punishment). 13

▼ हरदत्त-टीका

सूत्रम्⑥

नरकश्चाऽत्राधिकः साम्पराये ॥ ९॥

प्रस्तावः⑥

न केवलमसत्यवचने राजदण्डः, किं तर्हि ?

टिप्पनी⑥

साम्परायः परलोकः, तत्र नरकश्च भवति, न तु,
14 राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः ।
निर्मलास्स्वर्गमायान्ति सन्तस्सुकृतिनो यथा ॥
इत्यस्यायं विषय इति ॥९॥

10 सत्ये स्वर्गः सर्वभूतप्रशंसा

सत्ये स्वर्गः सर्वभूतप्रशंसा च १०

▼

⑤

>
▼ Bühler

10. If he speaks the truth, (his reward will be) heaven and the approbation of all created beings. 15

▼ हरदत्त-टीका

सूत्रम्⑥

सत्ये स्वर्गस्सर्वभूतप्रशंसा च ॥ १० ॥

टिप्पनी⑥

सत्य उक्ते स्वर्गो भवति । सर्वाणि च भूतान्येनं प्रशसन्ति अपि देवाः ॥१०॥

11 सा निष्ठा या

सा निष्ठा या विद्या स्त्रीषु शूद्रेषु च ११

▼

⑤

>
▼ Bühler

11. The knowledge which Śūdras and women possess is the completion (of all study). 16

▼ हरदत्त-टीका

सूत्रम्⑥

सा निष्ठा या विद्या स्त्रीषु शुद्रेषु च ॥११॥

टिप्पनी⑥

स्त्रीषु शूद्रेषु च या विद्या सा निष्ठा समाप्तिस्तस्यामप्यधिगतायां विद्याकर्म परितिष्ठतीति ॥ ११ ॥

12 आथर्वणस्य वेदस्य शेष

आथर्वणस्य वेदस्य शेष इत्युपदिशन्ति १२

▼

⑤

>
▼ Bühler

12. They declare, that (this knowledge) is a supplement of the Atharva-Veda.

▼ हरदत्त-टीका

सूत्रम्⑥

आथर्वणस्य वेदस्य शेष इत्युपदिशन्ति ॥ १२ ॥

टिप्पनी⑥

अथर्वणा प्रोक्तमधीयते ये ते आथर्वणिकाः । वसन्तादिभ्यष्ठक् । तेषां समाम्नायः । "आथर्वणिकस्येकलोपश्च" आथर्वणः । तस्य वेदस्य शेष इत्युपदिशन्ति धर्मज्ञाः-या विद्या स्त्रीषु शूद्रेषु चेति ॥ १२॥

13 कृच्छ्रा धर्मसमाप्तिः समाम्नातेन

कृच्छ्रा धर्मसमाप्तिः समाम्नातेन । लक्षणकर्मणात्तु समाप्यते १३

▼

⑤

>
▼ Bühler

13. It is difficult to learn the sacred law from (the letter of) the Vedas (only); but by following the indications it is easily accomplished.

▼ हरदत्त-टीका

सूत्रम्⑥

कृच्छ्रा धर्मसमाप्तिस्समाम्नानेन लक्षणकर्मणा तु समाप्यते ॥ १३ ॥

टिप्पनी⑥

समाम्नानं प्रतिपदपाठः । तेन धर्मसमाप्तिः कृच्छ्रा न शक्या कर्तुम् । किं तु लक्षणकर्मणा समाप्यते येन सामान्येन भिन्नानामध्यधिगमो भवति तल्लक्षणं, तस्य कर्मणा करणेन समाप्यते ।

कर्मणात्त्विति द्वितकारपाठोऽयमार्षः । आदिति वा निपातस्य प्रश्लेषः । स च सद्य इत्यस्यार्थे द्रष्टव्यः ॥ १३ ॥

14 तत्र लक्षणम् सर्वजनपदेष्वेकान्तसमाहितमार्याणां

तत्र लक्षणम् । सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत । एवमुभौ लोकावभिजयति १४

▼

⑤

>
▼ Bühler

14. The indications for these (doubtful cases are), 'He shall regulate his course of action according to the conduct which is unanimously recognised in all countries by men of the three twice-born castes, who have been properly obedient (to their teachers), who are aged, of subdued senses, neither given to avarice, nor hypocrites. Acting thus he will gain both worlds.' 17

▼ हरदत्त-टीका

सूत्रम्⑥

तत्र लक्षणम् ॥ १४॥

सूत्रम्⑥

सर्वजनपदेष्वेकान्तसमाहितमार्याणां वृत्तं सम्यग्विनीतानां वृद्धानामात्मवतामलोलुपानामदाम्भिकानां वृत्तसादृश्यं भजेत एवमुभौ लोकावभिजयति ॥ १५॥

टिप्पनी⑥

पूर्वेण गतम् ॥ १५ ॥

15 स्त्रीभ्यः सर्ववर्णेभ्यश्च धर्मशेषान्प्रतीयादित्येक

स्त्रीभ्यः सर्ववर्णेभ्यश्च धर्मशेषान्प्रतीयादित्येक इत्येके १५

▼

⑤

>

▼ Bühler

15. Some declare, that the remaining duties (which have not been taught here) must be learnt from women and men of all castes.

▼ हरदत्त-टीका

सूत्रम्⑥

स्त्रीभ्यस्सर्ववर्णेभ्यश्च धर्म शेषान्प्रतीयादित्येक इत्येके ॥ १६ ॥

टिप्पनी⑥

उक्तव्यतिरिक्ता ये धर्मास्ते धर्मशेषास्तान् स्त्र्यादीनामपि सकाशात् प्रतायादित्येके मन्यन्ते । ते च प्रतिजनपदं प्रतिकुलं च भिन्नास्तथैव प्रतिपत्तव्याः । तत्र द्राविडाः कन्यामेषस्थे सवितर्यादित्यपूजामाचरन्ति भूमौ मण्डलमालिख्य, इत्यादीन्युदाहरणानि । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥ १६ ॥

इत्यापस्तम्बधर्मसूत्रवृत्तौ द्वितीयप्रश्ने एकोनविंशी कण्डिका ॥ २९॥

इति चाऽऽपस्तम्बधर्मसूत्रवृत्तौ श्रीहरदत्तमिश्रविरचितायामुज्ज्वलायां द्वितीयप्रश्ने एकादशः पटलः ॥ ११ ॥

समाप्तो द्वितीयः प्रश्नः ॥

समाप्तमिदमुज्वलोज्वलितमापस्तम्बधर्मसूत्रम् ॥

इत्येकादशः पटलः

इति द्वितीयोऽध्यायः

समाप्तं चेदमापस्तम्बीयधर्मसूत्रम्

---

1. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩
2. 1. Samaya, 'agreement, decision,' is threefold. It includes injunction, restriction, and prohibition.

   ↩
3. Manu II, 6, 12 Yājñ. I, 7; Gautama I, 1.↩
4. Manu II, 35.↩
5. Manu 1, 91, VIII, 410; and IX, 334; Yājñ. I, 120.↩
6. The use of the masculine in the text excludes women. For though women may have occasion to use such texts as 'O fire, of the dwelling' &c. at the Agnihotra, still it is specially ordained that they shall be taught this and similar verses only just before the rite is to be performed.↩

7. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

8. The object of the Sūtra is to remove a doubt whether the ceremony of initiation ought to be repeated for each Veda, in case a man desires to study more than one Veda. This repetition is declared to be unnecessary, except, as the commentator adds, in the case of the Atharva-veda, for which, according to a passage of a Brāhmaṇa, a fresh initiation is necessary. The latter rule is given in the Vaitāna-sūtra I, 1, 5.↩

9. मातामहमहाशैलम् महस्तदपितामहम् । कारणं जगतो वन्दे कण्ठादुपरि वारणम् ॥१॥ इत्यधिक पाठ• क० पु० ।↩

10. दक्षस्मृ० अ० २ श्लो २९ 'यदन्यत् कुरुते कर्म न तस्य फलभाक्भवेत् । इति तस्योत्तरार्धम् ।↩

11. गौ० ध० २१. ४."अशुचेर्द्विजाती"ति. घ. पु↩

12. आप० ध० १.३०.८.↩

13. Haradatta: 'But this (latter rule regarding the taking of p. 3 another teacher) does not hold good for those who have begun to study, solemnly, binding themselves, to their teacher. How so? As he (the pupil) shall consider a person who initiates and instructs him his Ācarya, and a pupil who has been once initiated cannot be initiated again, how can another man instruct him? For this reason it must be understood that the study begun with one teacher may not be completed with another, if the first die.' Compare also Haradatta on I, 2, 7, 26, and the rule given I, 1, 4, 26. In our times also pupils, who have bound themselves to a teacher by paying their respects to him and presenting a cocoa-nut, in order to learn from him a particular branch of science, must not study the same branch of science under any other teacher.↩

14. मनु० स्मृ० २.६↩

15. Manu II, 69; Yājñ. I, 15.↩

16. Manu II, 144.↩

17. Manu II, 146-148.↩

Appendix - +Dyugangā द्युगङ्गा①

Goals ध्येयानि②

Dyugangā (https://rebrand.ly/dyuganga) is a work group dedicated to the promotion of ever-victorious Hindu ideals and arts. It's current focus is in presenting important texts for easy study.

The texts may be presented as

- audio files (eg: MahAbhArata audio book project),
- as web pages (eg: Apastamba-gRhya-sUtra, Apastamba-dharma-sUtra, EkAgnikANDa commentary, manu-smRti, raghuvaMsha, more kalpa-texts, tattva-texts, universal subhAShita DB),
- as dictionaries (eg: stardict)
- ebooks distributed on various platforms (eg: book-pub, amazon, google play).

You may subscribe to mail-streams for past and future announcements (dg, hv, san).

The choice of material heavily depends on the special interests of its current lead (vedas, kalpa, purANa-s).

संस्कृतानुवादः③

द्युगङ्गा नाम कार्यसंस्था ऽजेयानां भारतीयपुरुषार्थपरिकल्पनानाञ्च हिन्दुककलानाञ्च प्रसारणाय वर्तते। तदीयस् स्थूलोद्देशोऽधुना प्रमुखग्रन्थानाम् अध्ययनसौकर्याय प्रस्तुतिः। ततो ग्रन्थसङ्कलनकेन्द्रम् इति वक्तुमलम्।

ग्रन्थानाम् प्रस्तुतिर् ध्वनिसञ्चिकाभिस् स्यात् (यथा महाभारतपारायणप्रसारणे), जालक्षेत्रपृष्ठैर् वा (यथा विश्वासस्य मन्त्रटिप्पनीषु, एकाग्निकाण्डटीका), शब्दकोशैर् वाऽपि (stardict)।

सद्यश्च ग्रन्थाः संस्थाग्रण्या रुचिविशेषम् अनुसृत्य चिताः - वेदाः, इतिहासपुराणानि, कल्पवेदाङ्गग्रन्थाश् चेति।

Contribution दानम्③

Donations and sponsorship are welcome (use contact page) - they help offset operating costs (worker payments mainly ~1L/mo) and plan further projects. Project-specific sponsorship opportunities are occasionally advertised on our social media accounts and on certain mailing lists.